
स र ल—

संस्कृत-निबन्धादर्शः

संस्कृतविद्यार्थिनां विशेषोपकाराय, संस्कृतभाषा-प्रचार-
वृद्धये च सरल-सुललित-संस्कृतभाषया
निबद्ध निबन्ध-पुस्तकम्

(प्रथम—भागः)



सार्वभौम संस्कृत प्रचार कार्यालयः
वा रा ण सी

संस्कृत प्रचार-पुस्तकमाला, सं० ८ -

Presented by the
Ministry of Education
स र ल— Govt. of India

संस्कृत-निबन्धादर्शः

संस्कृतविद्यार्थिना विशेषोपकाराय, संस्कृतभाषा-प्रचार-
वृद्धये च सरल-सुललित-संस्कृतभाषया
निबद्धं निबन्ध-पुस्तकम्

(प्रथम-भागः)

लेखक —

श्री वासुदेव द्विवेदी, वेदशास्त्री, साहित्याचार्यः

(सम्पादकः—संस्कृतप्रचार-पुस्तकमालायाः)

सार्वभौम संस्कृत प्रचार कार्यालयः
वा रा ण सी

प्रकाशकः—
सार्वभौम संस्कृत प्रचार कार्यालयः,
वा रा ण सी ।



❀

द्वितीयावृत्ति—दो हजार प्रतियाँ
मूल्य—एक रुपया बासठ नये पैसे

❀

मुद्रक—
वैजनाथ प्रसाद
कल्पना प्रेस
रामकटोरा रोड, वाराणसी ।

आवश्यकं निवेदनम्

वर्तमानायां शिक्षा परीक्षा पद्धतौ निबन्धलेखनमपि एक परमा-वश्यको विषयो वर्तते। यद्यपि संस्कृतशिक्षाविभागे पूर्वं निबन्धविषये पूर्णं ध्यान न दीयते स्म परन्तु सम्प्रति शनैः शनैः संस्कृत शिक्षायामपि अस्य विषयस्य समादरो वर्द्धमानो विलोक्यते अत एव संस्कृतेऽपि बहूनि निबन्धपुस्तकानि लघूनि, मध्यमानि, बृहन्ति च प्रकाशितानि दृश्यन्ते। एतेषां पुस्तकाना पठनेन नूनमेव विद्यार्थिना सुमहान् लाभ सम्भाव्यते। परन्तु संस्कृतच्छात्राणां भाषाज्ञानवृद्धये यादृशानि सरलानि पुस्तकानि अपेक्ष्यन्ते तादृशानि पुस्तकानि प्रायः विरलान्येव। अत एव अस्माभि पुस्तकमिदं लिखित प्रकाशितं च कतिपयवर्षेभ्य पूर्वं यस्य इदं द्वितीय संस्करणं सम्प्रति प्रकाश्यते।

अस्मिन् पुस्तके यथासम्भव जटिलसन्धिरहिताया, स्वल्पसमासाया, सरल-ललिताया, प्रवाहपूर्णाया च संस्कृतभाषायाम् एकत्रिंशत् निबन्धा लिखिता सन्ति। इदं च पुस्तकं न केवल निबन्ध विषयज्ञानाय एव लिखित अत्युत संस्कृतभाषाया सरलतया प्रवेशाय तथा अनुवादविषयक-योग्यता संवर्द्धनाय अपि। अत एव निबन्धेषु स्थले स्थले सर्वासां विभक्तीना सर्वेषां तिङन्त-कृदन्त-पदाना च सामूहिकरूपेण विपुल सन्निवेशो विहितो वर्तते येन अनुवादलेखने, भाषणे भाषाविषयक-व्युत्पत्ति वर्द्धने च छात्राणां महान् लाभो जायेत। यदि अनया दृष्ट्या विद्यार्थिन पुस्तकमिद पठिष्यन्ति मुहुर्मुहुश्च वाचयिष्यन्ति तर्हि निस्संशय स्वल्पेनैव कालेन तेषां भाषाज्ञानं वर्द्धिष्यते भाषणादिषु च ते कामं समर्था भविष्यन्ति।

निबन्धै सहैव पुस्तकस्य अन्ते निदर्शनरूपेण कानिचित् पत्राणि अपि सन्निविष्टानि सन्ति। तथैव व्याख्यानदानस्य तदुपसंहारस्य च

शैली सन्निवेशिता वर्तते । एव च एतत्पुस्तकद्वारा पत्रलेखने व्याख्यानदाने च सम्यक् साहाय्य लब्धु शक्यते ।

आशासे, भविष्णवो विद्यार्थिनः सेवामिमां सहर्षं स्वीकरिष्यन्ति मदीयमुद्देश्य च सफलीकरिष्यन्ति इति ।

अनन्तचतुर्दशी
२०२०

संस्कृतच्छात्राणा हितचिन्तकः—
लेखकः

सन्धिविषये एकं निवेदनम्

सन्धि विहाय पदानां पृथक् पृथक् लेखनेन वाचने अर्थज्ञाने च सौविध्य भवति इति सर्वैरेव अनुभूयते । अतः संस्कृतभाषायाः सारल्येन प्रचारः स्यादेतदर्थं सन्धिरहितायाः संस्कृतभाषाया लेखनस्य आवश्यकता वर्तते । परन्तु सर्वथा सन्धिपरित्यागेऽपि भाषायाः सौन्दर्यं नश्यति, प्रवाहश्च क्वचित् क्वचित् अवरुद्धो जायते । अतः सर्वथा सन्धिपरित्यागोऽपि भाषया सह अन्याय्य एवास्ति । अस्मिन् विषये बहुधा विचिन्तयन्नपि अहं सिद्धान्तरूपेण इद निरचेतुं न पारितवान् यत् कुत्र सन्धि कर्तव्यः कुत्र च न कर्तव्यः । अतः पुस्तकेऽस्मिन् कामपि नीतिम् अनिवार्यं एव सरलताद्दृष्ट्या सन्धेः प्रयोगः अप्रयोगो वा विहितो वर्तते ।

एतद्विषये माननीया पण्डिताः सादरं निवेदयन्ते यत् "संस्कृत भाषायाः सौन्दर्यं प्रवाह-परिरक्षणपूर्वकं सरलतया प्रचारार्थं कुत्र सन्धिर्विधेया कुत्र च न विधेया" इति विषये स्वीया सुविचारिता सम्मतिं दत्त्वा अनुकम्पनीयोऽयं जन इति—

विनीत-निवेदकः—
लेखकः—

वर्तमानसंस्कृतशिक्षाया एको महान् दोषः तन्निराकरणस्य आवश्यकता च

"भाषणेनाथ लेखेन स्वाभिप्राय-प्रकाशनम्"।
भाषायाः शिक्षणस्येदं फलं सद्भिः प्रकीर्तितम्॥

परं संस्कृत-भाषायाः सुचिरं शिक्षणादपि।
लेखने भाषणे वापि योग्यता नैव जायते॥

पठन्ति यद्यपि छात्राः परीक्षा उत्तरन्ति च।
परन्तु लेखितुं पठितुं क्षमन्ते नैव ते क्षमाः॥

उपित्वा बहु-वर्षाणि रटित्वा च दिवानिशम्।
व्ययित्वा विपुलं धान्यं छात्रास्तिष्ठन्ति मूकवत्॥

छात्रा आचार्यवर्गेऽपि पठन्तः श्रमशुला अपि।
संस्कृते न क्षमाः कर्तुं सम्यक् भाव प्रकाशनम्॥

वदन्त्यर्थं हसन्त्यर्थं रुं रुं च बहु कुर्वते।
अनेकाः कुर्वतेऽशुद्धीरपि सामान्य-भाषणे॥

अयमेको महान् दोषो महतीयं त्रुटिस्तथा।
अयं संस्कृतशिक्षायै लज्जाया विषयो महान्॥

तस्मादेतस्य दोषस्य सम्यग् नाशाय सत्वरम्।
छात्रैरध्यापकैरपि सुप्रयत्नो विधीयताम्॥

तदर्थमनुवादस्य निबन्धविषयस्य च ।
शिक्षणे लेखने वापि ध्यान देयं विशेषत ॥
अस्माकं पाठशालासु पठने पाठने तथा ।
रटने चापि सर्वेषा दृश्यते यादृशी रुचि. ॥

न तथा भाषणे लेखेऽनुवादस्य च शिक्षणे ।
निबन्धलेखने वापि दृश्यते कस्यचिद् रुचिः ॥
तस्याद् विद्यार्थिवर्गस्य बहूनां विदुषा तथा ।
न व्युत्पत्तिर्न भाषायामधिकारो विलोक्यते ॥
अनेन हेतुना सर्वे छात्रास्तिष्ठन्ति लज्जिता ।
तथा संस्कृतशिक्षाया उपहासश्च जायते ॥
अतस्ता दूषिता रीतिं त्यक्त्वा विद्यार्थिबन्धुभि ।
परिडतैश्चापि भाषाया ज्ञाने वृद्धिर्विधीयताम् ॥
एतत्कार्यालयद्वारा भाषाज्ञानस्य हृदये ।
सरलं ललित चापि सत् साहित्य प्रकाशितम् ॥
तद् गृहीत्वा तदभ्यास कृत्वा चापि निरन्तरम् ।
भवन्तु सकलाश्छात्रा वक्तारो लेखकास्तथा ॥

विनम्र-निवेदकः

सार्वभौम संस्कृत प्रचार कार्यालयः

वाराणसी ।

विषय-सूची

माता-पितृ-भक्तिः	१
गुरु-भक्तिः	५
विद्या	८
बल व्यायामश्च	११
देश-भ्रमणम्	१५
स्वास्थ्य-रक्षा	१६
स्वच्छता	२२
समयस्य सदुपयोगः	२६
एकता	३०
कर्तव्य-पालनम्	३४
सत्यवादिता	३६
सच्चरित्रता	४२
परोपकारः	४६
उद्योग-परायणता	५०
शिष्टाचारः	५४
ईश्वरभक्तिः	५८
सत्सङ्गः	६२
विद्यार्थिनां कर्तव्यम्	६८
परिश्रमः	७२
धनोपार्जनम् तदुपयोगश्च	७७
स्त्री-शिक्षा	८१
देश-प्रीतिः	८६
ग्रामोन्नति-योजना	९०
समाज-सत्कारः	९६
पुस्तकालयः	१००
समाचारपत्राणि	१०४
विज्ञानस्य उपयोगिता	१०७
व्रतोत्सवानाम् उपयोगः	११९
महापुरुषाणां जीवनचरितावलिः	११५
महात्मा गान्धी	११८
संस्कृतभाषा	१२२

परिशिष्टम्

पत्रलेखन-पद्धतिः	१२७
प्रस्ताव-समर्थन-पद्धतिः	१३१

व्याख्यान-पद्धतिः

निबन्ध-लेखकेभ्यः

[१]

रीतिं विचिन्त्य, विगणय्य गुणान्, विगाह्य
शब्दार्थसार्थ—मनुसृत्य च सूक्तिमुद्राः ।
कार्यो निबन्ध—विषये विदुषा प्रयत्नः
के पोतयन्त्र—रहिता जलधौ प्लवन्ते ॥

—राजशेखरस्य

[२]

शीर्षोपेतान् सुसम्पूर्णान् समश्रेणिगतान् शुभान् ।
अक्षरान् वै लिखेद् यस्तु लेखकः स वरः स्मृतः ॥

—अग्निपुराणस्य

[३]

अतिकार्श्यम्, अतिस्थौल्यं वैषम्यं पङ्क्तिवक्रता ।
अतुल्याना च सादृश्यम् अविभागः पदेषु च ॥
लेखदोषा इमे प्रोक्ताः संत्याज्या लेखकै. सदा ॥

—कस्यापि प्राचीनग्रन्थस्य

॥ वाग्देवतायै नम ॥

सरल—

संस्कृत-निबन्धादर्शः



उपकृतये छात्राणाम्
संस्कृतभाषा-प्रचार-वृद्धये च ।
एष निबन्धादर्शो
विलिख्यते सरलभाषयाऽस्माभिः ॥

माता-पितृ-भक्तिः ।

इह जगतीतले जीवाना यथा मातापितरौ उपकारं कल्याणं च कुरुतो न तथा अन्य कोऽपि । अन्ये जना अल्पकालार्थं सहायका उपकारिणो वा भवन्ति पर मातापितरौ तु जन्मकालात् आरभ्य[1] मरणकाल यावत्[2] सर्वदैव स्वपुत्राणा साहाय्ये, उपकारकरणे, कल्याण-सम्पादने च निरतौ[3] तिष्ठत[4] ।

अवलोकय तु तावत् । माता हि नव मास पर्यन्तं महता क्लेशेन पुत्र गर्भे धारयति । यथा च तस्य कष्ट न भवेत् तथैव चेष्टते तथैव च आचरति । अनन्तर पुत्रे उत्पन्ने तस्य सेवाया रक्षाया च सलग्ना भवति । तस्यैव लालने पालने पोषणे सवर्द्धने च सततं दत्तचित्ता

१—लेकर । २—तक । ३—सलग्न । ४—रहते हैं ।

महान्त चिकित्साधिकारिणमेव कर्तुं प्रयतते। कथनस्य इत्थं तात्पर्यं वर्तते यत् सर्वे एव पितर स्वस्वपुत्रस्य अभ्युन्नतये सुखसाधनाय च सर्वप्रकारेण प्रयत्न विदधति।

इयमेव मातु पितुश्च उपकारस्य स्नेहस्य वात्सल्यस्य च कथा अस्ति। अत एव अस्माक शास्त्रेषु मातु पितुश्च सेवाया भक्तेश्च महीयान् महिमा वर्णितो वर्तते। यदा अस्मासु उपकाराय कल्याणाय उन्नतये सुखाय च मातापितरौ एव प्रकारेण प्रयत्न कुरुत तदा अस्माभिरपि तनैव प्रकारेण तयो सेवा शुश्रूषा च कर्तव्या। तयो आज्ञाया पालन कर्तव्यम्। तथा च आचरण कर्तव्य यथा माता पिता च उभौ अपि सुखिनो सन्तुष्टा प्रसन्नमानसौ च स्याताम्। यथा तौ आदेशेता[१८] तथा चलितव्यम्। श्रद्धया भक्त्या विनयेन च सदा तयो सत्कार सम्मानश्च विधातव्य। अहरहश्च वन्दनीयौ। न च तथा एक मपि कार्य कर्तव्य येन तयो स्वल्पमपि कष्ट भवत्, क्वापि वा उत्पद्यत। इदमेव पुनराह कर्तव्यम्। एष एव धर्म। इयमेव शास्त्रकाराणामाज्ञा। अयमेव च लोकपरलोकयो परम श्रेयस्कर पथा। अत एव शास्त्रेषु लिखित वर्तत—

य मातापितरौ क्लेश सहेत सम्भवे नृणाम्।
न तस्य निष्कृति कर्तुं शक्या वर्षशतैरपि॥
तयोर्नित्य प्रिय कुर्यात् आचार्यस्य च सर्वदा।
तेष्वेव त्रिषु तुष्टेषु तप सर्वं समाप्यते॥
[मनु० २ २२७ २२८]

अस्माक साहित्ये मातृभक्ताना पितृभक्ताना च अनेका कथा लिखिता सन्ति। भगवान् रामचन्द्र पितु आज्ञया चतुर्दशवर्ष-पर्यन्त वने वासमकरोत्। श्रवणकुमार स्वकीयौ अन्धौ मातापितरौ स्वकाये

१८—आदेश दें।

उपरि एव सदा वहति स्म। महात्मा भीष्मः पितुरेव प्रसन्नतायै आजीवन कठोरं ब्रह्मचर्यव्रतं धारितवान्। पितुरेव सुखोपभोगाय पुनः स्वकीयं यौवनं पित्रे दत्तवान्। एवम् अस्माकं देशे ईदृशा अनेके माता-पितृ-भक्ता महापुरुषा बभूवुः येषां नामानि अद्यापि गृहे गृहे गीयन्ते।

तथैव यदि वयमपि माता-पितृ-भक्ता भविष्यामः तदा अस्माकमपि परमं कल्याणं, सुमहान् समादरः महती च कीर्तिः भविष्यति। अतः सर्वैरेव जनैः मातृभक्तैः पितृभक्तैश्च भवितव्यम्।

गुरुभक्तिः।

अस्माकं शास्त्रेषु यथा मातापितृभक्तेः महिमा वर्णितो वर्तते तथैव गुरुभक्तेरपि। माता पुत्रं जनयित्वा[1] तस्य लालन-पालनादिकं करोति, पिता च तं शिक्षणाय पाठशालायां प्रेषयति, आर्थिकं साहाय्यं च कुरुते, परन्तु शिक्षा-दीक्षादिना तस्य वस्तुतः कल्याणं तु गुरुरेव साधयति[2]।

सद्-गुरुः न केवलं विद्यामेव शिक्षयति। न च केवलं पुस्तकानां पाठमेव पाठयति। अपि तु स शारीरिकीं नैतिकीं व्यावहारिकीं बौद्धिकीमपि च शिक्षां ददाति। स सदाचारस्य संयमस्य, विनयस्य विवेकस्य, यमस्य नियमस्य, दयायाः दाक्षिण्यस्य तथा शीलस्य सद्व्यवहारस्य च उपदेशं ददाति। किं कार्यं कर्तव्यं किं न कर्तव्यम्, केन पथा[3] चलितव्यम् केन न चलितव्यम्, कुत्र गन्तव्यं कुत्र न गन्तव्यम्, कस्य सङ्गतिः कर्तव्या कस्य न कर्तव्या, इत्यादिकं सर्वमेव शिष्याय बोधयति[4]। गुरुः

१—पैदा कर। २—करता है। ३—मार्ग से। ४—समझाता है, बतलाता है।

अज्ञानान्धकारं दूरे कृत्वा ज्ञानस्य दिव्यं प्रकाशं शिष्याय वितरति[५]। शिष्यस्य पशुभावम् अपनीय[६] गुरुः तं वस्तुतो मानवं कल्पयति[७]। गुरुः उपदेशामृतं पाययित्वा[८] शिष्यं मृत्युभयात् मोचयति[९] तस्मै अमरत्वं च प्रयच्छति[१०]। असन्मार्गात् निवार्य सन्मार्गे प्रवर्तयति[११]। न च केवलं शिक्षयत्येव प्रत्युत तस्य पुत्रवत् पालनमपि करोति। एवञ्च विविध-विद्या-शिक्षणेन, सदुपदेश प्रदानेन, सतत-संरक्षणेन, पुत्रवत् पालनेन, सन्मार्गं प्रदर्शनेन• असन्मार्गं निवर्तनेन च यथा गुरवः शिष्याणां हितं कुर्वन्ति, यथा च तेषां कल्याणं साधयन्ति न तथा अन्यः कोपि कर्तुं पारयति। वस्तुतः अपारे संसार-सागरे निमज्जताम्[१२] उन्मज्जता[१३] च जनानां पारेकरणाय निपुणो नाविको[१४] गुरुरेव। गुरुरेव च भयाटव्यां महति अन्धकारे इतस्ततो भ्रमतां भ्रान्तानां पथभ्रष्टानां पथिकानां मार्गदर्शको महादीपः। स एव च अज्ञानान्धानाम् इतस्ततो रागद्वेषादि-गर्तेषु पततां निपततां च जनानाम् अभिनव-दृष्टि-दायको वैद्यराज।

अनेनैव कारणेन शास्त्रेषु गुरुसेवायां गुरुभक्तौ गुरुपूजायाश्च महत् माहात्म्यं लिखितं वर्तते। अस्मिन् विषये शास्त्रेषु अनेके श्लोकाः मिलन्ति। यथा—

गुरुर्गरीयान् पितृतो मातृतश्चेति मे मतिः।

❀ ❀ ❀ ❀

शरीरमेव सृजतः पिता माता च भारत।
आचार्यशिष्टा या जाति सा दिव्या साऽजराऽमरा॥

[म० भा० शान्ति० अ० १०८]

अतोऽस्माभिः सर्वैरपि सदैव गुरूणां भक्तिः सेवा पूजा च

५—देता है। ६—हटाकर। ७—बनाता है। ८—पिला कर। ९—छुड़ाता है। १०—देता है। ११—लगाता है। १२-डूबते हुओं का। १३—उतराते हुओं का। १४—मल्लाह।

कर्तव्या । प्रतिदिन तेषां चरणेषु शिरसा प्रणामा कर्तव्या । तेषां सर्वे एव आदेशा: पालनीया: । न तु कदाचिदपि आज्ञाया उल्लघन कर्तव्यम् । ते यथा वर्तयेयु[१५] तथैव वर्तितव्यम्[१६] यथा चालयेयु तथैव चलितव्यम्, यथा च आज्ञापयेयु तथैव विधातव्यम् । सर्वदा च तेषां सेवाया शुश्रूषाया स्वागतविधौ सत्कारे च सावधानै भवितव्यम् ।

अपि च । नहि कदाचित् गुरु-सन्निधौ[१७] उच्चै हसितव्यम् । न च पादौ प्रसार्य[१८] पुरस्तात्[१९] स्थातव्यम् । नहि तत्र चञ्चलता प्रकटनीया । न च उद्दण्डता औद्धत्य वा कर्तव्यम् । न तै सह विवाद कर्तव्य: । न असत्य वक्तव्यम् । न अपलापो[२०] विधेय । न अविनयो दर्शनीय: । नहि अभद्रा वाच: समुच्चारणीया: । न च तत्समक्ष कलह कोलाहलो वा विधेय: । न च स्वप्नेऽपि गुरुषु ईर्ष्या द्वेष मात्सर्य वा कदाचित् विदधीत । शिष्याणाम् इमे एव आचारा इमे एव च व्यवहारा प्रशसनीया भवन्ति । ईदृशैरेव आचारै: ईदृशैरेव च व्यवहारै गुरव शिष्येषु प्रसीदन्ति, दया कुर्वन्ति, अनुरक्ता भवन्ति, सर्वं वेदितव्य वेदयन्ति, अखिलम् च उपदेष्टव्य उपदिशन्ति । प्रसन्नेषु च गुरुषु शिष्याणा सर्वतोमुखी प्रतिभा जायते, बुद्धि विकास प्राप्नोति, विद्या सफलता गच्छति, परितो यश प्रसरति, सर्वविध च मङ्गल जायते ।

प्राचीनकाले एतादृशा बहवो गुरुभक्ता बभूवु येषामुपाख्यान श्रुत्वा पठित्वा च महद् आश्चर्य जायते । आरुणि निजगुरो चरत्राणाय स्वशरीरमेव बध रूपम् अकरोत् । एकलव्या गुरो मृत्तिकामयीमेव मूर्तिं पुरतो निर्माय तद्भक्त्या शस्त्रचालने महतीं कुशलता प्राप ।

अस्मिन् समय प्रायेण अनेके विद्यार्थिनो गुरुषु यथोचिता भक्ति न कुर्वन्ति । न तेभ्य सम्यक् प्रणमन्ति । न यथावत् तेषाम् आदेशस्यैव

१५—कहें । १६—रहना चाहिये । १७—पास म । १८—पसार कर । १९—आगे । २०—बहाना ।

पालन कुर्वन्ति । न च सविनय व्यवहरन्ति । नाऽपि सेवन्ते । न च समादियन्ते । न च अनुशासन मन्यन्ते । नहि ईदृशा छात्रा शिष्टाचार विचारयन्ति । यथेष्ट ते आचरन्ति यथेष्ट च व्यवहरन्ति । परन्तु अय कल्याणकर पन्था नास्ति । ईदृशेन शास्त्रविरुद्धेन अनुचितेन च व्यवहारेण विद्यार्थिना कथमपि हित न भवितुमर्हति । अतो ये छात्रा आत्मन कल्याणमिच्छन्ति, यश सगाहन्ते, सफलताम् अभिलषन्ति, विशिष्टञ्च वैदुष्य कामयन्ते ते सदैव गुरुभक्ति कर्तव्या । विनयेन, सेवया, श्रद्धया, सत्कारेण, आदेशपालनेन, पितृवत्पूजनेन, उपचारेण च सर्वदैव गुरव प्रसादनीया ।

विद्या

संसारे बहूनि वस्तूनि सन्ति परं तेषु सर्वश्रेष्ठ वस्तु विद्या एव वर्तते । केवल जन्मना मनुष्य मनुष्यो न भवति अपि तु विद्यया एव । विद्यया हीना मनुष्या मनुष्यरूप धृत्वा अपि पशुवत् आचरण कुर्वन्ति । किं कर्तव्यम्, किम् अकर्तव्यम्, को धर्म क अधर्म, क सन्मार्ग कश्च असन्मार्ग इति ते सम्यग् न जानन्ति । अत एव ते विपरीतम् आचरन्ति पदे पदे च कष्ट लभन्ते । परन्तु ये विद्या पठितवन्त ते सर्वमपि कर्तव्याऽकर्तव्यादिकं जानन्ति । यथोचितम् आचरन्ति । अत एव च ते सुखमय जीवन यापयन्ति । अत एव विद्या सर्वेषु अपि वस्तुषु श्रेष्ठ मन्यते ।

सर्वेषु धनेषु अपि प्रधान धन विद्या एवास्ति । कथमिदम् । यतो हि अन्यानि सर्वविधानि धनानि चौरा चोरयन्ति, अग्नि भस्मसात् करोति, जल वाहयति, राजा हरण कारयति, दायादा विभजन्ते, कीटका

भूषणानि धारयन्तोऽपि न शोभन्ते न च समाद्रियन्ते एव। तेषा तावदेव शोभा भवति यावत् ते मौन धारयन्ति। पर वदनकाले समुपस्थिते तु सर्वाण्यपि तेषा भूषणानि निरर्थकानि जायन्ते। अतो विद्या एव सर्वोत्तम भूषणम्। तथाहि—

केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या सस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥
(भर्तृहरि शतकम्)

सर्वासाम् उन्नतीनामपि निदान विद्यैव अस्ति। व्यक्तेः जातेः समाजस्य राष्ट्रस्य वा समुन्नतिः विद्यया एव कर्तुं शक्यते। यस्या जातौ, यस्मिन् समाजे राष्ट्रे वा विद्याया यावान् प्रचारः वर्तते तावती एव तस्य समुन्नतिः दृश्यते। रूस, अमेरिका इङ्गलैण्ड प्रभृतयो ये ये देशाः सम्प्रति श्रेष्ठा मन्यन्ते ते विद्याया एव बलेन श्रेष्ठता गताः। विद्याया बलेनैव ते विज्ञाने वाणिज्ये शिल्पकलाया शस्त्रनिर्माणे शास्त्रनिर्माणे च अन्यदेशेभ्यः समुन्नता मन्यन्ते। सर्वत्र च तेषा विजयपताका समुच्छ्रयति।

विद्याया एव प्रभावेण अनेके नव-नवा आविष्कारा आविष्कृता विदेशवासिभि. वैज्ञानिकैः। सम्प्रति वायुयानद्वारा अल्पीयसा कालेन जना दूराद् दूरतर यान्ति। "तार" द्वारा दूरस्थितेन जनेन सह जना वार्तालाप कुर्वन्ति। "रेडियो" द्वारा अति दूरदेशे जायमान गीत भाषणादिक च जनाः समीपवत् शृण्वन्ति। बहु-समय-साध्यानि बहुजन-साध्यानि च कर्माणि यन्त्रबलेन सम्प्रति अल्पकालेन अल्पैरेव च जनैः साधयितु शक्यन्ते। तद् इमानि आश्चर्यजनकानि कार्याणि कथ सम्भवन्ति? विद्याया एव बलेन तु।

किं नाम अधिकं निरूपयामः। सर्वथा सिद्ध खलु विद्याया

माहात्म्यम्। विद्यया हि विनयो विवेकः प्रतिष्ठा यशः सौजन्य महत्त्वं वित्तं चेत्यादि सर्वमपि लब्धुं शक्यते। अतः सर्वैरेव बालकैः पूर्ण-परिश्रमेण सह विद्याया अध्ययन कर्तव्यम्। स्वसमाजे सर्वत्र विद्यायाः प्रचारः कर्तव्यः। तथा च अस्माभि. प्रयत्नो विधीयेत यथा प्रतिग्राम पाठशालाः स्थापिताः स्युः। सर्वे च भारतीया जना. शिक्षिता भवेयुः। एकोऽपि जनो निरक्षरो न मिलेत्। तदैव अस्माकमपि देशः पुनः पूर्ववत् प्रतिष्ठितो भविष्यति। अन्येषु च देशेषु सम्मान लप्स्यते।

बहवो विद्यार्थिनः परिश्रमेण अध्ययन न कुर्वन्ति। इतस्ततः पलायन्ते। वृथा भ्रमन्ति। निरर्थक बहु जल्पन्ति। खेलने कूर्दने शयने च दिनानि अतिवाहयन्ति[६]। पुन पुनः प्रेरिता अपि ध्यान न ददते। ताड्यमाना अपि स्वभावं न परित्यजन्ति। अन्ते च ते विद्याहीनाः सन्तो गुरोः पितुः मातुश्च महान्त क्लेश जनयन्ति। स्वय च पदे पदे कष्ट सहमाना., परामव प्राप्नुवन्तः दुःखमय जीवन यापयन्ति। अतो विद्यार्थिभि आलस्यादिकं विहाय परिश्रमेण यत्नेन च विद्याभ्यासः कर्तव्यो येन स्वस्य स्वदेशस्य च महान् उपकारः सपद्येत।

बल व्यायामश्च

सर्वेषामपि मनुष्याणां कृते यथा विद्याया आवश्यकता वर्तते तथैव बलस्यापि। विद्या बलञ्च उभौ अपि पदार्थौ मानवजीवनस्य समुन्नतये संरक्षणाय च परमोपयोगिनौ परमाऽवश्यकौ च। तथापि विद्या विना नु जनो बाहुबलेन यथाकथञ्चित् स्वनिर्वाहं कर्तुं शक्नोति अपि, पर बल

६—बिताते हैं।

विना तु क्षणमपि कार्य-सञ्चालन न भवितुमर्हति । विद्याविहीना अपि जना बले सति परिश्रमं कृत्वा येन केनापि प्रकारेण जीवितु क्षमन्ते, परं यदि बल न स्यात् तदा तु विद्वान् अविद्वान्, धनी निर्धनो वा किमपि स्वार्थं परार्थं वा कार्यं कर्तुं न शक्नोति । अत एव छान्दोग्योपनिषदि लिखित वर्तते यत्—

"यदा मनुष्यो बलवान् भवति तदैव स उत्थातुं शक्नोति, उत्थाय परिचरितुं शक्नोति, परिचर्यया च सिद्धिं लभते । बलेनैव मनुष्यः श्रोता भवति, द्रष्टा भवति, मन्ता भवति, बोद्धा भवति, विज्ञाता भवति, कर्ता भवति । का कथा मानवानाम् ? ब्रह्मण आरभ्य कीट-पतङ्ग-पिपीलिका-पर्यन्तं समस्ताऽपि सृष्टि. बलेनैव जीवमाना वर्तते । अत सर्वैरेव बलस्य उपासना कर्तव्या इति" ।

एतेन स्पष्टतया ज्ञातुं शक्यते यत् बलस्य जीवने कियती उपयोगिता वर्तते । परमात्मनः प्राप्तिरपि बलेनैव सम्भवति इत्यपि उपनिषदः कथयन्ति—

"नायमात्मा बलहीनेन लभ्यः" इति ।

एवञ्च शौच-स्नानादि नित्यकर्मण आरभ्य आत्मप्राप्ति पर्यन्त सर्वाणि अपि लघूनि महान्ति वा कर्माणि बलस्यैव साहाय्येन सिद्ध्यन्ति । यद्यपि कार्यसिद्धौ अन्यानि अपि कारणानि अपेक्षितानि भवन्ति पर सर्वप्रथम बलमेव आवश्यक भवति । अत एव भगवान् वेदव्यासो महाभारते वदति—"सर्वं बलवता साध्यम्" इति ।

ये तु जना दुर्बला निर्बला वा भवन्ति तेषा जीवन महाक्लेशकर भवति । ते सर्वत्रैव पराभूता अपमानिता अनादृताश्च जायन्ते । न तान् तृणमदशमपि जना मन्यन्ते । पदे पदे अन्येषा साहाय्य प्रतीक्षमाणाः ते *दिवानिश दीन-हीना महता दुःखेन दिनानि अतिवाहयन्ति ।* दैवमपि तेषा साहाय्य न कुरुते । सुख सम्पत्तिश्च तेभ्यः शत क्रोशान् दूरे तिष्ठति । परिवारस्य समाजस्य च कृते ते भारभूता भवन्ति । अतः अस्माभिः तथा-

विधाः प्रयत्ना अनुष्ठेया येन समाजस्य सर्वेऽपि नरा नार्यश्च पूर्णरूपेण बलवन्तः स्वास्थ्यसम्पन्ना आत्मरक्षण-समर्थाश्च भवेयुः।

अस्मिन् समये सर्वापेक्षया बलसञ्चयस्य महती आवश्यकता वर्तते। यतो हि अस्माकं बहवो विवेकशून्या मदोद्धता आततायिनः शत्रवः शस्त्रास्त्रैः, बलात्कारेण, छल कपटादिना, दुराचारेण सर्वैरेव च उपायैः अस्माकं देशस्य धर्मस्य मायायाः धर्मस्थानानां सम्पत्तेः सभ्यतायाश्च विलोपे कर्तुं प्रयत्नशीलाः सन्ति। प्रतिक्षणम् अवसरं प्रतीक्षन्ते। लब्धे च अवसरे त्वरितमेव आक्रमणं कुर्वन्ति। अस्यां सङ्कटापन्नायां परिस्थितौ यदि सर्वेऽपि वयं भारतीया दुर्बलता दूरे परित्यज्य बलवन्तो न भविष्यामः आत्मरक्षणाय च सद्धपरिकराः सुसन्नद्धाः सावधानाश्च न भवामः तावत् अस्माकं जीवन धन मर्यादा वा सर्वमपि अरक्षितमेव मन्तव्यम्। अत एव सम्प्रति बलसञ्चयस्य उपरि ध्यानदानस्य विशेषावश्यकता वर्तते।

बल वर्द्धनस्य अनेके उपाया सन्ति। यथा व्यायामः, मल्लयुद्धम्, प्राणायामः, खेलनं, वर्दनं च। एतेषां प्रचारेण समाजे बलस्य वृद्धिः कर्तुं शक्यते। इदानीं ग्रामे ग्रामे व्यायामशालायाः स्थापना कर्तव्या। सर्वाणि च व्यायामोपयोगीनि दण्ड मुद्गरादीनि साधनानि एकत्र करणीयानि। तत्र ग्रामस्य सर्वेऽपि बालका युवानश्च आगत्य आवश्यक-रूपेण यत्किञ्चिद् व्यायामादिकं कुर्युः। ग्रामेषु नगरेषु वा यत्र यत्र पाठशालाः चलन्ति तत्र तत्र व्यायामशाला अपि स्थापनीयाः येन विद्यार्थिनः प्रतिदिनं विद्योपार्जनेन सह बलसञ्चयमपि कर्तुं समर्था भवेयुः। इदानीं शत्रुभिः छिन्न भिन्न-कलेवरा भारतमाता न केवलं स्वपुत्रान् विद्यासागरे निपुणान् द्रष्टुं समीहते प्रत्युत शौर्ये वीर्ये पराक्रमे च प्रबलान्, वैरि निर्दलने निपुणान्, आत्म-रक्षणे च समर्थान् द्रष्टुं समीहते। सम्प्रति स्वर्गादपि गरीयस्या वन्दनीयाया निजभारतमातुः प्रतिष्ठा-रक्षायै नहि दिवानिशं विलासमग्नानां प्रसाधन-

परायणाना सुकुमारशरीराणा युवकाना प्रयोजन वर्तते अपि तु जितेन्द्रियाणा विलासविमुखाना बलिष्ठकलेवराणा विशालवक्षसा बलवता युवकाना वर्तते। अतो विद्यालयेषु पठत्सु, ग्रामेषु वा गृहकर्म कुर्वत्सु, सर्वेष्वपि युवकेषु बल-वर्द्धनाय स्थले स्थले प्रतिपाठशाल च विशेषरूपेण व्यायामशालाना सञ्चालनाय समुद्योगो विधेय सर्वै च नागरिका ग्रामीणा वा युवानो व्यायाम करणार्थं प्रेरणीया'।

एवमेव विभिन्नप्रकाराणाम् आसनानाम् अभ्यासेन प्राणायामेन च शारीरिकी शक्ति' वर्द्धनीया। विशेषतो ये जना' शिक्षिता विद्वाषो वा सन्ति ते व्यायामशालाया गत्वा व्यायामकरणे लज्जन्ते। तेषा कृते *अयमेव प्रकारो विशेषरूपेण उपकारको भवति। अन्ये च सूर्यनमस्कारादयो ये ये अनेके नवीनाः प्रकारा आविष्कृताः सन्ति व्यायामविद्याविशारदैः* तेषामपि यथासम्भवम् उपयोगो विधेय। इत्थमेव खेलनेन कूर्दनेन धावनेन उच्छलनादिभा चापि अङ्ग प्रत्यङ्गानि बलवन्ति स्फूर्तिमन्ति च भवन्ति। एतदर्थं प्रत्येक ग्रामे नगरे च स्वच्छ सुमनोहर विशाल समतल च क्रीडाया. प्राङ्गणम् अपेक्ष्यते। अत्रैव प्रतिदिन सायङ्काले तत्रत्या. सर्वेऽपि बालका युवानश्च समागत्य केचन कन्दुकेन केचन पादकन्दुकेन अपरे गुलिका-दण्डाभ्या कतिपये चीटया च खेलन कुर्युः। केचन हनुमत्कूर्दनम् अङ्गदकूर्दन गजग्राहञ्च विदधीरन्। अन्याश्च प्राचीना नवीना वा बलवर्द्धिकाः क्रीडा कुर्युः। लघवश्च बालकाः तत्रैव पृथक् स्थाने स्वबलानुसार क्रीडन कूर्दन धावन प्रयतनम् उत्पतनञ्च कुर्युः। सर्वत्रैव ईदृशी व्यवस्था विधेया।

पुरुषसमाजे इव महिलासमाजे अपि बलवर्द्धनस्य आवश्यकता वर्तते। यद्यपि ग्रामीणाः, तथापि साधारण-गृहस्थानां स्त्रिय प्रायशो गृहकार्यकरणेन पात्रमार्जनेन कुट्टनेन पेषणेन प्रस्फोटनेन इतस्ततो गमनाऽगमनाभ्या धावनेन च बलवत्य स्फूर्तिमत्यश्च भवन्ति परं धनिकाना स्त्रियस्तु नित्यकर्माणि विहाय सकलमपि समय शयने उपवेशने

एव वा यापयन्ति । अतस्ता नितान्तमेव सुकुमारशरीरा भवन्ति । अथच या इदानीं कन्या पित्रालयेषु अध्ययन कुर्वते ता अपि बाहुल्येन विलास-परायणा भवन्ति सौकुमार्यं एव च आत्मनो गौरव मन्यन्ते । परन्तु सम्प्रति दुराचारमये समये एतादृशीना महिलाना मर्यादा-रक्षण नितान्तम् असम्भव वर्तते । अतः सम्प्रति सौकुमार्यमिय ताम् अपनीय स्त्रियोऽपि तथा शारीरिक शक्ति-सम्पन्ना भवेयुः यया न कोऽपि तासा धर्षणम् अपहरण बलात्कार वा कर्तु शक्नुयात् । यदि च कुर्यात् तदा तत्कालमेव ताडितो मारितश्च यमसदन नीयेत । अतो धनिकै. जनैः तथा स्त्रियो शिक्षणीया येन ता अपि गृहकार्यकरणे निःसङ्कोच प्रवृत्ता भवेयुः । कन्यापाठशालासु च सञ्चालक महाशयैः काचन ईदृशी योजना विधेया यथा बालिका अपि स्वस्था बलिष्ठ कलेवराश्च भवेयु' । अस्मिन् विषये बडोदाराय कन्यामहाविद्यालयादीनाम् अनुकरण कर्तव्यम् ।

एव प्रकारेण समाजस्य विभागद्वयेऽपि विद्याप्रचारेण सहैव यदा बल-वर्द्धनस्यापि कृते प्रचारो यत्नश्च भविष्यति, सर्वे च बालका,बालिका, नरा नार्यश्च विद्यया बलेन च ममैव सुसम्पन्ना' भविष्यन्ति तदैव आत्मन' समाजस्य राष्ट्रस्य वा कल्याण भविता ।

देश-भ्रमणम् ।

ज्ञानोपार्जनस्य यानि अनेकानि साधनानि सन्ति तेषु देशभ्रमणम् अपि एक मुख्य साधन मन्यते । पुस्तकाना पठनात् यत् ज्ञान न जायते तत् देशभ्रमणात् भवति । पुस्तकेषु वय विविधदेशाना नानाविध-नद-नदीनां विभिन्नाना गिरि-पर्वताना च पाठे पठामः । परन्तु यावत् तेषा

वस्तूना ऐतिहासिकाना अनेकेषा दर्शनीयस्थलाना च साक्षात् निरीक्षण न भवति तावत् न तेषा यथार्थज्ञान जायते नाऽपि हृदयस्य परितोष एव भवति। इदानीं ससारे कतिपयवस्तूनि सर्वाधिकानि आश्चर्य- जनकानि मन्यन्ते। यथा—चीनदेशस्य भित्तिः, आगरानगरस्य ताजमहलनामक भवनमित्यादि। एतेषा परिचय वय पुस्तकेषु पठाम चित्राणि च अव-लोकयाम.। पर तेषा समीपे गत्वा सम्यक् अवलोकनेन यथा वास्तविक ज्ञान सन्तोषश्च भविष्यति न तथा पुस्तकशतानामपि अध्ययनेन भवितु-महंति। अतो देशभ्रमण प्रशसन्ति कुशलाः।

अन्यच्च देशभ्रमणात् कूपमण्डूकता नश्यति, बुद्धेश्च विकासो जायते। ये जनाः प्रायेण एकस्मिन् स्थाने निवसन्ति, न कदाचित् इतस्ततो गृहात् ग्रामाद्वा बहिः निर्गच्छन्ति ते कूपमण्डूक सदृशाः सङ्कुचितबुद्धयो भवन्ति। ये मण्डूका' सदैव कूपेषु निवसन्ति न कदाचित् बहि' सर सरादिषु गच्छन्ति ते कूपमेव बहु मन्यन्ते। तमेव सर्वतोऽधिक विशाल गभीरञ्च अवगच्छन्ति। इद न जानन्ति यत् कूपादपि विशाला जलाशया' सन्ति इति। तथैव ये जना बहिः विभिन्नस्थानेषु भ्रमण न कुर्वन्ति तेषामपि कूपमण्डूकस्य इव शङ्कुचिता बुद्धिर्भवति। पर ते एव यदा बहिर्गच्छन्ति, विविधदेशेषु भ्रमन्ति, नानाविधानि नगराणि अवलोकयन्ति, विविधै पुरुषैः सह वार्तालाप कुर्वन्ति, अत्यद्भुतानि वस्तूनि साक्षात्कुर्वन्ति, भिन्न भिन्नान् आचारान्, भिन्नभिन्नान् व्यवहारान्, नानाविधा वेषभूषा, विचित्रविचित्राणि रूपाणि, विविधा भाषा', अदृष्टानि अश्रुतानि अकल्पितानि च जीवनस्तूना स्वरूपाणि निरीक्षन्ते तदा तेषा मोहो विनश्यति, कूपमण्डूकता पलायते, क्षुद्रता अपयाति, बुद्धिश्च महान्त विकास प्राप्नोति, महायाश्च अनुभवो जायते। अतो यथासम्भव यथाशक्ति यथासमयञ्च सर्वैरेव देशाभ्रमण कर्तव्यम्।

भ्रमणेनैव अस्माक पवित्राणा तीर्थानामपि दर्शन भवति। तया च दर्शनेन धर्मे बुद्धिर्जायते, अधर्मबुद्धि' नश्यति, मनसि पवित्रता दृश्यते,

साधनानि सन्ति । पर तस्य स्वास्थ्य समीचीन नास्ति । अस्वस्थो वर्तते । रोगशय्याया पतितोऽस्ति । तदा किं स उपरि लिखितेभ्य साधनेभ्य सुख भोक्तु क्षमते ? नैव, कदापि नैव । न स भोक्तु शक्नोति । न च दधिदुग्धादिकमेव सेवितु प्रभवति । घृतस्य तु स्पर्शोऽपि तस्मै हानिकरः । न च स यानेषु आरुह्य विहारमेव कर्तु पारयति न च सेवका एव तस्य यथावत् सेवा कर्तुमर्हन्ति । अत अस्वस्थ पुरुष स्वय तु किमपि सुखसाधनम् उपार्जितु प्रभवत्येव नहि अपितु पूर्वोपार्जितेभ्योऽपि साधनेभ्यो वञ्चितोऽस्तिष्ठति । अत अन्यधनाऽपेक्षया अस्यैव धनस्य उपार्जन सरक्षणञ्च परमावश्यक वर्तते इति सिद्ध भवति । अतएव च कथ स्वास्थ्यस्य हानिर्जायते कथञ्च तस्य रक्षा कर्तु शक्यते इत्यस्यैव विषयस्य उपरि सर्वप्रथम ध्यानदानाय उपदिशन्ति आयुर्वेदाचार्या । महाकविः कालिदासोऽपि कुमारसम्भवे एकत्र कथयति—

शरीरमाद्य खलु धर्मसाधनम्, इति ।

यदि मातरि पितरि कश्चिद् दोषो रोगो वा न भवति तर्हि प्रकृत्यैव स्वस्था जना उत्पद्यन्ते । परन्तु विपरीतेन आहारविहारादिना जनाः स्वस्थमपि शरीर स्वयमेव अस्वस्थ कुर्वन्ति । शयनस्य जागरणस्य, भोजनस्य पानस्य, उत्थानस्य उपवेशनस्य, भ्रमणस्य विश्रामस्य च नियमानां प्रायेण नरा उल्लघनं कुर्वन्ति अतस्तेषा स्वास्थ्य विनष्ट भवति । कदा शयितव्यम् कदा जागरितव्यम्, किं भोक्तव्यं किं न भोक्तव्यम्, किं पातव्यम् किं न पातव्यम्, कस्याम् ऋतौ कीदृशा आहार-विहारा हितकरा भवन्ति कीदृशाश्च अहितकरा इत्यादीना ते विचार न कुर्वन्ति । उपदिश्यमाना अपि ध्यान न ददते । यथेच्छ शेरते यथेच्छ च जाग्रति, यथाकाम च भुञ्जते पिबन्ति च । विपरीत वा सर्वमपि कार्यमनुतिष्ठन्ति । अस्मादेव कारणात् अस्माक देशस्य बहवो जना. अल्पीयसि एव वयसि स्वास्थ्यहीना जायन्ते भारभूत निरर्थक च जीवन यापयन्ति ।

विशेषतो विद्यार्थिभिः नवयुवकैश्च स्वास्थ्यरक्षाया उपरि पूर्णरूपेण ध्यान दातव्यम्। स्वास्थ्य-नियमानुसारमेव सदा वर्तितव्यम्। ब्राह्मे एव मुहूर्ते अहरहो[1] जागरितव्यम् रात्रौ च यथासमयमेव शयन कर्तव्यम्। देश-कालौ विचार्यैव आहार विहारादीना व्यवस्था विधेया। शरीरस्य वस्त्राणां स्थानस्य च स्वच्छतायां सदा सावधानतया स्थातव्यम्। प्रति-दिनञ्च व्यायाम: कर्तव्यः। नहि मलिने रोगदूषिते च स्थाने कदापि गन्तव्यम्। न चापि ईदृशैः पुरुषैः सह सङ्गो विधेयः। सायं प्रातश्च यथासम्भवं प्रतिदिवस स्वच्छ-वायु सेवन कर्तव्यम्। न च काचित् मनसि दीर्घचिन्ता करणीया। प्रसन्नहृदयेन च सर्वदा भवितव्यम्। नहि अनिष्टा वार्ता चेतसि चिन्तनीया। नापि निन्दिते पथि पादौ धारणीयौ। न च कस्मिंश्चित् अणीयसि[2] अपि रोगे समुत्पन्ने तत: प्रमदितव्यम्। त्वरितमेव च तस्य प्रतीकाराय प्रयतितव्यम्। एवविधै: अन्यैश्चैश्च आयुर्वेदोपदिष्टै: नियमै: यदा वयं स्वकीय स्वास्थ्य रक्षिष्यामः तदैव सर्वमपि कार्यं साधयितु सुखं च समासादयितु समर्था भविष्यामो नाऽन्यथा। अत एव आचार्यवर्या: प्राहु:—

"धर्मार्थकाममोक्षाणाम् आरोग्य मूलमुत्तमम्" इति।

स्वच्छता।

स्वास्थ्य रक्षायै ये ये उपाया निर्दिष्टा: सन्ति तेषु स्वच्छता अपि एक: परमावश्यक: उपायो वर्तते। पूर्णरूपेण स्वस्थोऽपि मानवो यदि

१—प्रतिदिन। २—बहुत छोटा।

स्वच्छतायां उपरि ध्यानं न दत्वा मलिनानि वस्त्राणि परिधत्ते,[1] मलिनायां शय्यायां शेते, मलिने गृहे निवसति, स्वकीयं शरीरं च मलिनं रक्षति तर्हि तस्यापि स्वास्थ्यं नश्यति। का पुनः वार्ता आत्मस्थानां साधारणस्थानां वा जनानाम्? अतः स्वैरेव जनैः देहस्य वस्त्राणां वासस्थानस्य पार्श्वभूमेः शय्यादीनाञ्च स्वच्छतायां उपरि पूर्णतया ध्यानं देयम्। एषु वस्तुषु सम्यक् स्वच्छेषु साधु परिष्कृतेषु च रोगाणां नाशः, वायोः शुद्धिः, चक्षुषोराह्लादः, मनसः प्रसन्नता, आरोग्य-वृद्धिश्चेति अनेके लाभा भवन्ति।

परन्तु इदं जानन्तोऽपि जना बहुधा दुरभ्यासेन आलस्येन च स्वच्छतायां उपरि विशेषं ध्यानं न ददते। बहूनां जन्मकालत एव मलिन-वस्त्रधारणस्य, मलिने स्थाने निवासस्य, सप्ताहे एकवारं स्नानस्य, मलि-नातिमलिनायां शय्यायां शयनस्य च अभ्यासो वर्तते। तादृशे एव परिवारे तेषां जन्म अभूत्। अतो जन्मकालीनो दुरभ्यासस्तेषां झटिति न दूरीभवति। यथा कर्दमस्य[2] कीटाः कर्दमे एव सुखमनुभवन्ति तथैव मालिन्ये एव तेषां मनो रमते। नहि ते स्वच्छतायै विशेषपरिश्रमं कर्तुमीहन्ते। अपरे च केचन आलस्यवशादेव स्वच्छतायै प्रयत्नशीला न भवन्ति। ते मनसा स्वच्छतां रोचयन्तोऽपि[3] आलस्यवशंवदाः[4] तदर्थं प्रयत्नं न कुर्वन्ति, मालिन्यमये एव च धातावरणे जीवनं यापयन्ति। ईदृशा जनाः स्वकीयं स्वास्थ्यं नाशयन्ति परेषां पार्श्ववर्तिनामपि स्वास्थ्य-हानेः कारणीभूता भवन्ति, परम्परया समाजस्य च। ईदृशा अपि जना यथा मलिनतामप्रियताम् अपनीय स्वच्छतासम्पादने दत्तावधाना भवेयुः तथा अस्माभिः प्रयतनीयम्।

स्वच्छतायाः अभावो मलिनतायाः सत्ता[5] च अनेकप्रकारेण

१—पहनता है। २—कीचड़ का। ३—पसन्द करते हुए भी। ४—रहना, बने रहना।

अस्माकम् अपकार करोति। देहे वस्त्रे वासस्थाने वा यत्र यत्र मालिन्यं भवति तत्र तत्र रोगाणां बीजाणवः उत्पद्यन्ते। ते च बीजाणवः अस्माकं शरीरेषु आक्रमणं कुर्वन्ति। आक्रम्य च नानाविधान् रोगान् उत्पादयन्ति। तेन च वयम् अकाले एव काल-कवलिता भवाम।

अन्यच्च, न केवलम् इयम् अस्वच्छतापिशाचिनी देहस्यैव स्वास्थ्यहानिं करोति अपितु मनसोऽपि। देहेन सह मनसो घनिष्ठः सम्बन्धो वर्तते। यदा शरीरं स्वच्छं पवित्रं सुपरिष्कृतञ्च तिष्ठति तदैव मनोऽपि सुस्थं सुप्रसन्नं च जायते। प्रसन्नेनैव मनसा सर्वाणि कार्याणि सुचारुरूपेण कर्तुं शक्यन्ते। यदा च देहादिकं मलिनं भवति तदा मनसि अपि प्रसन्नता न समुदेति न च किमपि कार्यं सम्यक्तरत्वेन सम्पद्यते। एतदतिरिक्तम्-मलिनवाससां[५] मलिनदेहानां च जनानां समीपे न केचन गन्तुमिच्छन्ति, न तैः सह उपवेष्टुमीहन्ते[६] नापि वार्तालापमेव कर्तुमभिलषन्ति। न केवलं परकीयाः प्रत्युत स्वकीया अपि च धुवान्धवाः तैः सह उपवेशने भोजनपानादौ च महतीं घृणां प्रकटीकुर्वन्ति।

इमानि खलु मलिनतायाः दूषणानि सन्ति। अतो देहस्य, वेषभूषायाः, वासभूमेः, शय्यायाः, अन्येषां च पार्श्ववर्तिनां वस्तूनां स्वच्छतायै परिष्काराय च प्रत्येक पुरुषेण यथासम्भवं पूर्णयत्नो विधेयः। प्रतिदिनं शौचं, दन्तधावनं, हस्तपादादि प्रक्षालनम्, स्नानं, वस्त्रपरिष्कारः, केशप्रसाधनम्, गृहमार्जनम् समये समये केशकर्तनं नखकृन्तनञ्च सम्यक् प्रकारेण कर्तव्यम्। एतेन स्वास्थ्य-रक्षणे साहाय्यं मिलिष्यति, सहैव सर्वत्र अग्रतिहतः प्रवेशः, सभ्यसमाजे समादरः, भद्रपुरुषेषु गणना च भविष्यति।

इयं बाह्य स्वच्छतायाः वार्ता अभूत्। परं न केवलं बाह्य स्वच्छतया एव कश्चित् स्वस्थो भवितुमर्हति नापि सभ्यसमाजे समादरमेव लब्धुं शक्नोति। अतः एतदर्थम् आभ्यन्तरशुद्धेरपि महती आवश्यकता वर्तते।

५—गन्दा कपड़ा पहनने वालों का। ६—बैठना चाहते हैं।

यदि आभ्यन्तरे पवित्रता नास्ति, भाव शुद्धिः नास्ति, मनसि विकृता एव भावा विद्यन्ते, हृदय दूषित वर्तते तर्हि बाह्य परिष्कारस्य किञ्चित् मूल्य नास्ति । तत् खलु आडम्बरमात्र भवति, वञ्चनाया वा साधनम् ।

अस्मत्-समाजे अनेके एवविधा एव पुरुषाः सन्ति । ते प्रतिदिनं स्वय-मेव श्मश्रूणि[७] मुण्डयन्ति । दिने वारत्रय स्नानं कुर्वन्ति । अहरहः वस्त्र प्रक्षालयन्ति । अनेके साधनै शरीर मार्जयन्ति[८]। यदा यदा बहिर्गच्छन्ति तदा तदा कङ्कतिकाभि[९] केशान् प्रसाधयन्ति । अतिशुभ्राणि वसनानि धारयन्ति । उपानहौ सतत प्रोञ्छनादिना निर्मले रक्षन्ति । वासस्थान च सेवा सर्वथा सुमार्जित सुपरिष्कृत नानाविधैश्च रमणीयैर्वस्तुभि सुसज्जित तिष्ठति । एव ते बाह्यपरिष्कारे आवश्यकतायाः अपि कदाचित् अधिक धन ददते । परन्तु आभ्यन्तरो भागस्तेषा महामलिनो भवति । न ते असत्यवदनात् विरमन्ते । न उत्कोचग्रहणात्[१०] सङ्कुचन्ति । न पर-प्रहारण[११] दूषण मन्यन्ते । न पर-दार-ससर्गात्[१२] लज्जन्ते । न कार्य-सिद्धये उचितमनुचित वा विचारयन्ति । पर किं वेषपरिष्कारेणैव एतादृशा जना सभ्यत्व प्राप्तुमर्हन्ति ? सामाजिक समादरस्य वा अधिकारिणो भवितु शक्नुवन्ति ? मनसि विविधान् दूषितान् विचारान् बिभ्रतः[१३] आत्मान सर्वथा स्वस्थ रक्षितु क्षमन्ते ? समाजस्य कृते च ते आदर्शपुरुषा वक्तु शक्नुवन्ते ? नैव । एतदर्थम् उभयत्र[१४] परिष्कारस्य आवश्यकता वर्तते । यथा बहिः तथैव आभ्यन्तरेऽपि । अस्माक शास्त्रेषु तु बाह्यशुद्धेः अपेक्षया आभ्यन्तरशुद्धेः एव अधिक महत्त्व वर्णित वर्तते । पर सम्प्रति तद्विपरीतमेव आचरण दृश्यते । इदानीं बाह्य-वेषभूषादि-परिष्कार एव सभ्यतायाः परिचायकः मन्यते । आभ्यन्तर

७—दाढी । ८—साफ करते हैं । ९—कङ्घियों से । १०—घूस लेने से । ११—दूसरे को ठगना । १२—दूसरे की स्त्री के सम्पर्क से । १३—धारण करते हुए । १४—दोनों जगह ।

यथा तथा वा अस्तु। पर नहि अनेन एकदेशिना परिष्कारेण व्यक्तेः समाजस्य वा लाभो भवितुमर्हति। अतः अस्माभिः उभयविधस्यापि परिष्कारस्य कृते प्रयतितव्यमिति।

समयस्य सदुपयोगः।

समयस्य सदुपयोगः मानव-जीवनस्य एक परम हितकारि कर्तव्यं वर्तते। यद्यपि सदुपयोगः सर्वेषामपि वस्तूना कर्तव्यः। नहि किमपि वस्तु दुरुपयोगाय भगवता निर्मितम्। क्षुद्रतमस्यापि कस्यचिद् वस्तुनो यदि कश्चिद् दुर्व्यवहार करोति तर्हि स, न तेन सह, अपि तु भगवता सह दुर्व्यवहार करोति। अतः सकलत्याग वाञ्छता पुरुषेण सर्वेषामेव पदार्थानां सदुपयोगः सदुपयवहारश्च विधेयः। पर तत्रापि समयस्य सदुपयोगाय विशेषरूपेण ध्यानदानम् आवश्यक भवति। इद तत्र कारणम्। समयो हि अन्यवस्तूनाम् अपेक्षया अधिक महत्त्वपूर्णम् अधिक च मूल्यवद् वस्तु वर्तते। अन्यानि वस्तूनि विनष्टानि पुनरपि लब्धु शक्यन्ते। पर समयो विनष्टो न केनापि उपायेन पुनः परावर्तयितु शक्यते। यस्य आयुषो यावान् अशो निरर्थक गत स गत एव। अतस्तया प्रतिक्षण पुरुषेण यथा एकस्यापि क्षणस्य दुरुपयोगो न भवेत्। अथ च सर्वऽपि समयः सम्यग् उपयुक्तः समुचितेन रूपेण च प्रतिनादितः[1] स्यात्।

दौर्भाग्यवशात् इद सर्व जानन्तः अपि प्रायेण समयस्य द्विधा दुरुपयोग जनाः कुर्वन्ति। व्यर्थ यापनेन[2] अनर्थकरणेन च। अनेके कार्यसम्पादने समर्थां अपि निरर्थक क्षण यापयन्ति। इतो भ्रमन्ति ततो भ्रमन्ति। अप्रयोजन गृहे गृहे आहिण्डन्ति। न ने स्वार्थ एव किञ्चित्

१—बिताया गया। २—बेमार बिताने में।

जीवनस्य उद्देश्य वर्तते। देव दुर्लभमिद मानव-शरीर लब्ध्वापि यो न धर्ममाचरति, न धनम् उपार्जयति, न विषयोपभोग कुरुते, न वा मुक्तये एव प्रयत्नमनुतिष्ठति स निरर्थकमेव जीवति। तस्य जीवनस्य नापि आवश्यकता वर्तते न च अधिकार एव। न च इय कर्मभूमिरेव एतादृशानां निष्क्रियाणा भार वोढुमिच्छति। वेदा अपि उपदिशन्ति—

"कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः"

[ईशोपनिषद्, २]

अर्थात् यो हि कर्माणि कर्तुमिच्छति तेनैव जीवितव्य नतु निष्क्रियेण। अतः सामर्थ्ये सति सत्वरेव शरीरधारिभिः सत्कार्य-सम्पादनैरेव समयो यापनीयः। न तु कदाचित् निरर्थक कालो नेयो न वा तस्य दुरुपयोग एव कर्तव्यः। अय हि समयस्य सदुपयोगो जीवन-सफलताया प्रथम सोपानम्, सर्वविध समुन्नते मूलमन्त्र, आत्म-निर्माणस्य च परम साधनम् अस्ति। अत एव अस्मिन् विषये सर्वेणापि सावधानतया वर्तितव्यम्।

प्रकृतिरपि कार्य-परायणतायां एव उपदेश ददाति। प्रकृतौ यावन्त पदार्था. सृष्टाः सन्ति ते सर्वेऽपि अहोरात्र कार्य-सलग्ना एव दृश्यन्ते। सूर्य चन्द्राभ्याम् आरभ्य कीट-पतङ्ग-पिपीलिका [12]पर्यन्तं सर्वेऽपि स्व स्व-व्यापारे व्याकुला[13] विलोक्यन्ते। अत' प्रकृत्या अपि इयमेव शिक्षा मिलति यत् नहि केनापि समयस्य अनुपयोगः कर्तव्य इति।

अन्यच्च। ये किमपि कार्य कर्तुं न वाञ्छन्ति परिश्रमाद्वा आत्मान् चोरयन्ति तेषा क्वचित् निर्वाहोऽपि दुर्लभ एव भवति। नहि ईदृशान् जनान् केऽपि रोचयन्ति[14]। न वा कश्चिद् आश्रयमेव दातुमिच्छति। स यत्रैव गच्छति तत एव बहिष्क्रियते सर्वत्र च तिरस्कृतो भवति। किमधिक, मातापितरौ अपि एतादृश तनय न अभिनन्दन्ति का पुनरन्येषा

१२—चींटी १३—सलग्न। १४—पसन्द करते हैं।

धनुधान्यवाना यासां। एतद्विपरीतम्—ये जनाः कदापि समयस्य दुरुपयोगं न कुर्वन्ति, सदैव कार्यसलग्नाः तिष्ठन्ति न च परिश्रमाद् आत्मानं गोपायन्ति[१५] तेषां शुचेनैव निर्वाहो भवति। ते यत्रैव गच्छन्ति तत्रैव सादरं स्वाग्यन्ते। गृहे बहिश्च सर्वत्रैव समानरूपेण अभिनन्द्यन्ते। सर्वे एव तेषां सहयोगमिच्छन्ति। ते च न केवलं स्वत्वेव प्रत्युत अन्येषामपि निर्वाहं कारयन्ति। ताहशा एव च कर्मवीरा जनाः समाजे सर्वत्र समादियन्ते श्रेष्ठपदं च लभन्ते।

अवलोकयन्तु तावत् महापुरुषाणां जीवनचरितानि। अद्यावधि ये ये महापुरुषा जगति जन्म गृहीतवन्तः, इदानीमपि ये यावन्तो महापुरुषा देशविदेशेषु विद्यमानाः सन्ति तेषां जीवनचरितस्य अध्ययनेन ज्ञायते यत् ते बाल्यकालादेव अहोरात्रं कर्मपरायणा आसन्, एकमपि क्षणं नहि निरर्थकं नीतवन्तः। कर्ममय पुरुषार्थमयम् उत्साहमयम् अध्यवसायमयञ्च तेषां जीवनम् आसीत्। "कार्यं वा साधयामि शरीरं वा पातयामि" इत्येव च तेषां लक्ष्यं बभूव। यदेव कार्यं ते आरेभिरे[१६] तस्यैव पूरणे सम्पूर्णमपि स्वकीयं समयं यापयामासुः[१७]। इदमेव कारणं यत्ते यत् तेषां अद्यापि गृहे गृहे गौरवगाथा गीयते आदर्शपुरुषाश्च ते मन्यन्ते।

विचारयन्तु। यदि भगवान् शङ्कराचार्यः अहोरात्रं परिश्रमं न अकरिष्यत्, समस्तेऽपि भारते दिग्विजयं न अभ्रमिष्यत्, स्थले स्थले विरोधिना सिद्धान्तं न अपसारयिष्यत्, तर्हि किं पुनः भारते वैदिकधर्मस्य प्रचारः अभविष्यत्? अथवा स्थग्यताम् इयं पुरातनी गाथा। नवीनम् उदाहरणं शृण्वताम्। अस्मिन् एव समये महर्षिदयानन्दः अन्ये वा भारतीया नेतारो यदि अहर्निशं न अयतिष्यन्त,[१८] महतो महत् कष्टं न असहिष्यन्त

१५—बचाते हैं, छिपाते हैं। १६—आरंभ किया। १७—बिताया। १८—प्रयत्न करते।

परिश्रमात् वा भयम् बधाश्यन्त [१९] तदा किं गौराङ्गा इतः अपलायिष्यन्त भारतीयाश्च स्वराज्यम् अलप्स्यन्त [२०]।

निरन्तर समय सदुपयोगस्य एव एतत् सर्वं फल वर्तते। अतः अस्माभिरपि आलस्य विहाय सर्वदैव समयस्य सदुपयोगः कर्तव्य न तु कदाचित् एक क्षणमपि वृथा यापनीयम् [२१]। यथोक्त प्राचीनाचार्यैः —

न कार्यकालमतिपातयेत्।

—चरकसंहिता

न कालमति वर्तन्ते महान्तः स्वेषु कर्मसु।

—योगवाशिष्ठ

एकता।

सासारिकजीवनस्य सम्यगरूपेण निर्वाहाय समाजे परस्परम् एकतायाः महती आवश्यकता भवति। गृहे परिवारे समाजे देशे वा यदि परस्परम् एकता न स्यात् तर्हि क्षणमात्रमपि जीवन सुखेन चलितु नार्हति। परिवारस्यैव उदाहरण गृह्यताम्। यदि कस्मिंश्चित् परिवारे सर्वे एव जना बलिनो बुद्धिमन्त कार्यक्षमाश्च सन्ति परं तेषु परस्परम् एकता नास्ति, ऐकमत्य नास्ति, सर्वेषामेव भिन्ना मतयो भिन्नाश्च विचाराः सन्ति, पदे पदे विवदन्ते, मुहुर्मुहुश्च कलहायन्ते, तदा ते कथमपि एकत्र सुखेन निवसितु न शक्नुवन्ति। एतदेव यस्य समाजस्य जातेः देशस्य वा पुरुषेषु ऐकमत्य न भवति तस्य उन्नति दूरे तिष्ठतु शीघ्रमेव विनाश सम्पद्यते। अत एव वेदाना मानवसमाज प्रति इयम् आज्ञा वर्तते यत्—

सगच्छध्व सवदध्व स वो मनासि जानताम्, इति।

[ऋग्वेद, १० १९१, २]

१९—करते। २०—पाते। २१—बिताना चाहिये।

एकता समाजस्य बलं वर्द्धयति, शत्रुभ्यो रक्षां करोति, प्रभावं विस्तारयति, विपदो निवारयति, सुखसाधनानि च समुत्पादयति। नहि पृथक् पृथक् अवस्थिताः व्यक्तयः किमपि कार्यं साधयितुं शक्नुवन्ति प्रत्युत परस्परं सम्मिलिता एव। सम्मिलितानि एव तृणानि रज्जुरूपं[1] धृत्वा गजमपि बध्नीयुं कर्तुं प्रभवन्ति। सम्मिलिताभिरेव इष्टिकाभिः[2] महतो महान्ति भवनानि निर्मीयन्ते। परस्परं सम्मिलितान्येव इन्धनानि[3] ज्वलन्ति कार्यं च साधयन्ति। अन्यथा तु धूमायन्ते एव। एवमेव परस्परं सम्मिलिता लघीयांसोऽपि जनाः सङ्घबलेन महान्ति अपि कार्याणि साधयितुं क्षमन्ते। असम्मिलितास्तु महान्तोऽपि वैमत्यवशात् न किमपि कर्तुं पारयन्ति। अतः अस्माभिरपि ऐकमत्यस्य सङ्घटनस्य च कृते स्वसमाजे पूर्णरूपेण प्रयासः कर्तव्यो येन अस्माकं सर्वाणि कार्याणि सिध्येयुः जगतीतले च गौरवं वर्द्धेत।

यद्यपि वेदेः प्राचीनकालादेव एकतायाः आवश्यकता अनुभूयते स्म। परन्तु अस्मिन् युगे तु तस्याः ततोऽपि विशेषरूपेण आवश्यकता वर्तते। पूर्वकाले तु समाजे एतादृशा इदृशा अपि असाधारण-शक्तिसम्पन्ना महापुरुषा बभूवुः ये एकाकिनोऽपि स्व-प्रभाव-बलात् महान्ति महान्ति कार्याणि साधयितुं क्षमन्ते स्म। परं साम्प्रतं तादृशाः पुरुषा न उपलभ्यन्ते[4]। इदानीं तु लघु महत् वा कार्यं ऐक्यबलेनैव सम्पादयितुं शक्यते। अत एव विशालदर्शिभिः अस्माकं महर्षिभिः शास्त्रेषु इयं भविष्यद्वाणी विहिता वर्तते यत्—

सङ्घे शक्तिः कलौ युगे, इति।

परस्परं ऐकमत्येन कियन्तो लाभा भवन्ति, अनैक्येन कियन्तो हानयः इत्यस्य अनेकानि उदाहरणानि संसारस्य इतिहासग्रन्थेषु अवलोकयन्तु। इदानीमपि यत्र सङ्घटनस्य असङ्घटनस्य च लाभालाभौ निरन्तरं परिदृश्येते एव। एतत्सर्वं विलोक्य न केनापि बुद्धिमता पुरुषेण

१-रस्सी का रूप। २-ईंटों से। ३-लकड़ियाँ ४—गाये जाते हैं।

एकतायाः महत्त्वम् अवलोकितुं शक्यते। अत एव सर्वेऽपि विभिन्न देशवासिनो मनुजाः स्व-स्व-देशे ऐक्य-स्थापनाय महान्त प्रयास कुर्वन्तो दृष्टिपथम् आयान्ति। पर महतो दुःखस्याऽय विषयो वर्तते यत् अस्माक देशे हिन्दुसमाजे वा एकताया यादृशी आवश्यकता वर्तते तादृशी नास्ति। धर्मे समाजे राजनीतौ वा सर्वत्रैव मतभेदस्य साम्राज्य वर्तते। धार्मिके जगति शताधिकाः सम्प्रदायाः सन्ति। तेषाम् आचार्याः, ग्रन्थाः, विचाराः, व्यवहारा, वेषा, रीतयो, नीतय, श्रुतय, प्रमाणाश्च सर्वेऽपि परस्पर विलक्षणा सन्ति। परस्परम् ऐकमत्यमपि नास्ति। सामाजिके ऽपि क्षेत्रे परस्परविरोधिनो विचारा सर्वदैव सभा सम्मेलनादिषु पत्र पत्रिकादिषु वा सर्वेषा दृष्टिगोचरा भवन्ति एव। राजनीतिर्हं मतभेदम् आदाय देशस्य रिक्तस्थ. संस्था प्रतिक्षण परस्पर कलहायमाना सघर्ष-प्रसारणश्च मन्तीति देशकालविदाम् अविदितं नास्ति। मुण्डे-मुण्डे विभिन्ना मतय सन्ति। अन्यविषयाणा वार्ता त्यज्यताम्। भोजन विषये एव अस्माक समाजे अनेके परस्परविरुद्धा विचाराः प्रतिदिनं प्रवर्त्तीभवन्ति। केचन स्वकृतमेव भोजनम् उचितं मन्यन्ते, केचन परकृतमपि। केचन स्वसम्बन्धिनामेव गृहे ओदनादिकं भक्षयन्ति नाऽन्यस्य। केचन अन्यथा कुर्वन्ति परं स्वजातेरेव, नाऽन्यजातेः। केचन घृतरञ्जितस्य अन्नस्य सर्वत्रैव भोजनं समर्थयन्ति। अन्ये तत्र इद सशोधनम् उपस्थापयन्ति यत् शष्कुली तु अशनीया[५] परं शाकं लवणवर्जितमेव खादेत्। केचन धार्मिकम्मन्या जनास्तु शष्कुलीं अपि यदि अलवणं रहिता भवेत् तदैव खादेत इति सिद्धान्तयन्ति। केचन दूरादपि आनीत भोजनं भोक्तुमर्हन्ति परं पाकालये एव स्थित्वा भोक्तु शक्नुवन्ति न अन्यत्र। केचन यस्य परिवेषाऽपि भोजने दोषं न मन्यन्ते। अपरे तु तथा कर्तुं महतीं घृणां प्रकटीकुर्वन्ति। केचन धूमशकटेषु[६] दिने वारत्रय भुञ्जते। केचन पक्वान्नमेव खादन्ति न तु अन्नम्। केचन च निराहारा एव तिष्ठन्ति। निदर्शन-

---

५—खानी चाहिये। ६—रेलगाड़ियों में।

मेतत्। एवमेव अनेके भिन्न भिन्ना विचाराः सन्ति। तेषा सर्वेषां यदि गणना क्रियेत तर्हि एक स्थूलाकार पुस्तकमेव निर्मितं स्यात्।

एतादृश विचार वैषम्यातिरिक्तम् ईर्ष्याद्वेष-वशात् गृहे गृहे, प्रतिवेशे प्रतिवेशे, ग्रामे ग्रामे च यत् परस्पर वैमत्यम्, अनैक्यम्, असंघटनम्, विरोधो, वैरम्, अविश्वासश्च वर्तते तत्सर्वं तु पृथगेव वर्तते। ग्रामे ग्रामे दलबन्ध-परम्परा चलति। अतो न सर्वे ग्रामीणाः क्वचित् एकत्र स्नेहात् सम्मिलिता भवन्ति, न कस्मिंश्चित् विषये ऐकमत्यं भजन्ते, न च एकमुखेन सर्वेषां हिताय किमपि कार्यं कर्तुं प्रभवन्ति। इदमेव कारण वर्तते यद् वयं बहवो भूत्वाऽपि न किमपि कर्तुं पारयामः।

यद्यपि त्रिगुणात्मकोऽयं संसारः। विभिन्नाश्च रुचयो मानवानाम्। यत् एकस्मै रोचते तदेव अन्यस्मै अपि रोचताम्" इति सर्वथा स्वभावविपरीता वार्ता वर्तते। अतः सर्वेषु विषयेषु सर्वथा ऐकमत्य तु दुर्लभमेव। पर ये ये विषयाः समाजस्य जातेः देशस्य वा हितकारका उन्नायका वर्द्धकाश्च सन्ति तेषु एकता तु अवश्यमेव अपेक्ष्यते। अथ च ग्रामेषु मिथ्याऽभिमानेन, पक्षपातेन, ईर्ष्याद्वेषाभ्या, मूर्खतया वा ये विरोधिनो भावा प्रचलन्ति तेषा विनाशः तत्स्थाने च परस्परम् एकतायाः सहयोगस्य सहकारितायाः स्नेहस्य च प्रसारः परमावश्यको वर्तते। एकताया अभावः कियतीं हानिं समाजस्य करोति इति विषये महाभारतस्य द्वौ श्लोकौ कदापि न विस्मरणीयौ—

न वै भिन्ना[८] जातु चरन्ति धर्मं न वै सुखं प्राप्नुवन्तीह भिन्नाः।
न वै भिन्ना गौरवं प्राप्नुवन्ति न वै भिन्ना. प्रशमं रोचयन्ति।
न वै तेषा रुचते[९] पथ्यमुक्तं योगक्षेमं कल्पते नैव तेषाम्,
भिन्नाना वै मनुजेन्द्र परायणं[१०] न विद्यते किञ्चिदन्यद् विनाशात्।
[उद्योग, ३६, ५६-५७]

८—अच्छा लगे। ९—अलग अलग रहने वाले, फूट वाले।
९—अच्छा लगता है। १०—परिणाम, अन्तिम गति।

अतस्तथा अस्माभिः प्रयत्नः कर्तव्यो यथा मतभेदो निरस्येत् सर्वत्र च एकतायाः प्रचारो वृद्धिश्च जायेत यस्याः मूलदायां छायायां सर्वेऽपि सुखशान्तिपूर्वकं निवसितुं सर्वविधम् अभ्युदयञ्च कर्तुं पारयेयुः ।

कर्तव्य-पालनम् ।

यस्य यत् नियतं कर्म यत्र तस्य समुचितरूपेण सम्पादनमेव कर्तव्य-पालनं कथ्यते । इह जगतीतले कर्मक्षेत्रमस्ति । अत्र यावन्तो[1] जनाः सृष्टाः सन्ति ते कर्मकरणायैव सृष्टा. सन्ति । अत्र यो मनुष्ययोनौ जन्म गृहीत्वा स्वस्थशरीरः अविकलेन्द्रियश्च भूत्वा निष्क्रियः स्वकर्तव्यपराङ्मुखश्च तिष्ठति तस्य कृते जीवनस्य[2] अधिकारो नास्ति । अत एव ईशोपनिषदि अयम् आदेशो वर्तते—

कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः ।

अर्थात् यः कोपि नरो नारी वा स्वस्वकर्तव्यानां सम्यक्रूपेण पालनं करोति स एव अस्यां कर्मभूमौ जीवितुमिच्छेत् न तु निष्क्रियः । अतः स्वहिताय समाजहिताय च सर्वेषां कृते स्वस्वकर्तव्यानां पालनं नितरां आवश्यकं वर्तते ।

कर्तव्यपालनं हि मनुष्यमात्रस्य परमो धर्मः अस्ति । यः खलु आत्मनः कर्तव्यं न जानाति न च तस्य पालनं करोति तस्य जीवनं न केवलं निरर्थकं प्रत्युत हानिकारकमपि । कर्तव्य-पालनेनैव जना आत्मनः समाजस्य च हितसाधनं कर्तुं शक्नुवन्ति । सर्वेषामपि समुन्नतेनां सिद्धीनां च मूलकारणं कर्तव्यपालनमेव भवति । विविधा विघ्नबाधाः सहमाना अपि ये जनाः स्वकर्तव्यपालनान् न विरमन्ते, "कार्यं वा साधयामि शरीरं वा पातयामि" इति वेगा प्रतिज्ञा भवति ते एव वीरपुरुषा

१—जितने । २—जीने का ।

जगति माननीया भवन्ति महत्त्वं च प्राप्नुवन्ति। अत एव जगतो महान् कर्मयोगी भगवान श्रीकृष्णो गीतायाम् उपदिशति—

स्वे स्वे कर्मण्यभिरतः ससिद्धिं लभते नरः।

वस्तुत कर्तव्यपालनस्यैव शिक्षायै भगवता भगवद्गीताया उपदेशो विहित.। गीताया आरम्भिकी कथा स्मर्यताम्[३]। उभयोरपि पक्षयो. सेना सुसज्जिता वर्तते। पदातय' अश्वारोहिणो गजारोहिणो रथिनो महारथिनश्च सर्वे योद्धारो युद्धक्षेत्रे अस्त्रशस्त्रादिसमन्विता परस्पराभिमुखम् उपस्थिता सन्ति। युद्धवाद्यानि[४] वाद्यन्ते। सर्वे एव सेनापतय' स्वस्वशङ्खान् आध्मायमानाः[५] सङ्ग्रामारम्भस्य घोषणा कुर्वाणाः सन्ति। द्रुतमेव समरारम्भो भविता[६] अस्ति। एतादृशे अवसरे महाधनुर्धरस्य अर्जुनस्य हृदये व्यामोहो भवति। स कातरो भूत्वा अस्त्रशस्त्रादिक नीचैर्निधाय[७] भगवन्त प्रार्थयते। "भगवन्"! नाहं युद्धं करिष्यामि। अत्र ये ये योद्धार. उपस्थिता सन्ति तेषु ममैव गुरव, आचार्या पितामहा, पितृव्या,[८] भ्रातर', भ्रातृष्पुत्रा',[९] दायादा, श्यालाः, श्वशुराः, सम्बन्धिन. सुहृदश्च नयनयोरग्रे दृश्यन्ते। इमे एव मम पूजनीयाः माननीया., रक्षणीया, पालनीयाश्च। तत् किं तेषामेव शरीरेषु अहं शस्त्रप्रहार करोमि? इमानेव हत्वा राज्य करोमि? अलम् एतादृशेन राज्येन। येषामेव सुखाय राज्य भवति ते एव यदि म्रियन्ते तर्हि मम एकाकिनो राज्यभोगेन किम्? इत्युक्त्वा अस्त्रशस्त्रादिक त्यक्त्वा[१०] युद्धक्षेत्रे एव अर्जुनो विषण्णमानस तूष्णीं[११] तस्थौ।

अर्जुन स्वबुध्यनुसार बहून् अज्ञानादान्[१२] उवाच परं तस्य इद कार्य सर्वथा असामयिकम् अधार्मिकम् अयौक्तिकम् अविचारितम् अमान्यम् अनार्यजनोचित च आसीत्। अर्जुन क्षत्रियकुलप्रसूत[१३] आसीत्। क्षत्र-

---

३—याद कीजिये। ४—युद्ध के बाजे। ५—फूँकते हुए। ६—होने वाला। ७—रखकर। ८—चचा। ९—भतीजे। १०—रखकर ११—चुप। १२—बुद्धिमानी की बातें। १३—उत्पन्न।

कथनादिना अपहृत स्वकीय राज्य पुनरपि धर्मयुद्धद्वारा परावर्तयितुं[14] विहितसकल्पो युद्धक्षेत्रे समुपागत आसीत्। तस्मिन् समये तस्य युद्ध करणमेव कर्तव्यमासीत्। पर स स्वकर्तव्यपालनात् पराङ्मुखो यभूव। क्लान्तियाभूत्वा अन्तरियाचिता कातरता कर्तुमारेभे। अतो भगवान् श्रीकृष्ण तस्मै कर्तव्यपालनस्य उपदेश दत्वा रणाय समुद्यत[15] चकार। अत एव भगवद्गीता कर्मयोगशास्त्रमुच्यते।

लोकव्यवस्थायै कर्तव्यपालनस्य महती आवश्यकता वर्तते। यदि जना स्वस्वकार्यात्रि न कुर्युस्तर्हि लोकयात्रायां महती दुर्व्यवस्था समुत्पद्येत। धार्मिक पारिवारिकं सामाजिकं वा जीवनं सर्वथा असमञ्जस मष्टविनाशान्मुखं च सम्पद्येत। यदि सर्वे स्वकर्तव्यपालनं न विधायेरन् तर्हि क्षणमात्र सामाजिको व्यवहार चलितु न शक्नुयात्। कल्पना विधीयताम्। यदि शासका प्रजा न पालयेयु प्रजाश्च शासकान् न मानयेयु, पितरौ पुत्रान् न पालयेयु पुत्राश्च पितरौ न सेवेरन्, गुरव शिष्यान् न अध्यापयेयु शिष्याश्च गुरुजनाना शुश्रूषा न कुर्युः, यदि स्वामिना भृत्यान् न भरेयु[16] भृत्याश्च स्वामिना हित न साधयेयु, तदा एकदिनमपि कस्यापि निर्वाहो भवितुमर्हति? एवमेव यदि कुम्भकार पात्राणि न रचयेत्, रजका[17] वस्त्राणि न प्रक्षालयेत्, नापित[18] केशान् न कर्तयेत्, सुवर्णकारो[19] भूषणानि न घटयेत्, बढकि[20] काष्ठानि न भिन्द्यात्, लोहकारो[21] लौहकार्यं न कुर्यात्, कृषको भूमिं न कर्षेत्, भारवाहो भार न वहेत्, सैनिक सेवां न विदध्यात्, सारथिश्च शकटं न चालयेत् तर्हि सकलोऽपि लौकिको व्यवहार छिन्नभिन्न अव्यवस्थितश्च भविष्यति। कर्तव्यपालनस्यैव आदर्शं कर्तुं उपदेशायैव भगवानपि अवतार धृत्वा

१४—लौटाने के लिए। १५—तैयार। १६—भरण कर। १७—धोबी। १८—नाई। १९—सोनार। २०—बढ़ई। २१—लोहार।

विविधानि कार्याणि कुरुते। अत एव भगवता श्रीकृष्णेन गीतायां प्रतिपादितं यत्—

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्।

कर्तव्यपालनस्य च अर्थं येन केनापि प्रकारेण कर्मकरणं नास्ति। यदा श्रद्धया भक्त्या सावधानतया कर्तव्यबुद्धया च कार्यं क्रियते तदैव तत् कर्तव्यपालनं कथ्यते। यदि कश्चित् पाचको रसवतीं[२१] करोति परं मनो लगयित्वा न करोति। अप्रक्षालितमेव तण्डुलं स्थाल्या[२२] निक्षिपति। अपरिपक्वमेव अवतारयति। द्विदले हरिद्राधिक्यं कुरुते शाके च लवणं न्यूनम्। परिवेषणं[२३] च सम्यक् न करोति। अर्थात् समाचीनान्यपि वस्तूनि दूषयित्वा पुरः स्थापयति तर्हि तत् कर्तव्यपालनं नाऽभूत्। तत्तु यथाकथञ्चित् कर्तव्यटालनं अभूत्। एवमेव बहवो भयेन लोभेन वा कर्तव्यपालनात् च्युता भवन्ति। केचन असावधानतया एव स्वकर्तव्यं सम्यक् पालयितुं न प्रभवन्ति। कतिपये आलस्यवशादेव कर्तव्यभारं गृहीत्वापि तस्य निर्वाहं कर्तुं न पारयन्ति पदे पदे च आक्षेपतिरस्कारभाजनानि भवन्ति। बहूना तु स्वकर्तव्यस्य ज्ञानमपि नास्ति। ते उदरपूरणमेव जीवनस्य परमोद्देश्यं मन्यमाना निरर्थकमेव जीवनं यापयन्ति। भूयांसः सत्कर्तव्यं परित्यज्य दुष्कर्तव्येषु एव लीनाः सन्ति।

एवम् अनेकैः प्रकारैः कर्तव्यपराङ्मुखा पुरुषा समाजे उपलभ्यन्ते। परं तु इयं स्थितिः अतीव अनुचिता, व्यक्तेः समाजस्य च कृते महता हानिकरी अस्ति। कर्तव्यविमुखो मनुष्यः सर्वत्रैव निरादृतः सन् स्वयं तु दुःखं प्राप्नोत्येव समाजस्यापि दुःखकारणं भवति। न स परिवारे पूज्यते[२४] न समाजे एव। लोकत्रयं सहैव तस्य परलोकोऽपि नश्यति। स इतोऽपि भ्रष्टो भवति ततोऽपि भ्रष्टो भवति। एतद् विपरीतं तु ये जनाः यथोचितरूपेण स्वकर्तव्यपालने संलग्नाः भवन्ति, न लोभेन न

२१-रसोई। २२-पतीली में। २३-परोसना २४-पूजा जाता है।

यशसे न परानुरञ्जनाय अपि तु कर्तव्यबुद्धया कार्यं सम्पादयन्ति ते गृहे तिष्ठन्तु वहिर्वा, सर्वत्रैव समादर लभन्ते। बाहुबलात् सततमेव सुखिनः तिष्ठन्ति निर्भयाश्च विचरन्ति। समाजस्य सुखे शान्तौ सुव्यवस्थाया च ते हेतवो भवन्ति।

इदानीं जगति सर्वेष्वपि क्षेत्रेषु महती दुर्व्यवस्था दृष्टिगोचरी भवति। अहोरात्रम् आन्दोलनानि उपद्रवाः हड़तालाः[२६] सघर्षाः कोलाहलाः कलहानि च श्रूयन्ते। सर्वत्रैव आकुलतायाः अशान्तेः साम्राज्य विजृम्भते[२७]। मनुष्यता दानवताया भयङ्करैः आघातप्रतिघातैः छिन्न-भिन्नकलेवरा मृत्युशय्याया शयाना अस्ति। सकलश्च संसारो नरक इव महाभयङ्करः क्लेशकरश्च सवृत्तो वर्तते। एतत् सर्वमपि सर्वे एव जनाः अनुदिन प्रत्यक्षीकुर्वन्ति। तत्र विशेषविवरणस्य आवश्यकता नास्ति। परन्तु अत्र कारणं किं वर्तते? स्वकर्तव्यपालनस्य अभाव एव। शासकाः प्रजाजना वा, अध्यापका विद्यार्थिनो वा, अधिकारिणः अधिकृता वा, स्वामिनो भृत्या वा सर्वे एव अज्ञानवशात् लोभवशात् ईर्ष्यावशात् द्वेषवशात् क्रोधवशात् वा स्वकर्तव्यपालनात् च्युता असत्कर्मपरायणाश्च जाताः सन्ति। न ईश्वरस्य भयं वर्तते न लोकलज्जा अस्ति। यथेच्छम् आचरन्ति यथेच्छं व्यवहरन्ति। कोऽहम् किञ्च मे कर्तव्यम् इत्यस्य स्वप्नेऽपि ध्यान नास्ति। मनुष्याः पशुभ्योऽपि नीचता गताः सन्ति। रक्षकाः भक्षकाः संवृत्ताः[२८]। न्यायाधिकारिणो निःसङ्कोचम् अन्याय कुर्वते। त्यागिनः संग्रहे संलग्नाः सन्ति। मध्यस्थाः पक्षपातं विदधति। धर्मस्थानेषु अधर्माचरणं भवति। नेतारः स्वार्थवशात् लोकवञ्चनां कुर्वन्ति। एवञ्च सर्वत्रैव अन्यायस्य अधर्मस्य च साम्राज्य दृष्टिगोचरी-भवति। अतएव सर्वत्र अशान्तिः अव्यवस्था संघर्षश्च प्रतिदिनं वर्द्धमानो वर्तते। परं यदि सर्वेऽपि स्वकर्तव्यपरायणा भवेयुस्तदा संसारोऽयं

२६—हड़ताल। २७—फैला हुआ है। २८—हो गये।

सत्यवक्तृणा जनाना हृदये तथा महीयसी शक्ति समुदेति यया ते सर्वत्र अप्रतिहतगतयो भवन्ति सर्वत्र च विजयिनो जायन्ते सदैव च स्वस्थचिताः निर्भयाश्च सुख निवसन्ति। किमधिक, सत्यव्रतपालनाद् भगवत्त्वम् अपि लब्धु शक्यते। अत एव उपनिषदि लिखित वर्तते—

सत्येन लभ्यस्तपसा ह्येष आत्मा।

इमे खलु गुणा सत्यभाषणस्य सन्ति। एतद् विपरीत तु ये जनाः प्रतिदिन नि सशयम् अनृतमेव भाषन्ते अनृतभाषणे एव च ख्याति लभन्ते तेषु कस्यचित् न श्रद्धा जायते नापि विश्वास*। का वार्ता अन्येषाम्, आत्मीया अपि जना माता, पिता, भ्राता, भगिनी, जाया, सन्ततिश्च ततो विरज्यन्ते। सहवासिन प्रतिवेशिनश्च[3] सदा तस्य गर्हणा[4] कुर्वन्ति। विश्वासघातभयात् तस्य सत्यमपि वचन जना अनृतमेव मन्यन्ते। अत एव स सर्वेष्वपि कार्येषु जनताया सहयोगाद् वञ्चितो भवति। समाजे, सभायाम्, गोष्ठीषु, परिवारे, सम्बन्धिना समुदाये च एतादृशा अनृतभाषिणो जना सर्वत्रैव लज्जिता नम्रमस्तका भयभीता इव च तिष्ठन्ति। एव च ते तथा आत्मानम् अध पातयन्ति यथा जन्मशतेनापि परमात्मन प्राप्तिः तेषा कृते सुदुर्लभा भवति।

अन्यच्च सत्यभाषणम् अन्येभ्योपि अनेकेभ्य पापेभ्यो जनान् रक्षति। नहि सत्यवादिनो जना कदापि चौर्य कुर्वन्ति, न वा क्वचिद्व्यभिचार कुर्वन्ति। न अपलपन्ति[5] नापि कञ्चित् वञ्चयन्ति। यदि ते चौर्य व्यभिचारादिक च कृत्वा स्वयमेव प्रकाशयेयुस्तर्हि को नाम लाभ स्यात् तेषाम्? इदमेव विचार्य सत्यवादिनो जना* सदैव दुष्कर्मभ्यो दूरे एव तिष्ठन्ति। एतद्विपरीतम् अनृतभाषणम् अनेकेषा पापकर्मणाम् उत्पादक प्रोत्साहकञ्च भवति। अनृतभाषिणो जना न चौर्याद् विभ्यति[6] नापि व्यभिचारात्। न अपलापात् न परवञ्चनादेव। ते विचारयन्ति—यदि

३—पड़ोसी। ४—निन्दा। ५—बहाना करते हैं। ६—डरते हैं।

सर्वमपि दुष्कर्म कृत्वा वयं न अङ्गीकरिष्यामः यदि च कश्चित् साक्ष्यं न दद्यात् तत् को नाम अस्माकं किं दूषयितुमर्हति। एवं मनसि निश्चित्य ते सततमेव दुष्कर्मपरायणा तिष्ठन्ति। अत एव अस्माभिः सततमेव सत्यभाषणाय प्रयतितव्यं तथा च प्रतिज्ञातव्यं यथा एकमपि अनृतं वचनं कदाचिदपि मुखात् न निःसरेत्[८] इति।

अस्माकं गृहे गृहे सत्यनारायणव्रतकथा भवति। नहि कस्यापि हिन्दुजनस्य ईदृशं गृहं भविष्यति यत्र विवाहादिमङ्गलावसरेषु अस्याः कथायाः वाचनं श्रवणं वा न सम्पद्येत। परन्तु अल्पीयांसो जनाः अस्याः व्रतकथायाः शिक्षायाः उपरि ध्यानं ददते। इयं व्रतकथा अपि अनेकोदाहरणैः अस्मभ्यं सत्यभाषणस्यैव उपदेशं ददाति सत्यभाषणादेव च भगवान् मिलतीति शिक्षयति।

अस्माकं पुराणेषु इतिहासग्रन्थेषु च सत्यवादिनाम् ईदृशानि अनेकानि चरितानि मिलन्ति यानि पठित्वा महान् विस्मयो भवति। महाराजो दशरथः सत्यपालनायैव स्वकीयं प्रियतमं तनयं रामचन्द्रं चतुर्दशवर्षेभ्यो वने विवासयामास। परमप्रसिद्धः सत्यवादी राजा हरिश्चन्द्रो वने वने बभ्राम, चाण्डालगृहे दास्यं चकार, आत्मनः तनयं जायां च विचिक्राय, विविधा यातना सेहे, पदे पदे च अपमानितो बभूव पर सत्यवदनात् पदमपि पृष्ठतो न जगाम। सत्यव्रतपालनस्यैव प्रभावात् अजातशत्रुः धर्मराजो युधिष्ठिरः कौरवाणां महतीं सेनां विजित्य विजयश्रियं लेभे। राजा मयूरध्वजो निजपुत्रस्य शिरो अरया[१०] द्विधा चिच्छेद परं सत्यं न परित्यक्तवान्। इयं तु पुरातनी वार्ता अस्ति। अस्मिन् अपि युगे गतशताब्द्यामेव अत्र न कश्चित् असत्यं वदति स्म न असत्यम् अभियोगं[११] चालयति स्म न च असत्यं साक्ष्यं ददाति स्म इति भारतभ्रमणार्थं समागतानां विदेशिनां यात्रिणां लेखेभ्यो ज्ञायते।

७—गवाही। ८—निकले। ९—बेंच दिया। १०—आरा से। ११—मुकदमा।

एव भारतीया जना सत्यभाषणे सर्वेषु अपि देशेषु परा प्रसिद्धिं गता आसन्। परन्तु दुःखस्य अय विषयो वर्तते यद् इदानीं खलु असत्य-भाषणे एव सर्वेषां प्रवृत्तिर्विद्यते। न असत्यभाषणात् कश्चित् लज्जते। महतो महान्तोऽपि जनाः क्षुद्रस्यापि स्वार्थस्य कृते निःसङ्कोच मिथ्या-भाषणं कुर्वाणाः असत्यमेव अभियोग चालयन्तः असत्य च सत्य वदतो[१२] दृष्टिपथम् आयान्ति। बहूना तु असत्यभाषणस्य अभ्यास सञ्जातो वर्तते। अतस्ते स्वार्थं पराय विनापि इतस्ततो मिथ्याभाषणं कुर्वन्तो विलोक्यन्ते। एतादृशा जना यावद् दिने दशवारानपि मिथ्या न वदेयुः तावत् तेषा भुक्तमेव परिपक्व न भवति। एव ग्रामीणे नागरिके वा समाजे शिक्षितेषु अशिक्षितेषु वा सर्वत्रैव मिथ्याभाषणस्य प्रचारम् अवलोकयामः। पर यदि वय निज कल्याण वाञ्छामहे, यदि पूर्वजना गौरव सुरक्षितु वाञ्छाम, यदि सर्वत्र सम्मान समीहामहे, यदि च सर्वेषु कार्येषु साफल्यम् अभिलषामः तदा कदापि मुखात् मिथ्यावचन न निस्सारणीयम्।

सच्चरित्रता।

मानवीयेषु गुणेषु सच्चरितता नाम एकः सर्वातिशायी गुणः अस्ति। येभ्यो गुणेभ्यो मनुष्या महत्त्व प्राप्नुवन्ति, उच्चपदवीम् आधिरोहन्ति, समाजस्य भूषणानि भवन्ति, मनुष्यत्व च अतिक्रम्य देवत्व प्राप्नुवन्ति तेषु सच्चरितताया. प्रथम स्थानमस्ति। यस्मिन् मनुष्ये अय गुणो भवति स निर्धनो भवतु धनवान् वा, निर्गुणो भवतु गुणवान् वा, दुर्बलो भवतु बलवान् वा भवतु, सर्वत्र समादृयते, सर्वत्र सत्क्रियते सर्वत्र च सम्मान

१२—देते हुए।

भते ! दिने रात्रौ वा स निर्भय विचरितु शक्नोति । सङ्कटे समुपस्थिते वै तस्य सहायका भवन्ति । सच्चरित्रता एकस्तादृशो मन्त्र अस्ति येन वैऽपि महान्तो लघवो वा जना वशीभूता जायन्ते । अनेन गुणेन न स केवलम् आत्मानमेव प्रत्युत आत्मन परिवार देश जातिं समाज च चै पदे प्रापयति[1] । सच्चरित्रतायाम् ईदृश कोऽपि लोकोत्तर प्रभावो र्तते यस्य पुरस्तात् महतो महान्तोऽपि जना निष्प्रभा भवन्ति ।

तत् का नाम सच्चरित्रता ? के के च गुणा सच्चरित्रतायाम् अन्तर्भवन्ति ! सत्यवादिता, शील, सौजन्यम्, जितेन्द्रियता, गुरुजनेषु श्रद्धा, विनय, अलोलुपता, मनसा अपि परदारेषु अस्पृहा, सता ससर्ग, असता परित्याग, अदम्भ, अपाखण्ड सर्वभूतै सह समीचीनो व्यवहारश्चेति गुणा एकशब्देन सच्चरित्रता इति कथ्यते । एभिरेव गुणै जना सच्चरित्रा इति मन्यन्ते । एतद्विपरीतम्—असत्यवादिता, अजितेन्द्रियता, दौर्जन्यम्, गुरुजनेषु अश्रद्धा, अविनय, लोलुपता, परदारेषु परधनेषु च स्पृहा, सताम् असङ्गति, असता ससर्ग, सर्वै सह अनुचितो व्यवहारश्चेति दोषा यदा जनेषु आगच्छन्ति तदा ते दुश्चरित्रा इति कथ्यते । इतिहासग्रन्थेषु लिखितानां चरित्राणाम् अध्ययनेन अहोरात्र मस्माकं दर्शनेन च ज्ञायते यत् दुश्चरित्रा जना जगति सर्वत्र दुर्गतिं लभन्ते, पदे पदे अपमानिता भवन्ति, गृहे बहिर्वा सर्वत्रैव तिरस्कृता जायन्ते । न तेषु कश्चित् विश्वास करोति नापि श्रद्धाम् । न कश्चित् तैः सह सङ्गतिं कर्तु वाञ्छति नापि सम्भाषणं कर्तु समीहते । न तेषां कश्चित् सहायको भवति नापि परित्राणकर । यत्रैव दुश्चरित्रा जना गच्छन्ति तत्रैव काकवत् दूरीक्रियन्ते । न तेषां कृते लोके स्थानं मिलति नापि परलोके । इतो भ्रष्टा ततो भ्रष्टाश्च ते न केवलं आत्मानमेव अधः पातयन्ति प्रत्युत स्वकीय परिवार समाज देश जातिं चापि रसातलं प्रापयन्ति । स्वयं नष्टा परेषामपि सर्वनाशे कारणानि भवन्ति । महतो

१—पहुचाता है ।

महीयान् धनाढ्यो बलवान् विद्वान् वा भवतु पर यदि स दुश्चरितो भवति तदा तस्यापि इयमेव दशा भवति। काम स धनबलात् विद्याबलात् शारीरिकबलात् वा आत्मनो दुश्चरितानि दश पञ्च दिनानि गोपायित्वा[१] प्रतिष्ठा प्राप्नुयात्, महत्त्व लभेत, यशो वा समुपार्जयेत्, पर यदा तस्य दुष्कर्मणा भाण्डस्फोटो[२] भवति, सर्वत्र च तेषां प्रसिद्धिः जायते, मुखे मुखे च चर्चा भवति तदा तस्य न विद्याबल न धनबल न देहबल वा तस्य प्रतिष्ठा रक्षितु शक्नोति। तदानीं तु तस्याऽपि सा एव दुर्गतिः दुर्दशा च भवति यादृशी अन्येषा दुश्चरित्राणाम्।

विचारयन्तु नाम। केन कारणेन लक्ष्मणः शूर्पणखाया नासिकें कर्णौ च कर्तितवान्[३]? केन वा कारणेन सर्वशास्त्र निष्णातो महाबलवान् राक्षसाऽधिपतिः रावणो वा सवश जालन्धरितो बभूव? किं नाम कारणमस्ति येन राजा नहुष[४] स्वर्गं गतोऽपि ततो नीचैः निपातितः[५]। अथवा नास्ति दूरे गमनस्य आवश्यकता। इदानीमेव परः-सहस्रा जनाः केन कारणेन गृह वास परित्यज्य कारागारेषु[६] बद्धा विविधा यातना सहन्ते? आत्मनो दुश्चरितया एव। एष एक एव दोषः परशतानामपि अनर्थाना जनकः, सर्वविधाया अपि दुर्गतेः आदिकारणम्, समुन्नतेः सुमहत् प्रतिबन्धकम्, मानवताया महान् शत्रुः, सर्वनाशस्य च परम कारणमस्ति। अतो यथाशक्ति तथा प्रयतनीय पुरुषेण यथा दुश्चरित्रताया नामाऽपि न स्वस्मिन् तिष्ठेत्। अयमेव आत्मकल्याणस्य मूलमन्त्रः श्रवणन्तव्यः।

बाल्यकालादेव चरित्र-निर्माण जायते। बाल्यकाले एव उचितस्य अनुचितस्य वा यस्य कर्मणः अभ्यासो जायते तदेव दृढमूल सत् चरित्रमिति कथ्यते। बाल्यकाले एव बहवो बालका असत्यभाषिणो दुष्टा वञ्चकाः चौरा लम्पटाश्च भवन्ति। यदि एतेषाम् उपरि बाल्यकाले एव

२—छिनकर। ३—भण्डाफोड़। ४—काटा। ५—गिरा दिया गया। ६—जेलखानों में।

मातु· पितु· या नियम·धर्मं न भवति तदा ते आजीवन तथैव आचरन्ति। एतदपवादम्—केचन बालका बाल्यकालादेव सत्यवादिनः सौम्या अलोलुपा अलम्पटा· शिष्टस्वभावाश्च भवन्ति। तेषाम् अस्मिन् स्वभावे यदि केनापि कारणेन असत्सङ्गेन वा परिवर्तन न जायते तदा तेऽपि आजीवन तथैव तिष्ठन्ति। अत एव चरित्र निर्माणस्य भूयान्* भारो मातु पितुश्च उपरि भवति। ते बाल्यकाले बालकान् दैनैव मार्गेषु गमयिष्यन्ति[८] तेनैव मार्गेण गमिष्यन्ति[८], यादृशमेव अभ्यास जनयिष्यन्ति तादृश एव अभ्यासो भविष्यति, यदेव कर्तुम् उपदेक्ष्यन्ति[९] तदेव करिष्यन्ति। अतो माता पिता च बाल्यादेव बालाना चरित्र· निर्माणाय प्रयत्न· कर्तव्यो येन ते अग्रे सुचरित्रा भवेयु·।

एवमेव चरित्र-निर्माणे ससर्गस्याऽपि महान् प्रभावो भवति। सङ्गगात् सज्जना अपि बालका दुर्जना भवन्ति दुर्जनाश्च सज्जनाः। अतो बालकाले माता पित्रा, यौवने च स्वयमपि दुर्जनसंसर्गात् आत्मनो रक्षणाय अपि प्रयतनीयत्। अत एव कथयन्ति नीतिकारा—

संसर्गजा दोषगुणा भवन्ति, इति।

तस्मात् सर्वथा सच्चरित्रताया उपरि ध्यान दातव्यम्। शङ्करः प्राकरणाय मनसा विचारणीयम्—के मयि दोषाः के च दुर्गुणा इति। ये मे. मूले जना जगद्वन्दनीया भवन्ति ते सर्वे भर्तृहरिणा स्वकीये नीतिशतके लिखिताः। यथा—

यान्ति न्यायप्रवृत्तस्य तिरश्चोऽपि सहायताम्।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति॥

७—बहुत बड़ा। ८—ले जायगे। ९—उपदेश देंगे।

परोपकारः ।

परेषां हिताय यत् यत् कार्यं क्रियते तत् सर्वं परोपकार इति कथ्यते । ये ये गुणा मानवजीवनस्य महत्त्वं वर्द्धयन्ति तेषु परोपकारस्य प्रमुखं स्थानं वर्तते । परोपकारस्य भावना हि अन्तःकरणे पवित्रताम् उत्पादयति, शुष्केऽपि हृदये स्नेहरसं प्रवाहयति, भक्तिभावं भरति, दयायाः उद्रेकं जनयति, ईर्ष्या द्वेषादिकं नाशयति, प्राणिमात्रे च भ्रातृभावं वर्द्धयति । एष गुणेषु अनुत्तमो गुणः, धर्मेषु सर्वश्रेष्ठो धर्मः, व्रतेषु च सर्वोत्तमं व्रतम् अस्ति । भगवान् वेदव्यासस्तु महाभारते परोपकारमेव धर्मं परपीडनमेव च अधर्मं निरूपितवान्[1]। इयमेव अष्टादशानामपि पुराणानां शिक्षायाः सारभूता शिक्षा अस्ति । यथा—

अष्टादश पुराणानां व्यासस्य वचनद्वयम् ।
परोपकार पुण्याय पापाय परपीडनम्॥

अतः सर्वैरेव पुरुषैः स्वकार्य-सम्पादनेन सहैव परोपकार-करणेऽपि यथाशक्ति अवश्यमेव प्रवर्तितव्यम् । यो नाम नरो नारी वा स्वकीयेन शरीरेण बुद्ध्या बलेन वैभवेन वा क्षणमपि परेषां उपकारं करोति, क्षणमपि परेषां दुःख-दैन्येऽवसरे च साहाय्यं कुरुते स धन्यवादार्हः, स एव यथार्थो मनुष्यः, तस्यैव च जीवितं सफलम् ।

बहवो जना एवं विचारयन्ति यत्—वयं भिन्नाः अन्ये च भिन्नाः । तत् किमर्थं तेषाम् उपकाराय स्वार्थ-हानिः कर्तव्या ? इदं धनं मम, इदं बलं मम, इयं विद्या मदीया तत् कथम् अनेन धनेन बलेन अनया विद्यया वा परेषां कार्यं साधयामि ? तेन मम को लाभः ? दुग्धं पीत्वा घृतं भुक्त्वा अहरहश्च व्यायामं कृत्वा महता यत्नेन शरीरमिदं पालितं

१—बतलाया ।

पोषितञ्च । अहोरात्रं परिश्रम्य, माघमासस्य शीतं ज्येष्ठमासस्य च घर्मम्[२] अविगणय्य[३] क्षुधां पिपासां विस्मृत्य, स्वास्थ्यं नाशयित्वा चौरादिभिश्च सरक्ष्यं महता क्लेशेन समुपार्जितमिदं धनम् । बहुनु विद्या लयश्च भ्रमित्वा, अनेकान् गुरुजनान् उपास्य, दिवानिशं परिश्रम्य, कण्ठशोषं सहित्वा अनेकान् क्लेशान् च सोढ्वा द्वादशाब्दि वयं समुपार्जिता मया विद्या । विद्या बलं धनं वा सर्वमपि मया स्वपौरुषेण समुपार्जितम् । किं नाम तत्र अन्यस्य लगित येन स्वार्थं विनैव दैरदम् अन्येषां कार्यं साधयामि ? बहवो जना एवमेव विचारयन्ति । अत एव ईदृशा जना सत्यां सम्पदि अपि कदाचित् परोपकारणु प्रवृत्ता न भवन्ति । स्वार्थ साधने एव सर्वमपि धनादिकं व्ययीकुर्वन्ति ।

परन्तु ईदृशा विचारा समुचिता श्लाघनीया[४] वा न भवन्ति । क्षुद्रहृदयाना खलु पुरुषाणाम् इमे विचारा । अयं मदीय अयं च अन्य दीय इति लघुचेतसा[५] गणना । वस्तुतस्तु वयं सर्वेऽपि प्राणिन एकस्यैव परमात्मन सततिस्वरूपा अतो वयमपि सर्वे एके एव । कामं[६] शरीरे वर्णे जातौ कर्माणि गुणे अवस्थाया वा भूयान् भेदो वर्तते अस्मासु । आहार व्यवहाराश्च बहुधा भिन्न भिन्ना एव सन्ति अस्माकम् । पर बाह्यभेदा इमे न तु वास्तविका । वास्तविक तु स्वरूपम् अस्माक सर्वेषा मपि एकमेव । अतो भेदबुद्धिं परित्यज्य सर्वैरेव परस्पर भ्रातृवत् वर्तितव्यम् । एक एव अस्माक पिता एका एव च माता वयं च सर्वे भ्रातरो भगिन्यश्च इत्येव मनसि निश्चित्य मिथो[७] भ्रातृवत् व्यवहर्तव्यम् । अन्यस्य दुख स्वकीय मत्वा तस्य अपनयनाय[८] प्रयत्न कर्तव्य । अन्यस्य सुख स्वकीय मत्वा तस्य सम्पादनाय प्रयतितव्यम् । अयमेव सत्यो मानवो धर्म, शान्ते सुखस्य च परम साधनम् अस्ति ।

२—घाम । ३—कुछ न समझकर । ४—सराहनीय । ५—छोटे हृदय वालो का । ६—भले ही । ७—आपस म । ८—दूर करने के लिय ।

अयमेव च ऐहलौकिकस्य निःश्रेयसस्य च निष्कण्टकः पन्थाः। अतो विद्यया बुद्धया बलेन वित्तेन अन्येनापि वा येन केनापि उपायेन यथासम्भव परेषा हित-साधने प्रवर्तितव्यम्।

यदि ससारे परोपकारिणो जना न भवेयुस्तदा लौकिके व्यवहारे महती बाधा महती च असुविधा आपद्येत। एवम्भूतो जगतीतले कोऽपि जनो नास्ति य केवल स्वकीयेनैव धनादिना स्वकीय सर्वमपि कार्य सञ्चालयितु प्रभवेत्। सर्वेषामपि कृते जीवने अन्येभ्यः सहायताग्रहणस्य अन्येषा वा धनादिना सुखोपभोगस्य अवसरः समापतति। प्रायः सर्वेऽपि जनाः कार्यवशात् बहिर्गच्छन्ति। तत्र प्रायः सर्वेऽपि अन्यनिर्मितासु धर्मशालासु निवसन्ति, अन्यपानिताना कूप-तडागादीना जल पिबन्ति, अन्यरोपिताना वृक्षाणा शीतलच्छायासु विश्राम्यन्ति, अन्येषाञ्च पदार्थान् अन्नपानादिकमपि गृह्णन्ति। नहि कश्चित् महाधनिकोऽपि जनो यत्र यत्र गमिष्यति तत्र तत्र स्वकीये एव गृहे निवत्स्यति[६] स्वकीयस्यैव च कूपस्य जल पास्यति इति कथमपि विश्वासः कर्तुं शक्यते। दरिद्रा भवेयुर्धनिका वा, केऽपि पर-साहाय्य विना कार्यसञ्चालनं कर्तुं न शक्नुवन्ति। अन्यकृतवस्तुभ्यः साहाय्य ग्रहणस्य आवश्यकता भवत्येव। अतो यदि न स्वकर्तव्य-बुद्धया तर्हि प्रत्युपकार बुद्धया एव परोपकारः कर्तव्यो येन मनुष्यऋणात् मुक्तिर्भवेत्।

प्रकृतिरपि अस्मभ्य परोपकारस्यैव शिक्षा ददाति। प्राकृतिकाः सर्वेऽपि स्थावरा जङ्गमा वा पदार्थाः परोपकरणे एव अहोरात्रं प्रवृत्ता सन्ति। विचारयन्तु मनाक् मनसि। सूर्यं तपति। चन्द्रमा विभोतते। वायु वाति। मेघा वर्षन्ति। नदी प्रवहति। तरवो फलन्ति। कुसुमानि विकसन्ति। सर्वेऽपि इमे दिवानिशं स्वे स्वे कार्य निरता सन्ति। तत् किम् एतेषा कश्चित् स्वार्थो वर्तते? किं तरवः स्वय फलानि भक्षयन्ति?

६—रहेगा।

सुमानि किं स्वयं गन्धान् जिघ्रन्ति[10] । मेघानां किं चेतांसि सन्ति येषां चेतनाय ते वर्षन्ति ? वायुः किम् आत्मनो जीवनाय याति ? चन्द्रमाः किम् आत्मानम् आह्लादयितुं विद्योतते ? दिवाकरः[11] किं स्वहिताय तप्यति ? सरितो वा किं स्वयं स्नानाय प्रवहन्ति ? नहि । अन्येषामेव हिताय सदर्जनाय च इमाः सर्वाः प्रवृत्तयः एतेषाम् ।

येषां क्षुद्रहृदयाणां मानवानां हृदये परोपकारमयी भावना नास्ति, ये रात्रौ दिवा च स्वकीयस्यैव उदरस्य पूरणे परायणाः सन्ति, स्वप्नेऽपि परेषां हितं न चिन्तयन्ति, ते मानवजातेः कलङ्कस्वरूपा अधमा जना पशुसदृशा एव मन्तव्याः । येषां कठोरे हृदये विपत्सागरे पतितान् जनान् विलोक्य वेदना न जायते, ये बुभुक्षया[12] पीड्यमानं म्लानमुखं जनं निरीक्ष्य दुःखं नाऽनुभवन्ति, आर्तजनानां करुणापूर्णं क्रन्दनं श्रुत्वा येषां हृदयं द्रवीभूतं न भवति ते पाषाणहृदयाः जना वृथा जीवन्ति अवनेः च मानवकुलं कलङ्कयन्ति । एतादृशानां स्वार्थपरायणानां परोपकार—शून्य-हृदयानां कृते शोचनीयं जीवनं व्यर्थम् ।

अस्माकं देशे अनेके एतादृशाः रत्नानिधन्याः परोपकारिणो महा-पुरुषा बभूवुः । महाराजः शिविः शरणागतस्य कपोतस्य[13] रक्षणाय स्व-मांसं यावत्[14] श्येनाय[15] समर्पितवान् । महाराजो दधीचिः देवानां हिताय अस्थीनि[16] अपि तेभ्यो दत्तवान् । महाराजो मयूरध्वजः अन्धस्य वृद्धस्य पितुरर्थाय स्वकीयं पुत्रं तमै समर्पयामास । एतादृशा एव अनेके महापुरुषाः बभूवुः येन केवलं धरणि-तल एव वा मनुष्य-लोकेऽपि अस्माकं हिताय विसर्जितवन्तः । अत एव तेषाम् आपि गृहे गृहे यशोगाथा गीयते । तेषाञ्च नामस्मरणमात्रेण अस्माकं हृदयं सौरभेण समुल्लसितं भवति । तेषां शरीरेण ते तादृशं यशः

१०—सूंघते हैं । ११—सूर्य । १२—भूख से । १३—कबूतर के । १४—तक । १५—बाज के लिये । १६—हड्डियाँ ।

समुपार्जित येन आकलान्त न केवल भारतम् अपि तु समस्तोऽपि मानव-समाजो जगति यशोभाजन स्थास्यति । इदानीमपि श्रीमालवीयमहोदय-सदृशा अनेके महापुरुषा जन्म गृहीतवन्तो येषा सम्पूर्णमपि जीवनं परहित-सम्पादने एव गतम् । ते परार्थमेव जीवितवन्तः परार्थमेव च हसन्तो मृत्युमालिङ्गितवन्तः । अत सर्वैरेव यथाशक्ति परेषां हितसम्पा-दनाय अवश्य यतनीयम् ।

उद्योगपरायणता ।

कस्यापि कार्यस्य सिद्धये उद्योगस्य महतो आवश्यकता भवति । नहि किमपि लघु महत् वा कार्यं केवलम् इच्छामात्रेण आरम्भमात्रेण वा सिद्धयति प्रत्युत यदा तदर्थम् उद्योग· क्रियते प्रयत्नो विधीयते तदैव सिद्धिर्भवति । उद्योगेन साधारणा अपि जना महतो महान्ति कार्याणि साधयितु शक्नुवन्ति । परं यदि उद्योगो न विधीयेत तर्हि भोजनप्राप्ति-रपि असम्भवा भवितुमर्हति । अत एव नीतिकाराः कथयन्ति—

उद्योगेन हि कार्याणि सिद्धयन्ति न मनोरथैः ।
नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥

सर्वदैव वयम् उद्योगस्य महत्त्वम् अवलोकयाम । पूर्वम् एकवारमपि भोजन येषा कृते दुर्लभम् आसीत् ते एव उद्योगेन महान्तो धनवन्तः सम्पन्ना अवलोकयन्ते । ये कदाचित् शतशो विशीर्णानि[1] वस्त्राणि धारयन्तो महता क्लेशेन अङ्गगोपनं कर्तुं शक्नुवन्ति स्म ते एव बहु-मूल्यै कौशेय[2] वसनैः विभूषितशरीरा राजभवनेषु सुखपूर्वकं विराजन्ते । मरुप्रान्तात्[3] अनेके "मारवाडी" जना एवं जलयानमेव आदाय

१—फटे । २—रेशमी । ३—मारवाड से ।

समागता अत्र पर ते एव सम्प्रति महान्तो धनिका लक्षाधीशाः कोटिपतयश्च सम्पन्ना वर्तन्ते इति प्राय सर्वे जानन्ति। किमधिक कथयामः। उद्योगेन अलभ्यम् अपि लब्धु शक्यते, असाध्यम् अपि साधयितु शक्यते, असम्भवमपि च सम्भव कर्तुं शक्यते। उद्योगेन भिक्षुको राजा भवितु शक्नोति, दुर्बलो बलवान् भवितु शक्नोति, अविद्वान् विद्वान् भवितु पारयति दुःखितश्च परम सुख प्राप्तु शक्नोति।

ये जना सततमेव उद्योगपरायणा तिष्ठन्ति तेषा कृते ससारे किमपि असाध्य दुलर्भ वा नास्ति। उद्योगिन पुरुषस्य दैवमपि साहाय्य कुरुते। सिद्धयः सततमेव तस्याग्रे बद्धाञ्जलयः उपस्थिताः तिष्ठन्ति। कमलालया[४] किङ्करी इव निरन्तर त सेवमाना तिष्ठति। विघ्नबाधाः भयभीता इव कदाचिदपि तस्य पुरस्तात् उपस्थातु न शक्नुवन्ति। सफलता जीवन-सङ्गिनी इव सदैव तस्य आलिङ्गन कामयमाना[५] निवसति। प्रकृतिः प्रजा इव स्वकीयं सर्वमपि वैभव तस्मै उपायनीकरोति[६]। अपि च अप्रतिहता गतिर्भवति उद्योगिनः पुरुषस्य जले स्थले आकाशे वा। अद्य जगतीतले यद् वय सर्वतो भौतिक समुत्कर्ष पश्याम[७] स सर्वं अपि उद्योगपरताया एव मङ्गलमय परिणाम अस्ति। यदि उद्योगिनो जना न स्यु[८], यदि उद्योग-दिवाकरः अस्त गच्छेत्, आलस्यनिशीथिनी[९] च सर्वतो व्याप्ता जायेत तदा तत्कालमेव जगतः प्रलयः सम्पद्येत।

ससारे एकैक ईदृशा महापुरुषा जन्म गृहीतवन्तो ये स्वकीयोद्योगबलेन असम्भवम् अपि कर्म सम्भव सम्पादयामासु। इतिहासे ईदृशानाम् उदाहरणाना न्यूनता नास्ति। महाराजो भगीरथः प्रबल तपः कृत्वा भगवती गङ्गा स्वर्गात् महीतले आनिनाय[१०]। राजर्षिवरो विश्वामित्रो

४—लक्ष्मी। ५—चाहती हुई। ६—भेट के रूप में दे देती है। ७—रात। ८—ले आये।

वशिष्ठेन पुनः पुनः प्रतिषिद्धोऽपि उद्योगबलेन ब्रह्मर्षिता प्राप । उद्योग-स्यैव प्रभावेण समुद्रपारे नीता भगवती सीता हनूमतो हस्तगता बभूव । उद्योगस्यैव अय प्रभावो वर्तते यत् दुर्योधनेन निर्वासिता अपि पाण्डवाः पुनरपि स्वकीय राज्य लब्धु समर्था बभूवुः । अथवा स्वज्यताम् इद सर्व वृत्तम् । स्वदेशस्यैव पराधीनतायाः स्वाधीनतायाश्च इतिहास पश्यत । कियता उद्योगेन वैदेशिका वणिजः अस्माक देशस्य उपरि शासन कर्तुं शेकुः । अनेकानि शैलशिखराणि उल्लघ्य, शतशततरङ्ग-सकुल सागर पारेकृत्वा, महाक्लेशकरी मरुमयी-भूमी' अतिक्राम्य, विविधानि कष्टानि सहित्वा, अनेक बलराणि घोर परिश्राम्य, अनेकान् अनेकानि युद्धानि कृत्वा, सहस्र सहस्र प्राणानाञ्च आहुतीर्दत्वा ते अस्य देशस्य उपरि अधिकार विस्तारयामासु' । समारस्य इतिहासे वैदेशिका-नामिद कार्यम् उद्योगपरतायाः प्रकृष्टतमम् उदाहरणम् अस्ति ।

पराधीनता कस्यापि देशस्य कृते महान् कलङ्को भवति । अत एव विदेशिना राज्यस्थापनायाः परचात् कतिपयवर्षानन्तरमेव देशवासिनां हृदये स्वाधीनताया भावः समुदियाय[९] तदर्थं च शनैः शनैः मनुष्याः आरब्धाः । राष्ट्रियमहासभायाः कृते जनतया विपुलरूपेण आन्दोलन चालितम् । महता उत्साहेन च असङ्ख्या नरा नार्यश्च अस्मिन् स्वातन्त्र्य सग्रामे आत्मसमर्पण चक्रुः । यद्यपि अस्य आन्दोलनस्य निर्मूलनाय वैदेशिकैः विविधा उपाया विहिताः । सभासम्मेलनादीनि अवरुद्धानि, जनतायां भयङ्कर दमन कृतम्, नेतारो मुहुर्मुहुः कारागारे बद्धा, सहस्र-सहस्र-सुजनो गुलिकाभिः[१०] मृत्युमुखे पातिताः, धनानि लुण्ठितानि, गृहाणि प्रज्वलितानि, मातरो भगिन्यश्च निर्मर्यादा कृता., रोमाञ्चकारि-णश्च अत्याचारा अभूवन्, पर स्वतन्त्रतायै देशवासिनां हृदये जाज्वल्य-मानो वह्निः उपशमितो न बभूव । सर्वाणि कष्टानि सर्वविधान् च अत्या-चारान् सहमाना अस्मदीया देशवासिनो नेतारश्च कदाचिदपि अस्मान्

९—उदपद्यत इत्या । १०—गोलिकाभि ते ।

मनुष्येभ्यात् शिक्षां न यभूवुः। अन्यु दिने दिने अधिकाधिकं प्रयत्नं कर्तुं आरभन्त। तस्यैव उद्योगस्य फलमिदं यत् सम्प्रति पर्व द्वितीयमध्यायान्तरं पैदेशिकानां आगमनात् मुक्ति लब्धा स्वदेशे दासीयं राज्यं स्थापयितुं समर्था भूताः स्म। कथनस्य इदं तात्पर्यं यत् यद् सुगारे क्रिमपि प्रलाद्यं कार्यं नास्ति या साधयितुं न शक्येत। दुष्कराण्यपि कार्याणि साधयितुं शक्यन्ते। आवश्यकता यत्ते केवलं तत्र उद्योग परायणताया', प्रयत्नशीलतायाः।

अहन्या अपि उद्योगपरतायाः एव शिक्षा मिलति। प्रकृतिरप्यत्र यावन्तो कीटाः सन्ति ते सर्वेऽपि उद्योगपरायणा एव दृश्यन्ते। पिपीलानां[11] आहारं दृष्टिः दीयताम्। ते अपि गर्वेण इतस्ततो भ्रमन्ते, स्वभोज्यपदार्थान् आहरन्ते, सनीड[12] निर्माणे, शिशुपालने, वयुभ्यः आत्मरक्षणे च निरता अवलोक्यन्ते। पीटिव[13] दृश्यक्लेशेन लब्धी पिपीलिका [11]अहोरात्रम् इतस्ततो धावन्ती, लाघवत्वम् धुवन्ती, सदनमेव उद्योगपरायणा एव दृष्टिपथम् आयाति। अन्येऽपि सूर्यचन्द्रादयो ग्रहनक्षत्रादयश्च सृष्टिसञ्चालनादेव स्व-स्व-कर्तव्ये संलग्ना उद्योगपरायणतायाः एव उपदेशं ददति। मानवाश्च दिने सूर्योदयात् परमपि शयाना अवलोक्यन्ते परं पक्षि वीक्षणतः पूर्वमेव जागरिता स्व-स्वकार्य-संलग्ना आपतन्ते। तथा यदि बुद्धिवैभवशालिनेषु मनुष्येषु कीटपतङ्गेषु च इदृशी उद्योगपरता भवेत् तर्हि सर्वसाधनसम्पन्ना मनुष्या यदि उद्योगं न शुभुः आत्मरक्षणाय निर्धनमेव जीवनं यापयेयुः तर्हि इतः परं किमपि तेषां कृते सर्वनाशं भविष्यति? अतः सर्वैरेव मनुष्यैः—नरैः नारीभिश्च सततमेव उद्योग-परायणैः भवितव्यम्।

दुर्भाग्यवशात् अस्माकं समाजे बहवो भाग्यवादिनः दृश्यन्ते। स्वीकरणं तु दूरे केवलं तर्कार्थमपि वयं ते न स्मः। ये तु इदं कथयन्ति—

११—पिपीलो के। १२—घोंसला। १३—चींटे।

भाग्येनैव सर्व भवति। व्यर्थमेव जना "हाय हाय" इति कालाहरं कुर्वाणा सन्ति। यद् भाग्ये लिखित भविष्यति तत्तु स्वयमेव भविष्यति। का पुन आवश्यकता तदर्थम् इतस्ततो धावनस्य? परं तेषाम् इय धारणा युक्तियुक्ता नास्ति। नहि ईदृशेन विचारेण देशस्य लाभो भवितुमर्हति नापि समाजस्य। न च अय सिद्धान्त अस्माक शास्त्रेषु एव लिखितो वर्तते। शास्त्राणि तु सर्वाण्येव उद्योगस्य महिमान गायन्ति उद्योग परा यणनायाश्च उपदेशं ददते। अत एव नीतिकारा —

उद्योगिन पुरुषसिंहमुपैति लक्ष्मी
दैवेन देयमिति कापुरुषा वदन्ति।

इत्यादिभि श्लोकै उद्योग प्रशसा दैववादस्य च निन्दा कुर्वन्ति। उद्योगेनैव ग्रामनो देशस्य वा कल्याण कर्तुं शक्यते। उद्योगबलादेव सम्प्रति अमेरिका-रूस प्रभृतयो देशा सर्वप्रकारेण धनधान्यसम्पन्ना सन्तो जगति सर्वश्रेष्ठता गता सन्ति। अतो यदि जना सुखेन जीवितु वाञ्छेयु तर्हि सर्वैरेव भाग्यवाद दूरे निक्षिप्य आलस्यं च सर्वथा विहाय उद्योगपरायणै भवितव्यम् उद्योगदेवस्य च शरणे समागन्तव्यम्।

शिष्टाचारः।

सुशिक्षिता सभ्या सदाचार-सम्पन्नाश्च जना 'शिष्टा' इति कथ्यन्ते। तेषामव आचार व्यवहार —शिष्टाचार इति पदेन व्यवहियते। अर्थात् शिष्टजना गमने आगमने, उत्थाने उपवेशने, शयने जागरणे, आदाने प्रदाने, भोजने पाने, आलापे सलापे, प्रश्न समाधाने, हास परिहासे, हर्षे विषादे, रुचौ वितृष्णे, आमोद प्रमोदे, यादे

प्रतिवादे, केलौ कुतूहले, घाते प्रतिघाते, जये पराजये, अनुरागे विरागे, उत्कर्षे अपकर्षे, पुरस्कारे तिरस्कारे, उपकारे अपकारे, प्रणामे आशीर्वादे, पुरीषे[1] प्रस्रावे[2], तथा अन्येषु च लघुषु महत्सु वा कार्येषु यथा आचरन्ति यथा च व्यवहरन्ति स एव आचारो व्यवहारश्च शिष्टाचार इति उच्यते ।

सुख सम्मान-पूर्वकं स्वकीय जीवन यापयितु[3] शिष्टाचार-पालनस्य अतीव आवश्यकता भवति । ये जना. शिष्टाचार-विरुद्धम् आचरन्ति, उचित करोमि अनुचित वा इति विषये ध्यान न ददते, सुखाऽसुख-विवेक विहाय यथेच्छ व्यवहरन्ति । ते सभ्य समाजे कुत्रापि समादर न लभन्ते । एतादृशेषु जनेषु स्वकीया अपरा सर्वे एव जना घृणा कुर्वन्ति, सर्वे एव निन्दन्ति, सर्वे एव च तेषाम् असहयोग कुर्वन्ति । एतद्विपरीत ये जनाः शिष्टाचारानुसार सर्वदा आचरन्ति, उचिताऽनुचिते विचार्य व्यवहरन्ति ते शिष्टसमाजे सदैव सम्मान प्राप्नुवन्ति सर्वत्रैव च समादियन्ते । ते सर्वे अपि समाजेषु सादरम् आहूयन्ते[4] । नरो नारी, बालको वृद्धो, ब्राह्मण. चाण्डालो वा सर्वे एव गृहे बहिर्वा शिष्टजनसम्मतेन व्यवहारेणैव समाजे सम्मानयोग्या भवन्ति न अन्यथा । अतः सर्वैरेव नरैः नारीभिर्वा शिष्टाचाराऽनुकूल एव व्यवहार. कर्तव्यो येन समाजे सुख-सम्मान पूर्वकं जीवन यापयितु शक्येत ।

समाजे बहवो जना अनेकानि शिष्टाचार विरुद्धानि कार्याणि कुर्वन्ति । बहूना निरर्थकमेव गालि प्रदानस्य अभ्यासो भवति । ते साधारणे वार्तालापे हासे परिहासे च पदे पदे उद्वेगजनकान् अपशब्दान् उच्चारयन्ति । बहवो यत्रैव भुञ्जते तत्रैव गण्डूषादिक[5] कुर्वते । अनेके आज्ञा विनापि परवस्तूनि गृह्णन्ति । न च पुन प्रेरणा विना पुन. परावर्तयन्ति[6] । केचन

१—शौच में । २—पेशाब करने में । ३—बिताने के लिये ।
४—बुलाये जाते हैं । ५—कुल्ला वगैरह । ६—लौटाते हैं ।

यत्रैव उपविशन्ति तत्रैव परितः ष्ठीवन्ति[७]। बहवो गुरुजनानामपि समक्षम् उच्चैर्हसन्ति, उच्चैर्जल्पन्ति, उद्धत[८] च व्यवहारं कुर्वन्ति। केचन कार्याभावे अङ्गुल्या नासिकामेव निष्कुष्णन्तः[९] तिष्ठन्ति। कियन्तः प्रयोजनं विनापि परस्परं संलपतो. द्वयोर्मध्ये उपतिष्ठन्ति। बहवः चलन्तोऽपि गायन्ति, उत्तिष्ठन्तोऽपि पिबन्ति, भक्षयन्तोऽपि बहु मृषा जल्पन्ति। अपरे विस्तृतेऽपि मार्गे अपरान् धक्कयन्तो मर्दयन्तः आघ्नन्तश्च[१०] गमनं कुर्वन्ति। बहवः अप्रक्षालितौ अपि पादौ अन्यस्य आसने धरन्ति, अनावृतमुखा एव जृम्भन्ते[११] क्षिपन्ति च, धूमवीटिकां[१२] च पीत्वा सम्मुखमेव धूममुत्सृजन्ति। केचन असमयं गायन्ति, असमयं रुदन्ति, असमये च वार्तालापं कुर्वन्ति। कियतः अनाचारान् गणयामः? ईदृशा एव अनेके शिष्टाचारविरुद्धा व्यवहाराः चलन्ति। मम केन आचरणेन कस्य किं कष्टं जायते इति स्वप्नेऽपि न विचारयन्ति।

न च इमे दोषाः केवलम् अशिक्षितेषु एव वर्तन्ते। शिक्षिता अपि बहवो दुरभ्यासात् अनवधानात्[१३] अज्ञानात् वा शिष्टाचार-विरुद्धानि बहूनि कर्माणि कुर्वन्तो दृष्टिपथं गच्छन्ति। "स्कूल-कालेजा" दीनां छात्रेषु तु बाहुल्येन इमे दोषा उपलभ्यन्ते। भोजन पानादौ असंयम., गुरुजनेषु अपि अविनयः, उच्छृङ्खला व्यवहाराः, सघीभूय यस्य कस्यापि परिहासकरणम्, छात्रीभिः सह बीभत्सा व्यवहारश्चेति साधारणं कार्यं वर्तते। मार्गे वर्त्मनि आदाय भक्षयन्तः, शिक्षकैः सह विवादं कुर्वन्तः, कदाचित् गालिप्रदान कदाचित् च प्रहारमपि कुर्वाणाः, अन्यान् गुरुजनान् अपि हसन्तः, निरर्थकमेव अट्टहासं कुर्वन्तः, अकारणमपि केनापि सह सङ्घीभूय विवदमानाश्च ते आत्मनो महत्त्वं मन्यन्ते। एवं शिक्षितेषु

७—थूकते हैं। ८—उद्दण्डतापूर्ण। ९—निकोरते हुए। १०—चोट पहुचाते हुए। ११—जँभाई लेते हैं। १२—बीड़ी। १३—असावधानी से।

प्रशिक्षितेषु वा सर्वत्रैव अशिष्टजनोचिता अनेके व्यवहारा अहर्निशं वलोक्यन्ते अस्माभि' । यस्य कस्यापि भवन्तु, परम् ईदृशा व्यवहाराः सर्वेषामपि कृते अप्रिया अरुचिकरा उद्वेगजनका क्लेशकराश्च भवन्ति । अतः शिष्टाचाराऽनुकूलमेव सदा व्यवहर्तव्यमस्माभि न तु तद्विपरीतम् ।

अनेनैव कारणेन अस्माकं शास्त्रेषु शिष्टाचारस्य विस्तरेण उपदशः कृता वर्तते । सर्वेषु अपि धर्मग्रन्थेषु एकैकस्मिन् प्रकरणे "सदाचार" नाम्ना "सद्वृत्त" नाम्ना वा शिष्टाचाराणाम् अतीव रमणीय वर्णन मिलति । पाठकाना हिताय अत्र चरक संहितायाः सद्वृत्ताध्यायस्य कानिचित् वाक्यानि वयम् अधस्तात्[१४] उल्लिखाम । तद् यथा—

"न अनृत ब्रूयात्, न अन्यस्वम् आददीत, न अन्यस्त्रियम् अभिलषेत् न अन्यश्रियम्, न वैर रोचयत्, न कुर्यात् पापम्, न पापेऽपि पापी स्यात्, न अन्यदोषान् ब्रूयात्, न अन्यरहस्यम् आगमयेत्, न अधार्मिके न नरेन्द्रद्विष्टै सह आसीत, न उच्चैर्हसेत्,न शब्दवन्त मारुत मुञ्चेत्,न अनावृतमुखो जृम्भा क्षवथु[१५] हास्य वा प्रवर्तयेत् , न नासिका कुण्डीयात्, न दन्तान् विघट्टयेत्, न नखान् वादयेत्, न अस्थीनि अभिहन्यात्, न भूमिं विलिखेत्, न छिन्द्यात् तृणम्, न लोष्ठ मृद्नीयात्, न निगुणम् अङ्गै चेष्टेत्त, न पापवृत्तान् स्त्रीमित्रभृत्यान् भजेत, न उत्तमैः विरुद्धयेत, न अवरान् उपासीत, न जिह्म रोचयेत्, न अनार्यम् आश्रयेत्, न भयम् उत्पादयेत् ।"

"न अति समय जह्यात्, न नियम भिन्द्यात्, न नक्त अदेशे चरेत्, न सन्ध्यासु अभ्यवहाराऽध्ययनस्वप्नसेवी स्यात्, न बाल-वृद्ध-लुब्ध-मूर्ख-क्लिष्ट-क्लीवैः सह सख्य कुर्यात्, न मद्य-द्यूत वैरयाप्रसङ्ग-रुचिः स्यात्, न गुह्य विवृणुयात्, न कञ्चित्

१४—नीचे । १५—छींक ।

अवजानीयात्, न अहम्मानी स्यात्, न अदक्षः नाक्षिणो नाऽसूयकः, न ब्राह्मणान् परिवदेत्, न वृद्धान् न गुरून् न गणान् न नृपान वा अधिक्षिपेत्, न च अतिनूयात्।

न कार्यकालम् अतिपातयेत्, न अपरीक्षितम् अभिनिविशेत्, न इन्द्रियवशगः स्यात्, च चञ्चल मनः अनुधावयेत्, न बुद्धीन्द्रियाणाम् अतिभारम् आदध्यात्, न च अतिदीर्घसूत्री स्यात्। इति"

आत्मन प्रतिकूलानि परेषा न समाचरेत्।

(महाभारतम्)

पन्था देयो ब्राह्मणाय गवे राज्ञे ह्यचक्षुषे।
वृद्धाय भारतप्ताय गर्भिण्यै दुर्बलाय च॥

(बौधायनधर्मसूत्रम्)

पश्यन्तु, कीदृशा मानवमात्रस्य श्रेयस्कल्याण साधका अमूल्या उपदेशा इमे सन्ति। यदि ईदृश सर्वाङ्गसुन्दरो निखिलजनमनोहर उभयत्र च धार्मिक हित करो व्यवहार स्यात् तदा सर्वेषा सदा सामाजिक जीवन सर्वथा सुखमय स्वास्थ्यमय सम्मानमयञ्च सपद्येत। अत शिष्टजनाना सङ्गेन, गुरुजनानाम् उपदेशेन, एतद्विषयकानाम् पुस्तकाना पठनेन च तथा स्वकीय अभ्यास. कर्तव्या यथा एकमपि कार्य शिष्टाचारविरुद्ध न जायेत। तत एव वयमपि समाजे शिष्टजनोचित समादर लब्धु समर्था भविष्याम'।

ईश्वर-भक्तिः।

मनुष्याणा सासारिक-सुखलाभाय यथा धनादीना सुखसाधनानाम् आवश्यकता अस्ति तथैव आध्यात्मिक सुखलाभाय ईश्वराऽराधनस्यापि

आवश्यकता अस्ति ? अथवा यथा ज्वरादिरोगाणां विनाशाय औषधानाम् आवश्यकता भवति तथैव जनन मरणादि रोगाणां नाशाय ईश्वराराधनस्यापि प्रयोजन भवति । मानवजाते लौकिकस्य वा कल्याणस्य सिद्धये शास्त्रेषु यावन्ति कर्माणि निर्दिष्टानि सन्ति तेषु ईश्वराऽराधन मुख्यतम कर्म अस्ति । सर्वे वेदा , सर्वाणि शास्त्राणि, सर्वा उपनिषद , अथवा समस्तमेव आर्यसाहित्य मानवकल्याणाय ईश्वराराधनस्य महतीम् आवश्यकता प्रतिपादयति । नरो भवेत् नारी वा, ब्राह्मणो भवेत् चाण्डालो वा, महापण्डितो भवेत् मूर्खो वा, सर्वैरेव स्वशक्त्यनुसार प्रतिदिन नियमपूर्वक येन केनापि प्रकारेण ईश्वराराधन कर्तव्यम् ।

ईश्वराराधनेन अनेके लाभा सन्ति । प्रतिदिन नियमेन यदि ईश्वराराधन विधीयेत तर्हि मन शान्ति, चित्तैकाग्रता, धर्मबुद्धि , आत्मिकशक्तिवृद्धि , इन्द्रियसयमश्चेति बहवो लाभा भवन्ति । ईश्वराराधनेनैव जनन मरणादिना मुक्तो भूत्वा मानवो मोक्षमपि लब्धु शक्नोति । जगतो द्वैदिनकात् आनन्दात् परमानन्द सागरे अवगाहन कर्तु शक्नोति । आराधनेनैव यः कोऽपि नरो नारी वा ब्राह्मण शूद्रो वा आत्मनो जीवनस्य अन्तिमम् उद्देश्य पूरयितु शक्नोति । ईश्वराऽराधनेनैव अतीतकालस्य वर्तमानकालस्य च अनेके मानवा जनन-मरण-बन्धनात् मुक्तिपद प्राप्ता । अत अन्यानि सर्वाण्यपि कार्याणि कुर्वद्भि अस्माभि सहैव दैनिकरूपेण ईश्वरोपासना अपि कर्तव्या एव ।

अन्यच्च ईश्वरेण अनन्ता उपकारा कृता अस्माकम् । ईश्वरस्यैव कृपया वय तथाभूत मानवशरीर लब्धवन्त इम यस्य सुरा अपि कामना कुर्वन्ति । यदि ईदृश सर्वाङ्गपूर्ण सकल-साधना मूलम् अमूल्य शरीर न अमिलिष्यत् तर्हि कथमिव वय सासारिक सुख भोक्तु समर्था अभविष्याम कथ च वा साधनाऽराधनाभ्या मोक्षरूप परम पद प्राप्तु अवसरम् अलप्स्यामहे । अस्माकं रक्षाये हिताय च परमेश्वरेण ये ये उपाया विहिता यानि यानि च वस्तूनि उत्पादितानि तदपि सर्वम् अवर्णनीयमेव अस्ति ।

स एव अस्माकं गर्भे रक्षा करोति। जननानन्तरं च स एव मातुस्तनौ पूरयित्वा अस्माकं जीवनोपाय कुरुते। अस्माकमेव भोजनाय तेन नानाविधानि अन्नानि फलमूलादीनि च सृष्टानि। रोगे सति तस्य विनाशाय विविधा औषधयोऽपि तेनैव सृष्टा। सूर्ये सन्तापः, शशाङ्के[1] ज्योत्स्ना[2], अग्नौ दाहः, जले शीतलता, भूमौ उत्पादनशक्तिश्च अस्माकमेव कार्यसाधनाय भगवता विनिर्मिता। इमानि सर्वाणि मुख साधनानि उत्पाद्य स अस्मभ्यम् एतादृशीम् एकाम् बुद्धिं दत्तवान् यस्या महीतले क्वचित् तुलना नास्ति। बुद्धिरेव तद् वस्तु विद्यते येन वयं समस्तायामपि सृष्टौ श्रेष्ठता भजामहे। बुद्धेरेव बलात् स्वल्पकायाः स्वल्पबलाश्च वयं महाकाय गज महाबलवन्त सिंह च वशीकर्तुं पारयामः। बुद्धेरेव अयं परिणामो वर्तते यत् मानवाः संसारस्य विशालतमे रङ्गमञ्चे प्रकृतिनटी यथा इच्छन्ति तथा नर्तयन्ति। यत् खलु इदानीं वयं द्वितीय ईश्वर इव जले स्थले आकाशे वा यथेच्छं गच्छन्ति, नवनवां सृष्टिं कुर्वन्ति, कर्तुं अकर्तुं अन्यथाकर्तुं च सामर्थ्यं भजन्ते तत् खलु प्रभावात्? बुद्धेरेव। ततश्च यः खलु ईदृशीं सकलकार्यसाधिकां कल्पवृक्षोपमां बुद्धिं दत्वा अस्माकं महतो महान्तमुपकारं कृतवान् तस्य यदि कदाचित् अस्माभिः आराधना न क्रियते, यदि चास्य कृतज्ञतापूर्वकं स्मरणं न विधीयते, यदि च तस्य अनन्तम् उपकारम् स्मारं स्मारं वयं अद्धा अवनतमस्तका न भवामः तदा कीदृशाः कृतघ्ना वयं भविष्यामः का च गतिं लप्स्यामहे इति सर्वैरेव विचारणीयं मनसि। कर्तारं विनैव एतत् सर्वं समुत्पन्नमिति कथनं तु सर्वथा बुद्धिविपरीतं युक्तिरहितं च अस्ति। अतो यथाशक्ति सर्वैरेव मानवैः ईश्वराराधनं कर्तव्यम्।

अथ ईश्वराराधनस्य साधारणतः त्रयो मार्गाः सन्ति। भक्तिः, स्वकर्तव्यपालनम्, अन्यैः सह सद्व्यवहारश्च। तेषु भक्तेः नवविधा मार्गेषु वर्णिता वर्तते। यथा—

१—चन्द्रमा में। २—चाँदनी।

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥

एभि श्रवणादिभिः कार्यैः ईश्वराराधनं सर्वैरेव यथाशक्ति कर्तुं शक्यते । यद्यपि शास्त्रेषु निर्गुणोपासनादयः अन्येऽपि अनेके मार्गा निर्दिष्टाः सन्ति परं ते अतीव कठिना असाध्याश्च वर्तन्ते । अत एव भगवता श्रीकृष्णेन भगवद्गीतायां प्रतिपादितं यत्—

क्लेशोऽधिकतरस्तेषाम् अव्यक्ताऽसक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥

स्वकर्तव्यपालनञ्च ईश्वराराधनस्य द्वितीयो मार्गः अस्ति । वर्णाश्रम-धर्मानुसारं यस्य यत् कर्म शास्त्रेषु निर्दिष्टं वर्तते तस्य यथावत् सम्पादनम् अपि ईश्वरस्य आराधनायाः प्रसन्नतायाश्च परमं साधनम् अस्ति । यदि कश्चित् पुरुषः स्ववर्णाश्रमधर्मानुसारं कार्याणि न कुरुते तद्विपरीतं वा आचरति तदा तस्य श्रवणेन कीर्तनेन वा भगवान् प्रसन्नो भवितुं नार्हति । यदि कश्चित् ब्राह्मणः शूद्रकर्माणि कुरुते, सन्यासी साधुः 'महन्तो' वा कश्चित् यम नियमादिसाधनरहितो गृहस्थवत् कामिनी-काञ्चनादिषु आसक्तो भवति तर्हि तस्य आक्रन्दनेनापि[3] भगवान् प्रसन्नो न भवति । बहवो जनाः वेषनिर्माणेन नामकीर्तनादिना च आत्मानं महान्तं भक्तं मन्यन्ते । रामनामाङ्कितं वस्त्रं धारयन्ति, गले अनेकाः कण्ठमालिकाः परिदधते,[4] सम्पूर्णमपि शरीरं भस्मना लेपयन्ति, विविधाकारैः चन्दनैः ललाटं भूषयन्ति, आपादलम्बिनीं जटां बिभ्रति,[5] सदैव च करमालिकां हस्ते धारयन्तो जनान्तश्च इतस्ततो भ्रमन्ति, अहर्निशं कीर्तनं कुर्वते गायन्ति नृत्यन्ति च । एतेनैव ते आत्मानं भगवद्भक्तं मन्यन्ते सर्वतश्च प्रशंसां लब्धुमिच्छन्ति । को नाम धर्मो वर्णः ? को नाम आश्रमः ? कोऽहम् ? किं मे कर्तव्यम् ? इत्यपि ते विचारं न

३—चिल्लाने से भी । ४—पहनते हैं । ५—धारण करते हैं ।

कुर्वन्ति । परन्तु अयम् ईश्वराराधनस्य मार्गो नास्ति । अत एव श्रीमद् भागवते लिखित वर्तते यत्—

वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
हरिराराध्यते पन्था नान्यस्तत्तोषकारणम् ॥

अत कीर्तनभजनादिना सहैव स्वकर्तव्यपालनस्य उपरि पूर्णरूपेण ध्यान दातव्यम् । यद्यपि इदानीं वर्णाश्रमव्यवस्था शिथिलता गता वर्तते तथापि यस्य यत्कर्म अवश्यकर्तव्य वर्तते तत्तु कर्तव्यमेव ।

एतदतिरिक्त सर्वै सह सद्व्यवहारो विश्वबन्धुत्वञ्चापि भगवदाराधनस्य सर्वधर्मसम्मत श्रेष्ठतमश्च मार्गो वर्तते । स्मरणकीर्तनादिना भक्तिं कुर्वन्नपि तथा स्वकर्तव्य पालयन्नपि यदि कश्चित् अन्यैः प्राणिभि सह सद्व्यवहार न करोति न च तेषु भ्रातृबुद्धिं भजते तर्हि स उत्तमो भगवद्भक्तो न भवितुम् अर्हति । शास्त्रेषु सर्वोत्तमो भगवद्भक्त स एव मतो[६] वर्तते य सर्वानपि प्राणिनो भगवत पुत्रान् मत्वा सर्वै सह समुचित व्यवहार कुरुते सर्वांश्च भ्रातृवत् मन्यते । य अन्येषा सुखे सुखितो भवति, अन्येषा दुःखे दुःखितो भवति, सकटे साहाय्य कुरुते, विपदो निवारयति, स एव भगवता स्वकीय सर्वश्रेष्ठो भक्त मतो वर्तते। एतद्विपरीत यदि कश्चित् सर्वमपि कीर्तनभजनादिक कुर्वाणोऽपि परेषा हर्षं विपीदति,[७] विषादे हृष्यति,[८] सहायताऽवसरे अपसरति,[९] विपत्तौ पलायते, धनम् अपहरति, वञ्चना कुरुते, असत्य वदति, निष्ठुर भाषते, दुराचरण करोति, अकारण कुपित तिष्ठति, स्वार्थं साधयति पराश्च नाशयति तर्हि न तस्य कीर्तनेन नापि केवल कर्तव्यपालनेन वा भगवान् प्रसीदति । भगवता स्वयमेव अनेकेषु अवसरेषु स्पष्ट प्रतिपादित यत् "य मदीयै सर्वैरेव पुनै सह सद्व्यवहार करोति, भ्रातृवत् वर्तते,

---

६—माना गया । ७—दुखी होता है । ८—खुश होता । ९—हट जाता है ।

न एव मम प्रियः अस्ति न एव च मां सर्वेषु दृष्टुं सक्तु या वर्तते ।
अहं सर्वेषु भूतेषु तिष्ठामि । यदि केनापि आत्मना सह कश्चित्
दुर्व्यवहारं करोति वैरं वा निर्यातति तदा स मम पूजायां विघ्नम्
करोति । तस्य पूजया अहं कदापि प्रसन्नो न भवामि । अतः ताद्यो
जनः कथमपि मम प्रियो भक्तो वा न भवति । यथा—

अहं सर्वेषु भूतेषु भूतात्माऽवस्थितः सदा ।
तमवज्ञाय मां मर्त्यः कुरुतेऽर्चां विडम्बनम् ॥२१॥
यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरम् ।
हित्वाऽर्चां भजते मौढ्यात् भस्मन्येव जुहोति सः ॥२२॥
अथ मां सर्वभूतेषु भूतात्मानं कृतालयम् ।
अर्हयेद् दानमानाभ्यां मैत्र्याऽभिन्नेन चक्षुषा ॥

अतो भगवद्वचनानुसारेण श्रीमद्भगवतः पूजायाः आराधनायाः उपासनायाः वा प्रथमः महत्त्वपूर्णो मार्गः अस्ति ।

एवम् इमे एव त्रयो मार्गा ईश्वरोपलब्धेः सन्ति । एतेषां त्रयाणां मध्यात् अनुष्ठानेन आत्मकल्याणं लोककल्याणं भगवत्प्राप्तिश्च भवितुं शक्यते । अतो यथागम्यं मानसानां येन केनचित् विधिना मार्गेण भक्तजनो भगवत् समाराधनशीलः भूयिष्ठः प्रयत्नवान् भवेत् ।

उत्पद्यन्ते तथापि जीवनस्य उपरि ससर्गस्यापि विशेषरूपेण प्रभाव: पतति। यो यादृशेन पुरुषेण सह सङ्गतिं करोति यादृशेन पुरुषेण च सह उत्तिष्ठति उपविशति, खादति पिबति, आलाप-सलापौ कुरुते तस्य तादृश एव स्वभावो भवति। सज्जनै: सह सङ्गति: भविष्यति चेत् सज्जनता आगमिष्यति, दुर्जनै सह सङ्गति भविष्यति चेत् दुर्जनता। अत एव नीतिकारा: कथयन्ति—

ससर्गजा दोषगुणा भवन्ति।

व्यावहारिके जीवने नहि एकोऽपि जनो जगति एकाकी निवसितु शक्नोति। जीवने सर्वत्रापि बहुन गमनस्य, बहुभिः सह मिलनस्य, अनेकै परिचितैऽपरिचितै सह कार्यकरणस्य आवश्यकता भवत्येव। एषु प्रसङ्गेषु प्रायश अनेके सज्जना अपि मिलन्ति दुर्जनाश्च। पर ससर्गस्य गुणदोषौ विचार्य स्वकल्याण कामयमानेन पुरुषेण सदैव सज्जनपुरुषाणामेव सङ्गति कर्तव्या न तु समीपेऽपि कदाचित् दुर्जनाना गन्तव्यम्। दुर्जनाना ससर्गो हि बहूनाम् अनर्थ-परम्पराणाम् उत्पादको भवति। दुर्जनै सह ससर्गेण विशुद्धा अपि बुद्धिः मलिनताम् उपयाति, सच्चरित्रता नश्यति, सद्गुणा दूरीभवन्ति, सम्पद पलायन्ते, सुहृज्जना अपरज्यन्ति,[1] कुल कलङ्कित भवति, सर्वत्रैव च दुर्नामता प्रसरति। ये जना दुर्जनै सह वसन्ति दुर्जनैश्च सह व्यवहरन्ति ते पदे पदे आत्मानम् अध: पातयन्ति। असत्सङ्गो नाम तादृशः पङ्किल पन्था अस्ति यदुपरि चलनेन स्खलनस्य,[2] पतनस्य, कलङ्कपङ्क लगनस्य च पदे पदे भय तिष्ठति। असत्सङ्गात् जना अविश्वासभाजनानि भवन्ति सर्वत्रैव च अपमानिता बहिष्कृता निन्दिता धिक्कृताश्च जायन्ते। यद्यपि बहव ईदृशा अपि सुहृदसंस्कारा जना भवन्ति येषामुपरि असत्सङ्गस्य कश्चित् प्रभावो न पतति तथापि साधारणलोकाः तेषामपि उपरि

१—नाराज हो जाते हैं। २—फिसलने का।

आशङ्का कुर्वन्ति एव। यथा अचौरोऽपि जनः चौरैः सह गच्छन् जनैः रक्षापुरुषैश्च चौर इति आशङ्कयते तथैव सज्जना अपि असत्सङ्गात् समाजे असज्जना एव मन्यन्ते। असत्सङ्गेन च स्वभावो यदा एकवार दूषितो भवति तदा शतशत प्रयत्नकरणेनापि स सुगमतया न अपयाति[३]। अतो बुद्धिमता पुरुषेण दुर्जनैः दुराचारिभिः अनृतभाषिभिः परदार-लम्पटैः दुःशीलैः असभ्यैः अपहरणशीलैः अविवेकिभिश्च जनैः सह कदापि सङ्गतिः न विधेया। विशेषतः स्वकीया बालका यथा दुर्जनानां दुष्टबालकाना च ससर्गं न गच्छेयुः तथा प्रयत्नः कर्तव्य। यतो हि बाल्यकाले यादृशः सस्कारो जायते स एव सुदृढो भवति। महता प्रयत्नेन च तस्य परिवर्तनम् असम्भव भवति। अतो बाल्यकाले एव अस्य विषयस्योपरि विशेषसावधानताया आवश्यकता भवति। अत एव नीतिकाराः कथयन्ति—

नच हि द्रव्यं येन येन अर्थजातेन उपदिह्यते[४] तत्तत् आचूषति[५]।

[कौटलीय अर्थशास्त्र १-१६]

अपिच यथा दुर्जनाना ससर्गेण अनेकविधा हानयो भवन्ति तथैव असद्ग्रन्थाना पठनेन, असचित्राणा दर्शनेन, असद्वार्तानाः श्रवणेन च विविधा हानयो जायन्ते। एवम्विधानि पुस्तकानि प्रकाशितानि सन्ति येषा पठनेन मनसि नानाविधा विकारा असद्विचाराश्च उत्पद्यन्ते। एतादृशानि पुस्तकान्यपि चरित्रनिर्माणे तथैव बाधकानि भवन्ति यथा असज्जनाना सङ्गतिः। अनेके नवयुवानः आदौ मातापितृभ्यो गोपायि-[६] ईदृशानि पुस्तकानि पठन्ति। पर यदा तेषा मनसः उपरि एतादृशपुस्तकानां कुप्रभावः पतति तदा ते पश्चात्ताप कुर्वन्ति। अत आरम्भशालादेव दुर्जनवत् एतादृशानि पुस्तकान्यपि परिहर्तव्यानि।

३—दूर होता है। ४—लीपा जाता है। ५—चूस लेता है, ग्रहण कर लेता है। ६—छिपा कर।

दृष्टानि च पुस्तकानि पठनीयानि येन मनसि सदैव सद्भावानां सद्विचाराणां च समुदयो जायेत चरित्र-निर्माणे च साहाय्य मिलेत्। चित्रार्थिभिस्तु अस्मिन् विषये सदैव सावधानतया स्थातव्यम्।

असद्ग्रन्थवत् असचित्राणामपि दर्शनं सर्वथा वर्जनीयम्। दर्शनानो मानसपटले चासचित्राणां यथा अनिष्टः प्रभावः पतति न तथा अन्येषाम्। रमणीयानि चित्राण्यपि झटित्येव मनोमोहनानि हृदयाकर्षकाणि च भवन्ति। अपरिपक्वबुद्धीनाम् अल्पवयस्काना बालकाना तु तत्राति विशेषरूपेण। इदं सर्वं सर्वदैव प्रत्यक्षम् अनुभवामो यत् बाह्यानि चित्राणि भवन्ति तादृशा एव भावा मनसि उदयन्ति। वीरपुरुषाणां चित्रावलोकनेन दुर्बलस्यापि हृदये वीरत्वस्य भावना जागर्ति, शृङ्गारमय-चित्राणां दर्शनेन च वीराणामपि हृदये खलु कामविकारा उत्तिष्ठन्ते। अत एव युद्धकाले सैनिकाना हृदये वीरभावोद्दीपनाय उत्साहवर्धनाय च युद्धसम्बन्धीनि चित्राणि प्रकाश्य परितः प्रदर्श्यन्ते। अतः स्वकीये निवासगृहे शयनागारे अध्ययनागारे उपवेशनशालायां[७] गोष्ठीगृहे भोजनिकेषु[८] च स्थानेषु तादृशानि चित्राणि भित्तिषु[९] लम्बनीयानि येषां दर्शनेनैव मनसि वीरतायाः करुणायाः भक्तेः राष्ट्रप्रेमाया उपकारस्य प्रीतेः धर्मस्य च शुभा भावनाः उत्पद्येरन्।

एवमेव असद्वार्तानाम् असद्गीतानाम् अनर्थात् सर्वदा दूरे रहा-तव्यम्। यत्र असज्जना नरा नार्यो वा असद्वार्ताः कुर्वाणाः खलु नर्तकीभ्य अश्लीलभावभरितानि असद्गीतानि गायन्तो भवेयुः तत्र क्षणमात्रमपि न गन्तव्यं न च किञ्चित् श्रोतव्यम्। एतेनापि मनसि नानाविधा विकारा उद्दीप्यन्ते यदा तदा भावा उत्पद्यन्ते। तत्रापि यः अवश्यको भवति स तु भवत्येव।

एवम् असत्पुरुषाणां असद्ग्रन्थानां असच्चित्राणां असद्वार्तानां असद्गीतानां च विनाशकारिणा संस्कारेण यथाशक्ति आत्मानं आत्मनो

७—बैठने में। ८—दीवालों पर। ९—लगने हैं।

चालकबालिकाश्च रक्षित्वा सत्पुरुषाणां संसर्गाय, सद्ग्रन्थानां पठनाय, सच्चरितानां दर्शनाय, सद्भजनगीतादीनां च श्रवणाय प्रयतनीयं पुरुषेण एभि उपायै सर्वेऽपि मानवा आत्मान सम्यक् प्रकारेण उन्नमयितु शक्नुवन्ति । एषु सज्जनानां संसर्गस्तु मर्त्यलोकस्य कल्पतरुः एवास्ति । अत एव भर्तृहरिणा नीतिशतके एकत्र लिखितं वर्तते यत्—

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।
कीर्तिं तनोति वितनोति च दिक्षु लब्धमां
सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥

अस्य श्लोकस्य एकैकानि अक्षराणि सर्वथा सत्यभूतानि सन्ति । सत्संगेन विद्या बुद्धिः विवेक भक्ति श्रद्धा सद्भावना सद्विचारः शान्तिः सौजन्यं चेत्यादयो गुणा एकस्मादेव मनुष्ये प्रादुर्भवन्ति । सत्सङ्गो हि एतादृश सोपानमस्ति यद्द्वारा उन्नतोन्नते अपि पदे जना निर्भय आरोढुं शक्नुवन्ति । अत एव शास्त्रेषु सत्संगस्य अतीव महत्त्वं वर्णितं वर्तते । भगवान् रामचन्द्रस्तु नवविधभक्ति-निरूपणे सतां सङ्गतिमेव प्रथम भक्ति-साधनमाह—"प्रथम भक्ति सन्तन कर संगा ।" अतो यथाशक्ति सत्पुरुषाणामेव सङ्गतिः कर्तव्या । कार्यकारणवशात् अनेके जनाः प्रति-दिन मिलन्ति सर्वैश्च यथाऽवसरं वार्तालापादिकं कर्तव्यमेव भवति परं तेषु कस्य कीदृशं चरित्रं, कीदृशः स्वभावः, कीदृशा विचाराः, कीदृशी च मनोवृत्तिः इति सर्वं सम्यक् परीक्ष्यैव तेनापि सह संसर्गः स्थापनीयः ।

ऐतिहासिककथानां पठनेन वयं सम्यगवगच्छामो यत् सत्संगप्रभावात् कीदृशाः कीदृशा निन्दिताचरणा अपि जना महापुरुषाणां पदं प्रापुः । आदिमहाकाव्य-प्रणेता महामुनि वाल्मीकिः सत्संग प्रभावादेव जीवहिंसादिकं विहाय ईदृशं जगद्वरेण्यं पदं लब्धवान् इति प्रायः सर्वे एव जानन्ति । सत्संगस्यैव च अयं प्रभाव आसीत् यत् भिल्लजातीया अकिञ्चना नारी शबरी साधनारहिताऽपि भगवतो रामचन्द्रस्य साक्षा-

दर्शनम् आतिथ्यं च कृत्वा निजजीवनं सफलीचकार। एवं बहूनि उदाहरणानि सन्ति।

यद्यपि असज्जनबहुले अस्मिन् युगे सज्जनाना प्रायेण सर्वत्र अभाव एव दृष्टिगोचरीभवति। सज्जन-दुर्जनयोः अभिज्ञान[1] साम्प्रति नितान्तमेव कठिन जात वर्तते। सज्जन वेषधारिणोऽपि जना बाहुल्येन हृदयेण असज्जना एव वर्तन्ते। तथापि यथासम्भवं सज्जनानाम् एव संगतिः कर्तव्या येन सर्वविधं कल्याण सम्पद्येत।

विद्यार्थिनां कर्तव्यम्

आर्यधर्मानुसारं मानवजीवन चतुर्षु आश्रमेषु विभक्तं वर्तते। ब्रह्मचर्याश्रमे गृहस्थाश्रमे वानप्रस्थाश्रमे सन्यासाश्रमे च। एषु यः प्रथमो ब्रह्मचर्याश्रमकालो वर्तते तस्य विद्याध्ययन मुख्य कर्म अस्ति। अस्मिन् एव काले जनाना विद्यार्थिजीवनं व्यत्येति। अर्थात् जन्मनः पञ्चमवर्षा-दारभ्य द्वाविंश[2]-चतुर्विंश[3]-वर्षपर्यन्तम् अथवा उपनयनकालादारभ्य समावर्तनकालपर्यन्त यावान् कालो विद्याध्ययने याति तावत् जना विद्यार्थिनः छात्रा वा मन्यन्ते तेषां जीवनं च विद्यार्थिजीवनं छात्रजीवन वा उच्यते।

मानवजीवने अन्यकालापेक्षया अस्य कालस्य माहात्म्यं सर्वाधिकं वर्तते। अस्मिन्नेव समये भाविजीवनस्य कृते शक्तिसञ्चयः क्रियते। जीवनस्य सफलता असफलता वा अस्यैव कालस्य उपरि निर्भरा भवति।

१०-पहिचान। २-बाईसवाँ। ३-चौबीसवाँ।

ब्रह्मचर्याश्रमो हि अन्याश्रमाणां मूलभित्तिरस्ति[४]। यथा मूलभित्तौ सुदृढायां सुनिर्मितायां तदुपरि निर्मिता सौधा[५] अपि दृढा चिरस्थायिनश्च भवन्ति तथैव प्राथमिके ब्रह्मचर्याश्रमे विद्यार्थिजीवने वा सुदृढे सुसम्पन्ने सुनिर्मिते सुव्यवस्थिते च अन्यान्यपि गृहस्थाश्रमादीनि सुदृढानि सुसम्पन्नानि सुनिर्मितानि सुव्यवस्थितानि च भवन्ति। मानवानाम् इयं प्राथमिकी परीक्षा अस्ति यस्यां समुत्तीर्णा नरा अन्यास्वपि परीक्षासु सफलतां प्राप्नुवन्ति। मानवजीवनस्य विकासाय, निर्माणाय, सफलतायै सम्पूर्णतायै च ये ये गुणा, या या साधना, यानि यानि च तत्त्वानि आवश्यकानि भवन्ति तेषां सर्वेषामपि उपार्जनस्य, साधनस्य, सम्पादनस्य सङ्ग्रहस्य च अयमेव मङ्गलमय मुहूर्तः अस्ति। जीवनस्य इयं प्राभातिकी वेला यस्मै मङ्गलमयी अभूत् तस्य समग्रमपि जीवन मङ्गलमय भविष्यति इत्यत्र नास्ति सन्देहलेशोऽपि। अत एव अयं प्रारम्भिक- काल समधिक- महत्वपूर्णं मन्यते सर्वैः।

एतत् सर्वं विचार्य मानवसमाजस्य आदि पथ प्रदर्शकैः विश्वबन्धुभिः अस्माकम् ऋषिमहर्षिभिः अस्य आरम्भिकजीवनस्य कृते यानि यानि कार्याणि निर्दिष्टानि[६] ये ये च नियमोपनियमा निर्मिता तेषामनुष्ठान विद्याधिना कृते नितान्तम् आवश्यकं वर्तते। प्रधानतया चत्वारि कार्याणि विद्याधिना कृते परमावश्यकानि सन्ति। विद्योपार्जनम्, शारीरिक शक्ति सञ्चय, नियमितता, चरित्रनिर्माणञ्चेति। अवकाशादिनानि विहाय स्वशक्त्यनुसार सर्वदैव विद्याभ्यासाय प्रयतितव्यम्। पाठ्यक्रमानुसार यत् यत् पठन लेखनं च आवश्यकं भवेत् तस्य समीचीनतया अभ्यास कर्तव्य। तदतिरिक्तं पुस्तकालयेभ्यो बाह्यपुस्तकानि आनीय[७] ज्ञान-वृद्धिः विधातव्या[८]। आलस्य चञ्चलताम् अन्यमनस्कताम् च

४—नींव। ५—महल। ६—बतलाये गये। ७—लाकर। ८—करनी चाहिये।

परिहाय तथा प्रयत्न कर्तव्या यथा पाठ्यग्रन्थाना समभ्यासे, वाह्य पुस्तकद्वारा वाह्यज्ञानसम्पादने, वक्तृत्वकलाया सुन्दरलेखने च काचि त्रुटिर्न तिष्ठेत् सर्वदैव सुसमीचीना योग्यता च सम्नर्धेत ।

विद्यातिरिक्त शारीरिकबलस्यापि समुपार्जने अस्मिन् एव समये पूर्णरूपेण ध्यान दातव्यम् । वीर्यरक्षा, दैनिको व्यायाम , खेलन कूर्दनम्, प्राणायाम , दण्डमुद्गरादिचालनम् , परिश्रमश्च एतस्य साधनानि सन्ति । एतेषामनुष्ठानेन शरीर सबल, स्फूर्तिमत्,[९] उत्साहयुक्त सुसघटित सुन्दर स्वस्थञ्च तिष्ठति । यदा च शरीर सबल स्वस्थञ्च भवति तदैव पठन, लेखन, मनन चिन्तन, कल्पना कवित्वञ्च सर्वमपि सम्यगरूपेण भवितुमर्हति । अतो बलोपार्जनेऽपि छात्रै सदा सावधानै कर्तव्यपरायणैश्च भवितव्यम् । एवमेव नियमानुवर्तिता अपि विद्यार्थिना कृते परमावश्यक वस्तु अस्ति । प्रभाते जागरणादारभ्य रात्रौ शयनपर्यन्त वहूनि कार्याणि कर्तव्यानि भवन्ति । पर सर्वेषामपि पृथक् पृथक् समयो भवति । यस्य कार्यस्य य समयोऽस्ति तस्य कार्यस्य तस्मिन् एव समये करणेन समुचितो लाभो भवति । अन्यथा करणेन तु हानिरेव सम्पद्यते[१०] । शयनकाले जागरण जागरणकाले च परिश्रमो विधीयेत[११] तर्हि स स्वस्थ न स्यात् शक्नोति न वा अन्यान्येव कार्याणि सम्यक् सम्पादयितु प्रभवति । अतो नियमितताया अपि बाल्यकालादेव अभ्यासो विधेय । अस्मिन्नेव समये यदि समयाऽनुसार कार्यकरणस्य अभ्यासो न भविष्यति तर्हि अग्रिमम्पि जीवन अनियमितमेव भविष्यति । अताऽस्मिन् एव समये सावधानता रक्षणीया । ब्राह्मे मुहूर्ते उत्थातव्यम् । प्रातरेव सर्वा स्नानसन्ध्यादिका नित्यक्रिया अनुष्ठेया । भोजन, शयन, भ्रमण, पठन, विश्रामश्च सर्वमपि कार्य यथासमय कर्तव्यम् । एव करणेनैव समयस्य सदुपयोगो भविष्यति । इद कार्यनियम् अतिरिच्य[१२] विद्याधना कृते सर्वापेक्षया अधिकम्

९—फर्तीला । १०—होती है । ११—किया जाय । १२—छोड़कर ।

आवश्यकम्, अधिक ध्यानदानयोग्यम्, अधिकहितकरं च यद् वस्तु वर्तते तत् चरित्रनिर्माणम् अस्ति, सच्चरित्रता अस्ति। मातापितृभक्ति, गुरुशुश्रूषा, मान्यजनाना सम्मान, इन्द्रियसयम, अविलासिता, सत्यभाषणम्, हितभाषणम्, मितभाषणम्, भद्रता, विनय, विवेक शान्ति, सुशीलता, दया, दाक्षिण्यम्, अलोलुपता अनुद्धता, अचौर्यम्, च इत्यादि गुणगणो चरित्रनिर्माण कियते। येषा बाल्यकाले एव चरित्र भ्रष्ट, दुश्चरित्राश्च जाता' ते आजीवन दु खिनो भविष्यन्ति अत्र कस्यापि सन्देहो न भवितुमर्हति[13]। अतो विद्याध्ययनेन व्यायामादिना च सह अस्मिन् अपि विषये पूर्णरूपेण ध्यानदान विद्यार्थिना प्रथम कर्तव्यमस्ति। वस्तुतो विद्याध्ययनस्य इदमेव फल वर्तते। इदानीं धनार्थं जना पठन्ति। पर प्राचीनकाले चरित्रनिर्माणमेव अन्यतममुद्देश्यमासीत् विद्याध्ययनस्य। अत एव शास्त्रेषु "पण्डित" शब्दस्य इद लक्षण लिखित वर्तते यत्—

मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।
आत्मवत् सर्वभूतेषु यः पश्यति स पण्डित॰॥

विचारयतां क्षण मनसि। यस्य बाल्यकाले एव ईदृशी सुबुद्धि भविष्यति स जीवने कदापि कुत्सित कर्म कर्तुं शक्नोति करिष्यति वा? स किं परदारेषु दृष्टिनिक्षेपमपि कर्तुं शक्नोति? परद्रव्याणि मृत्तिका मन्यमान एक कणमपि ग्रहीतुं शक्नोत? अथवा पिपीलिकामपि पीडयितुम् उत्सहिष्यते? इमान्येव सच्चरित्रताया लक्षणानि सन्ति येषा भवनेन[14] नरो न केवल स्वपरिवारे स्वदेशे एव प्रत्युत सम्पूर्णेऽपि विश्वे वन्दनीयो भवति। स एव सर्वोत्तमो नागरिको भवितुमर्हति। अतो विद्यार्थिभि कदापि अस्मिन् विषये असावधानता न कर्तव्या। सदैव च सद्विद्वाना सन्नेन, सज्जनाना सङ्गेन, सद्ग्रन्थाना चिन्तनेन सत्कर्मणामनुष्ठानेन च चरित्रनिर्माणाय प्रयतितव्यम्। इमानि एव चत्वारि छात्रजीवनस्य

१३—हो सकता है। १४—होने से।

प्रधानतायाणि सन्ति येषां सम्यगनुष्ठानेन सम्पूर्णमपि जीवन सफल कर्तुं शक्यते ।

प्राचीनभारते छात्रा बाहुल्येन एतेषामनुष्ठान कुर्वन्ति स्म । परं दुःखस्य लज्जायाश्च स्थल विषयो वर्तते यत् साम्प्रतिका विद्यार्थिन एतु स्वकर्तव्येषु पूर्णतया ध्यान न ददते । प्रायेण ते ज्ञानोपार्जन दृष्ट्या अध्ययन न कुर्वन्ति पर धनार्जन दृष्ट्या । अतो येन केनापि प्रकारेण परीक्षामुत्तीर्य प्रमाणपत्रं च लब्ध्वा इतस्ततो वृत्तिमन्वेषमाणा दृश्यन्ते । बलोपार्जनादपि ते उदासीना एव तिष्ठन्ति । प्रतिशत द्वित्रा एव छात्रा व्यायामादिक कुर्वाणा दृष्टिपथमायान्ति । नियमितताया: अपि ते सदा दूरे एव तिष्ठन्ति । विद्यालये गमन विहाय अन्यत् सर्वमपि कार्य प्रायेण अनियमितमेव चलति । द्विवादनपर्यन्त[15] ते "चलचित्र" दृष्ट्वा अष्टवादनपर्यन्त[16] शेरते । एवमेव अन्यत्रापि । सर्वतो महान् तेषा दोष अय वर्तते यत् ते चरित्रनिर्माणस्य उपरि अल्पमपि ध्यान न ददते । छात्रवर्गे दिने दिने सच्चरित्रताया अभाव एव वर्द्धमानो विलोक्यते । अजितेन्द्रियता, असयम , अविनय , औद्धत्यम्, गुरुजनै सह सघर्ष, विलासिता, अनारितक्यम्, क्षुद्रता, लम्पटता चेति दोषैस्तेषां जीवन अतीव दूषित मलिनताञ्च गत वर्तते । यद्यपि एतस्य अपवादभूता अपि केचन विद्यार्थिनो मिलन्ति परन्तु अधिकाश तेषामीदृश एवास्ति । भारतीयछात्राणा तु कृते अय महत्या लज्जाया विषया वर्तते । अत छात्रकार्ये सहत्यादि सस्थाभि छात्रैश्च तथा प्रयतनीय यथा ते पुनरपि पूर्वमिव ज्ञानिनो बलिना नियमिता सच्चरित्राश्च भूत्वा अन्यदेशीय छात्राणा पुरस्तात् परमोत्कृष्टम् आदर्श स्थापयेयु[17] ।

वस्तुतस्तु अस्मिन् विषये केवल विद्यार्थिन एव अपराधिनो न सन्ति । पाश्चात्य सभ्यताऽनुकारिणी शिक्षापद्धति, आदर्शहीना

१५—दो बजे तक । १६—आठ बजे तक । १७—स्थापित करें ।

ता गच्छन्ति । बल विद्या वा, सुख सम्पत्तिर्वा, यश. प्रतिष्ठा वा सर्वमपि परिश्रमसाध्यमेव वर्तते । परिश्रमो नाम मनुष्यस्य महतो महत् साधन वर्तते यद्द्वारा स लघूनि महान्ति वा सर्वाणि कार्याणि सम्पाद्य[1] सुखपूर्वक जीवितु शक्नोति । भगवता ससारे सर्वाण्यपि वस्तूनि मानवसमाजस्य सुखसाधनाय एव सृष्टानि । तेभ्य साधनेभ्यो नरा न केवल आत्मानमेव प्रत्युत सपूर्णमपि जगत् मङ्गलमय कर्तुं पारयन्ति । पर न तत् केवलम् अभिलाषमात्रेण भवितुमर्हति । तत्र परिश्रमस्यावश्यकता भवति । परिश्रम कृत्वा जनो निरर्थकमपि वस्तु सार्थक कर्तुं शक्नोति । दु खदायिनापि वस्तुना सुखोपभोग कर्तुं पारयति । दुर्लभादपि च दुर्लभ वस्तु सरलतया एव हस्तगत कर्तुं प्रभवति । अत परिश्रम एव मानवाना कृते सर्वसौभाग्यमूलमिति सिद्ध भवति ।

इदानीं जगतीतले वय सर्वत्रैव अपारमैश्वर्य पश्याम । विभिन्नदेशाना विशालानि नगराणि, गगनचुम्बिनी[2] अट्टालिका,[3] महाकायान् यन्त्रालयान् च दृष्ट्वा मनसि महान् विस्मयो जायते ! पर किम् एतत् सर्वं स्वयमेव समुत्पन्न वर्तते आकाशाद्वा भगवता पातितम् ! नहि, परिश्रमस्यैव इमा सर्वा विभूतय । बहुकालव्यापिनो बहुजनकृतस्य अक्लान्तपरिश्रमस्यैव इद सर्वं फल वर्तते यत् वय अनायासेनैव सुखोपभोग कुर्म । वय रूप्यकाणि आदाय आपणे[4] गच्छामो यथेच्छञ्च विविधानि अन्नानि कन्दफलमूलशाकादींश्च आनीय गृहे सुखपूर्वक भक्षयाम । पर कियता परिश्रमेण इद सर्वं समुत्पादित भवति ? अहो श्रमशीलता कष्टसहिष्णुता च कृषकाणाम् ! ते हि, माघमासस्य भयङ्करं शैत्य भवेत् ज्येष्ठमासस्य शरीरदाही सतापो वा, मुनिजना इव, सर्वमपि क्लेश सहमाना महता परिश्रमेण अन्नादिक समुपार्जयन्ति । प्रातरेव

१—सम्पन्न कर । २—आकाश को चूमनेवाली । ३—अटारियाँ । ४—बाजार में ।

हल गृहीत्वा क्षेत्रेषु गच्छन्ति, हल चालयन्ति, द्वितीयां कुर्वन्ति, तृतीया कुर्वन्ति, चम्बाकुर्वन्ति, बीजाकुर्वन्ति, लोष्टानि[५] भिन्दन्ति,[६] समीकुर्वन्ति शोधन च कुर्वन्ति। आगतं जातम् लुण्टके चौरै कुक्कुरशृगालादिना च क्षेत्राणि रक्षन्ति। तदनन्तर शस्यानि वृन्तन्ति, मर्दन्ति, फलेः आनयन्ति, कण्डन पवनादिना[७] च निस्तुषीकुर्वन्ति। तत तत् अन्न हाटे आगच्छति यतो वयम् आदाय गृहे आनयाम। विचारयन्तु, कियान् परिश्रमो लगति? आपणात् झटिति शर्करामादाय वयं रस रसयाम पिबामश्च। पर कियता परिश्रमेण शर्करानिर्माण भवति इति ते एव जानन्ति ये कदाचित् शर्करायन्त्रालये गत्वा तत्रत्य कार्यकलाप स्वलोचनाभ्या दृष्टवन्त सन्ति। कथनस्य तात्पर्यमिद वर्तते यत् यत्किञ्चित् ससारे ऐश्वर्य वर्तते यानि वा सुखसाधनानि सन्ति तानि सर्वाणि अपि परिश्रमेणैव समुत्पादितानि सन्ति।

परिश्रमकरणेन आत्मगौरवमपि वर्द्धते समाजे च सर्वत सम्मानः भवति। ये स्वय परिश्रम कृत्वा जीवन्ति, समुन्नतिं कुर्वन्ति, समाजे च प्रगतिं लभन्ते तथा शिर सदा आत्मगौरवेण समुन्नत तिष्ठति, तथैव आदर्शपुरुषेषु गणना भवति। ईदृशा एव पुरुषा देशस्य समुन्नायका भवन्ति। ये केचन धनिना कुले समुत्पन्ना जना पूर्वपुरुषोपार्जितेन धनेन सुख कुर्वते ये च निर्धनकुलोत्पन्ना अपि जना स्वय कठोर परिश्रम कृत्वा धनमुपार्जयन्ति तेन च सुखोपभोग विदधति तयोर्महान् भेदो भवति। अनयोर्मध्ये द्वितीयस्यैव गौरव भवति प्रशसा च। प्रथम तु कोऽपि गौरवदृष्ट्या नावलोकयति। अपरन्तु एव जना आक्षिपन्ति— अन्यापार्जितेन धनेन सुख भुक्ते। यदि स्वय परिश्रम कर्तव्यो भवेत् तदा ज्ञात भविष्यति यत् कियता परिश्रमेण धनोपार्जन क्रियते इति। पर य परिश्रम कृत्वा सुख भुक्ते न तत्र कस्यापि असूया भवति आक्षेपो वा। प्रत्युत सर्वे एव त हृदयेन प्रशसन्ति तस्य समादर च कुर्वन्ति।

५—ढेले। ६—फोड़ते हैं। ७—दँवरी ओसवनी आदि से।

परिश्रमकरणेन अन्यलाभै सह या शरीरपुष्टिर्भवति सापि महान् लाभ अस्ति। परिश्रमपूर्वक कार्यकरणेन अङ्गसञ्चालन रक्तसञ्चालनञ्च भवति येन सर्वाण्यपि अङ्ग प्रत्यङ्गानि सुपुष्टानि शोभनानि स्फूर्तिमन्ति च भवन्ति। अपरिश्रमेण जायमाना उदरविकारादयो रोगा अपि परिश्रमकरणेन विनश्यन्ति आरोग्य स्वास्थ्यञ्च अतीव शोभन तिष्ठति। परिश्रमेण हृदय एको महान् आनन्द सन्तोषश्च भवति। "अह कदापि निरर्थको न तिष्ठामि सर्वदैव परिश्रम करोमि। स्वपरिश्रमेणैव मया सर्वमिद समुत्पादितम्" एव यदा मनुजा विचारयन्ति तदा महान् आन्तरिको हर्ष परितोषश्च भवति। आत्मनिर्भरता च आयाति परिश्रमेण। परिश्रमशाला जना यदा विघ्नबाधाभि मध्ये मध्ये आहत्य माना अपि परिश्रमबलेन स्वकार्य साधयन्ति तदा तेषा मनसि आत्मनिर्भरता आयाति। आत्मविश्वासश्च समुत्पद्यते। एव परिश्रमे अनेकानेके गुणा वर्तन्ते। अत एव अस्माक शास्त्रेषु ऋग्वेदस्य ऐतरेय-आह्मणे परिश्रम प्रशसा प्रसङ्गे मानवसमाज प्रति अयमुपदेशो वर्तते यत्-

चरैवेति चरैवेति।

अर्थात् परिश्रम कुरु परिश्रम कुरु।

इतिहासज्ञ-जनानाम् अवलोकनेन ज्ञायते यत् साधारणा अपि अनेके पुरुषा स्वपरिश्रमबलेनैव महापुरुषतां प्रापुः। वर्तमानस्य रूसदेशस्य निर्माणे स्टालिन महोदयः अस्य विषयस्य प्रकृष्टतमम् उदाहरणम्। अमेरिकाया युक्तराष्ट्रस्य परिषदः सभापतिः "इब्राहीम लिङ्कन" प्रथम जीवने दरिद्र आसीत्। पर पश्चात् स एव स्वपरिश्रमबलात् राष्ट्रपते योग्यता प्राप। हेनरी फार्ड, एण्ड्र कार्नेगी प्रभृतयो जना अपि परिश्रमद्वारैव दरिद्रावस्थाता धनकुबेरा भूत्वा जगति यशस्विनो बभूवुः।

एव खलु अवर्णनीय परिश्रमस्य माहात्म्यम्। तथापि अस्माक देशे तथा परिश्रमशीला जना न उपलभ्यन्ते यथा अन्यदेशेषु। एतस्य गुणस्य न तथा भूयान् समादरः अस्माक देशे यथा अन्यत्र वय पश्याम।

अस्माक देशे अनेके ईदृशाः पुरुषाः सन्ति ये स्वकीयेन साधारणेनैव धनेन सन्तुष्टा सन्तो विशेषपरिश्रमं कर्तुं न कामयन्ते। अपि च श्रमहीनतायाः दोषो देशेऽस्मिन् तथा वृद्धिंगतो वर्तते यत् बहवस्तु जनाः किञ्चिदपि परिश्रमम् अकृत्वा इतस्ततो याचनेनैव कार्यं चालयन्ति। अत एव अस्माक देशे हृष्टपुष्टकलेवराणां भिक्षुकाणां संख्या अतीव वृद्धिं गता वर्तते। एवम्भूता अपि बहवो जना मिलन्ति ये परिश्रमकरणे स्वनिन्दां मन्यन्ते। ते यष्टिकां[८] गृहीत्वा इतस्ततो भ्रमणेन एव आत्मनो गौरवं महत्त्वं च अवगच्छन्ति। ईदृशा एव च जनाः स्वहस्तेन शौचसमये जलस्य नयनेऽपि[९] अपमानमनुभवन्ति। अत इदमपि कार्यं भृत्य एव सम्पादयति। बहवो दुःखं भुञ्जते, कष्टं सहन्ते पर आलस्यवशीभूता परिश्रमं कर्तुं न उत्सहन्ते। एवमेव परिश्रमविमुखतायाः रोगो न केवलं वैयक्तिकः अपितु सामाजिकः सङ्कटो वर्तते। गृहे गृहे अलसा जना वर्तन्ते। यस्मात् समयात् अयं दोषो भारतीयेषु समागतः तस्मादेव समयात् अस्माकं दीनतायाः दुःखस्य परतन्त्रतायाश्च प्रारम्भो जातः। अद्यावधि च वयं तेनैव दोषेण तस्मिन्नेव दुःखसमुद्रे पतिताः स्मः। तावत्कालपर्यन्तं च अस्माकं समुद्धारो न भविष्यति यावत् पुनरपि वयं अन्यदेशवत् परिश्रमशीला न भविष्यामः, स्वकार्यम् अन्यकार्यं वा परिश्रमेण मनो लगयित्वा न करिष्यामः।

धनोपार्जनं तदुपयोगश्च।

इह संसारे यावन्तो नरा नार्यो वा सन्ति ते सर्वेऽपि सुखमेव समीहन्ते न तु कदाचिद् दुःखम्। सर्वेषामयमेव इच्छा भवति यद् अहं

८—छड़ी। ९—ले जाने में भी।

सर्वप्रकारेण सुखी भूयासम्[1] । कोटिकोटिमितेषु मानवेषु एकोऽपि ईदृशो जनो न मिलिष्यति यः स्वप्नेऽपि दुःखस्य अभिलाषां कुर्यात् । परिधानाय[2] सुन्दराणि वस्त्राणि, धारणाय मणिमुक्तादि-भूषणानि, आरोहणाय[3] गजाश्वादीनि वाहनानि,[4] भोजनाय दधि दुग्ध-घृतादि-समन्वितानि भोज्यान्नानि, निवासाय सुधा-धवलितानि भव्यभवनानि, अन्यानि च सुखसाधनानि विविध वस्तूनि सर्वे एव जना अभिलषन्ति । एतदर्थमेव सर्वे दिवानिशं चिन्तयन्ति विचारयन्ति, तथा सर्वविधान् प्रयत्नान् कुर्वन्ति । परन्तु एतेषु एकोऽपि मनोरथो, यावद् धनं नास्ति, तावत् कथमपि सफलीकर्तुं न शक्यते । अत एव मानवजीवने धनस्य महती उपयोगिता वर्तते ।

जीवने धनस्य आवश्यकतायाः इयत्ता[5] नास्ति । पदे पदे धनस्य आवश्यकता वर्तते । विद्योपार्जने, धर्मकार्ये, परिवारपोषणे, यात्रायां, गृहनिर्माणे, भोजने, पाने, विवाहादौ, स्वागते, सत्कारे, भोगे, विलासे, गीते वाद्ये, यस्मिन् कस्मिन् वा विषये सर्वत्रैव धनमेव आवश्यकं भवति । धनेनैव मनुष्यः स्वार्थं परार्थं वा साधयितुं शक्नोति । यज्ञदानादिकं धर्मकार्यमपि धनं विना न भवितुमर्हति । यस्य समीपे धनं वर्तते स सर्वमपि ऐहलौकिकं सुखं भोक्तुं शक्नोति, दानादिना समाजसेवां कर्तुं शक्नोति, सत्कारेण गुणिनो जनान् अनुकूलयितुं शक्नोति, तीर्थयात्रादिना यज्ञयागादिना च पारलौकिकमपि श्रेयः सम्पादयितुं क्षमते । धनिनो जनाः समाजे सर्वैरेव सत्क्रियन्ते सर्वैरेव समाद्रियन्ते । विशेषतस्तु अस्मिन् धनप्रधाने समये यस्य समीपे धनं वर्तते स एव सर्वथा माननीयः श्रेष्ठी वरिष्ठश्च मन्यते । एतद्विपरीतं ये जना निर्धनाः सन्ति तेषां सर्वा अपि अभिलाषा मनस्येव विलीयन्ते । स्वप्नेऽपि सुखं तेषां कृते दुर्लभं

१—होऊँ । २—पहिनने के लिये । ३—चढ़ने के लिये । ४—सवारियाँ । ५—सीमा ।

भवति। अहोरात्र परिवारपोषणे ते व्यग्रा एव व्याकुलाश्च तिष्ठन्ति। कदाचित् लवणं नास्ति, कदाचित् इन्धनं नास्ति। कश्चित् प्राघुण[६] अतिथिर्वा आयाति चेत् महान् सङ्कटः समुपस्थितो भवति। ते इच्छन्तोऽपि यथेच्छं सत्कर्तुं न पारयन्ति। अन्नवस्त्रयोरेव समस्याया. तेषामवकाशो न मिलति तत् कथं ते तीर्थभ्रमणं कुर्युः. कथं वा यज्ञयागादिकमेव सम्पादयेयुः। एतादृशं जनं न परिवारः समादियते न भ्रातरः पृच्छन्ति, न जाया सेवते, न समाजः सत्कुरुते नापि सुहृद तस्य वचनं शृण्वन्ति। सर्वत एव ते अपमानिता प्रतारिता[७] विडम्बिता पृथक्कृताश्च[८] आजीवनं दुःखदैन्यमयानि दिनानि यापयन्ति।

धनस्य धनाभावस्य च अयमेव परिणामः प्रतिदिनं प्रत्यक्षीभवति। अत एव अस्माकं शास्त्रेषु सर्वेषां कृते धनोपार्जनस्य अनिवार्यता प्रतिपादिता अस्ति। वैदिकधर्मानुसारं चत्वारः पुरुषार्थाः मनुष्याणां कृते कर्तव्यतया निर्दिष्टाः सन्ति। धर्मः अर्थः कामः मोक्षश्चेति। एषु यथा धर्मसाधनं सर्वेषां कृते परमावश्यकं वर्तते तथैव धनोपार्जनमपि। अस्माकं धर्मशास्त्राणि सदैव दीनतायाः दरिद्रतायाश्च दूरीकरणाय उपदिशन्ति। सर्वैरपि जनैः धनधान्यसम्पन्नैः सुसमृद्धैः सुवस्त्रैः समलङ्कृतैश्च भाव्यमिति अस्माकं धर्मस्य सिद्धान्तः अस्ति। अतो व्यवसायः वाणिज्यम्, शिल्पकला, कृषिकर्म, राजसेवा अध्यापनञ्चेति यावन्तो धनोपार्जनस्य पन्थानः सन्ति तेषु केनापि अनुकूलेन पथा धनोपार्जनाय प्रयत्नो विधेयः।

परं यथा धनस्यावश्यकता वर्तते तथैव तस्य उपार्जने उपभोगे च सन्मार्गावलम्बनस्य अपि। धनेन सुखं भवति इति उपरि लिखितं वर्तते। परन्तु यदि समुचितरूपेण सन्मार्गेण च तस्य उपार्जनं उपभोगो

६—पाहुन। ७—ठगे हुए। ८—अलग किये हुए।

वा न क्रियते तर्हि तदेव दुःखकारणमपि भवितुमर्हति। पूर्वं जना धर्मपूर्वकं धनोपार्जनं कुर्वन्त स्म। पर सम्प्रति जना धनोपार्जने धर्मस्य अधर्मस्य वा ध्यान न कुर्वन्ति। येन केनापि उपायेन धनार्जने प्रवृत्ता सन्ति। लुण्ठनेन[10] चौर्येण, वञ्चनेन[11] उत्कोचग्रहणेन,[12] असत्यभाषणेन, भयप्रदर्शनेन, विश्वासघातेन, दायापहरणेन[13] च स्वार्थं साधयन्तो जना दृश्यन्ते। राजसेवाया,[14] भृतिकर्मणि,[15] वाणिज्ये वा सर्वत्रैव भ्रष्टाचारस्य साम्राज्य दृष्टिपथमायाति। अत एव परस्पर घृणा अशान्ति अविश्वास असन्तोष उपद्रव कलह क्लेशा हलो युद्ध च दिने दिने वर्द्धमान विलोक्यते। अतो धर्मानुसारमेव सर्वं धनोपार्जन कर्तव्यमिति भारतीयसस्कृते सिद्धान्त अस्ति।

यथा धनोपार्जने तथैव धनस्य उपभोगेऽपि ध्यानदानस्य आवश्यकता अस्ति। धनस्य हि द्विविधरूपेण सदुपयोगो भवति। भोगेन दानेन च। बहवो जना धनम् उपार्जयन्ति पर न तस्य उपभोग कुर्वन्ति नापि दानमेव ददते। ते न कदाचित् शोभन वस्त्र दधत[16] न च समीचीनम् अन्नमेव भुञ्जते। प्रभूत[17] धन राक्षवाऽपि दुःखे नैव दिनानि यापयन्ति। एवमेव ते दानमपि न किञ्चित् कुर्वन्ति। भिक्षुक दृष्ट्वा दूरादेव आनन भृकुटीकुटिल विदधति। साधून् दृष्ट्वा विलीयन्ते। सामाजिके हितकार्येऽपि एक पण[18] व्ययीकर्तु न अभिलषन्ति। एवम्भूता अनेक जना ग्रामे ग्रामे सन्ति। परन्तु अत्र शास्त्रीय पन्था नास्ति, धनस्य समुचितो व्यवहारो नास्ति। यदि धन भवेत् तर्हि तस्य सम्यक् उपभोग कर्तव्य सत्पात्रे च दान कर्तव्यम्। सामाजिकेषु कार्येषु अपि यथासम्भव सहायता कर्तव्या।

१०—लूटने से। ११—ठगने से। १२—घूस लेने से। १३—दूसरे का हिस्सा ले लेने से। १४—सरकारी नौकरी में १५—मजदूरी से। १६—धारण करते हैं। १७—पर्याप्त, काफी। १८—पैसा।

दुःखस्याय विषयो वर्तते यत् बहवो धनस्य महत् दुरुपयोगमपि कुर्वन्ति। समाजे ईदृशानामपि जनाना न्यूनता नास्ति। एतादृशा जनाः सत्कार्ये तु धन न व्ययीकुर्वन्ति परन्तु असत्कार्येषु मुक्तहस्ता भवन्ति। मादकद्रव्य-सेवने, असत्यानदाने, द्यूतक्रीडायां, गणिकानृत्यकर्मणि, पाश्चात्यढङ्ग-सत्कारे, व्यभिचारे च प्रायेण एतादृशा जना धनस्य विनाशं कुर्वन्ति। एवं प्रकारेण, न जानीमः, कियतो धनस्य प्रतिवर्षं विनाशो भवति। भारतवर्षस्य दुःखकारणेषु दरिद्रतायाश्च अयमपि एको महान् हेतुरस्ति। अतः तथा अस्माभिः प्रयत्नो विधेयो यथा कोऽपि अनुचितेषु कार्येषु धनस्य उपयोग कर्तुं न पारयेत्। यदि च कुर्यात् तर्हि तस्मै सामाजिको दण्डो दीयेत। एव च ये धनानि रक्षित्वा तस्य केवल सञ्चयमेव कुर्वन्ति न भोगं न च दानम्, तेऽपि भोगाय दानाय च प्रेरणीयाः। एव प्रकारेण यदा धनस्य उपार्जन उपभोगो व्ययश्च समुचितरूपेण भविष्यति तदैव अस्माकं कल्याणं भविष्यति देशस्य चेति मत्वा सर्वैरेव अस्या दिशि पूर्णरूपेण ध्यानं देयम्।

स्त्री-शिक्षा।

समाजस्य हिताय यथा पुरुषाणां मध्ये शिक्षाप्रसारस्य आवश्यकता वर्तते तथैव स्त्रीणामपि। यदि केवल पुरुषा एव शिक्षिता भवेयुः स्त्रियश्च अशिक्षिताः तदा न तु तयोः जीवनं सुखमयं भवितुमर्हति न च समाजस्य हितमेव। अतः पुरुषाणाम् इव स्त्रीणां शिक्षणस्यापि महती आवश्यकता वर्तते।

पुरुषाधमः चतुर्षु अपि आश्रमेषु श्रेष्ठो मन्यते। स च पुरुषाणां स्त्रीणाञ्च सम्मिलितेन सहयोगेन, पारस्परिकेण प्रेम्णा, अभिन्नेन

ऐकमत्येन च समीचीनतया चलति। परन्तु यदा पुरुष शिक्षितो भवति स्त्री च अशिक्षिता तदा न तयो स्त्रीपुरुषयो सर्वेषु कार्येषु परस्पर सहयोगो जायते, न परस्पर प्रीति तिष्ठति, नापि विचारेषु ऐकमत्यमेव भवति। उभौ अपि मार्गेण भिन्नकर्माणौ भिन्नभिन्न विचारौ भिन्नव्यवहारौ च भवत। अत उभयोरपि जीवन सुखमय सन्तोषमयञ्च न भवति। यथा वश्चित् रथ एकस्य चक्रस्य समीचीनत्वेऽपि[1] अपरस्य चक्रस्य दुष्टतया[2] सम्यक् न चलितु शक्नोति तथैव गार्हस्थ्य-जीवनमपि एकस्य शिक्षितत्वे अपि अपरस्य अशिक्षिततया पूर्णरूपेण आनन्दमय न भवति। परन्तु यदा उभौ अपि शिक्षितौ भवत तदा इयं दशा न भवति। अतो यथा वय स्वपुत्राणा शिक्षायै प्रयत्न कुर्म तथैव पुत्रीणामपि शिक्षाया उपरि ध्यानं दातव्यम्। तदैव दम्पत्यो परिवारस्य समाजस्य च यथेष्ट हित भविष्यति। अत एव शास्त्रेषु लिखित वर्तते यत्—

कन्याऽप्येव लालनीया शिक्षणीया प्रयत्नतः।

[महानिर्वाणतन्त्र]

स्त्रीणा शिक्षाया विषये अस्माक समाजे परस्परविरोधिनौ द्विविधौ विचारौ चलत। य नवीन शिक्षा दीक्षा मन्यना जना पाश्चात्य-शिक्षाया अनुकरण कुर्वन्ति ते स्वकीयाभ्यो बालिकाभ्यो न केवल साधारणीमेव प्रत्युत महतो महीयसीं शिक्षा दातुमिच्छन्ति। तेषाम् अय विचारो वर्तते यत् यथा पुरुषा उच्चशिक्षा लब्धा राजकीयकार्येषु अन्येषु वा कार्यक्षेत्रेषु उच्चपदानि लभन्ते तथैव उच्चशिक्षा लब्धा स्त्रीसमाजेनापि उच्चपदानि लब्धु शक्यन्ते। अत स्त्रीणामपि कृते साहस्या उच्चशिक्षाया प्रबन्धः कर्तव्यो येन ता पुरुषै सह प्रतियोगिता[3] कर्तुं शक्नुयु, पुरुषा इव च उच्चाऽनुच्चतरेषु पदेषु कार्यं कर्तुं

१—अच्छा होने पर भी। २—खराब होने से। ३—मुकाबला।

चम्बईनगरे अध्यापयति पत्नी च कालिकात्तायाम्। यस्मिन् समये चम्बईनगरे पत्युः शिरसि वेदना जायते तस्मिन् समये पत्नी कालिकाताया कन्दुक क्रीडन'परायणा तिष्ठति। कार्यालयात् निवासस्थानमागतं पतिः भृत्यादिना परिश्रमम् अपनोदयति* पत्नी च कुक्कुरलालनेन मनो विनोदयति। आजीवन पृथग् निवासेन कदापि तौ पूर्णं सहवाससुखं नानुभवतः। अतः पारिवारिक सुख दृष्ट्या स्त्रीणां वृत्ते उच्चशिक्षाया विशेषावश्यकता न प्रतिभाति। यद्यपि प्राचीनकाले गार्गी मैत्रेयी-प्रभृतयः कतिपया आर्यमहिला आसन्नेव विशिष्ट-मेधासम्पन्ना, पर साधारणतया उच्चशिक्षायाः प्रचारेण कश्चित् लाभो दृष्टिगोचरो न भवति।

ये च केचन पुराणाः पुरुषाः सर्वथा एव स्त्रीणां वृत्ते शिक्षायां निषेधं कुर्वन्ति, अशिक्षिता एव च ता रक्षितुम् इच्छन्ति तेषामपि विचारो भ्रान्त एवास्ति। यतो हि शिक्षाया अभावेनैव स्त्रीषु अनेके दोषा अपि दृश्यन्ते। कस्याम् श्रुतौ किं वस्तु स्वास्थ्यकरं किं च अस्वास्थ्यकरम् इति तासां ज्ञानं न भवति। अन्धविश्वासस्य भ्रान्तधारणायाः मूढाग्रहस्य च ता भाण्डागाराणि एव भवन्ति। सर्वदैव विवदन्ते, प्रतिक्षणं कलहायन्ते, पदे-पदे शपथं कुर्वन्ति, मुहुर्मुहुः अश्लीलशब्दान् उच्चारयन्त्योऽपि न सङ्कुचन्ति न च लज्जन्ते। शिक्षा विनैव ता देशकालयोः वर्तमानपरिस्थितेः सर्वथा अपरिचिता भवन्ति।

अनेन कारण-समुदायेन स्त्रीणां शिक्षणे तु "ननुनच" करणं कापि आवश्यकतैव नास्ति। पर कीदृशी शिक्षा देया इति विषयमेव विचारणीयो वर्तमानसमये। पाश्चात्यदेशानाम् आदर्शानुसारं या शिक्षा प्रचाल्यमाना अस्ति सा तु नितरामेव हानिकरी वर्तते स्त्रीणां कृते। न अनया शिक्षया स्त्रीषु भारतीया आदर्शा एव आगन्तु

७—दूर करता है।

शक्नुवन्ति, नापि ता गृहकार्यकुशला एव भवितुमर्हन्ति । अतो वर्तमान-शिक्षापद्धतौ परिवर्तनं विधाय स्त्रीणां कृते तथाविधायाः शिक्षायाः प्रबन्धः कर्तव्यो यथा ता इतिहास-भूगोल-गणित-स्वास्थ्यादिविषयैः सह पारिवारिकीमपि शिक्षां प्राप्नुयुः । अन्यभाषाभिः सह तासां कृते साधारणी संस्कृतभाषाया अपि शिक्षा देया येन शास्त्रपुराणादीनां पठनेन स्तुति-प्रार्थना-पूजादिना च भारतीयसभ्यतायाः सरक्षणं प्रचारं चापि कर्तुं शक्नुयुः । सहैव पाकविद्यायाः धात्रीविद्यायाः सीवनादि-ललितकलायाः कृषिविद्यायाश्च शिक्षणं कर्तव्यं येन गृहकार्य-सञ्चालनेऽपि ताः सुविचक्षणा भवेयुः । प्रत्येककन्यायै एतादृशी शिक्षा देया येन सा आदर्शभगिनी आदर्शगृहिणी आदर्शजननी च सम्पद्येत । एतादृशी एव स्त्रीशिक्षा स्त्रीणां पुरुषाणां परिवारस्य समाजस्य राष्ट्रस्य च कृते हितावहा कल्याणकरी च भवितुमर्हति । अतः सम्प्रति तथा प्रयत्नः कर्तव्यो येन सर्वत्रैव स्त्रीशिक्षायाः प्रचारः स्यात् स्त्रियश्च शिक्षिताः सत्यो गृहस्य राष्ट्रस्य च भूषणानि भवेयुः ।

धार्मिकेषु विषयेषु अपि तासां सर्वथा भ्रान्तमेव ज्ञानं वर्तते । अधर्ममेव धर्मं मन्यमानाः ताः पदे पदे धूर्तजनैः पाखण्डिभिश्च वञ्चिता भवन्ति । एवं च शिक्षां विना प्रायेण तासाम् अभद्रमेव रूपम्, अभद्रा एव वाचः, अभद्र एव व्यवहारः, विपरीता एव च विचारा भवन्ति । एभिश्च दोषैः न केवलं ता आत्मानमेव दूषयन्ति अपि तु समाजमपि । अतः स्त्रीशिक्षायाः प्रचारः सर्वथा परमावश्यक इत्यत्र नास्ति सन्देहा-वसरः । अशिक्षिताः स्त्रियो बालक-बालिकादीनामपि अशिक्षायाः कारणानि भवन्ति । यतो हि माता एव प्रथमो गुरुर्भवति बालकबालिका-नाम् । तासां क्रोडः एव च प्रथमा पाठशाला । अस्यामेव पाठशालायां प्राथमिकीं शिक्षां लभन्ते सर्वेभ्यो मानवेभ्यः । परं यदा अशिक्षिता

८—गोदी ।

मातरो भवन्ति ताश्च ता बालकेभ्यः शिक्षा दातुं शक्नुवन्ति, न ता सत्पथे एव तान् प्रवर्तयितुं क्षमन्ते। प्रत्युत मातृदोषेण तेऽपि दुर्वि स्वभावा अपन्मार्गगामिनो दुराचाराश्च भवन्ते। एतद्विपरीते तु मातरः शिक्षिता भवन्ति ता निजगन्तवीः शैशवादेव[9] शिक्षयन्ति सदाचारान् उपदिशन्ति, सत्पथे प्रवर्तयन्ति, दुरभ्यासान् दूरीकुर्वन्ति महापुरुषाणां च चरितानि श्रावयित्वा[10] तेषु सकरिवतायां महत्त्व च भावं भरन्ति। एतादृशा एव च बालका अग्रे गत्वा समाजः आदर्शपुरुषा भवन्ति।

देशप्रीतिः

सर्वेषामपि मनुष्याणां हृदये स्वस्वदेशस्य रक्षायाः समुन्नतेः सत्तत्वायाश्च या भावना भवति सा एव देशप्रीतिः देशभक्तिः इति वा कथ्यते। इयं च भावना लाभाधिकी भवति सर्वेषाम्। यस्मिन् देशे मनुष्यो जन्म गृह्णाति, यस्य देशस्य अन्नेन जलेन वायुना च अयं जीवति वर्धते परिपुष्टश्च भवति न प्रति तस्य जन्मन एव नैसर्गिकः स्नेहो जायते। तस्य देशस्य वनोपवनानि, सरितः सरोवराः, गिरयः पर्वताः, पशवः पक्षिणो लता विटपादयश्च दृष्ट्वा तस्य चेतसि आनन्दं समुत्पादयन्ति। एतद्देशस्य कथोपकथासु, प्राचीनपरम्परासु, आचारविचारादिषु, रीतिनीतिषु, क्रीडाकौतुकेषु च यथा आत्मीयता जायते सा तथा स्नेहातिशयश्च जायते न तथा अन्यदेशस्य। सुखे दुःखे वा यदेशबान्धवैः सुहृद्भिः सर्वं जन्मन एव सहवासात् तेषु सहानुभूतिः स्वभा-

---

९—लक्ष्यन्ते हि। १०—सुनाद्वा।

रितायाः समतायाः पक्षपातस्य च दृढा भावना भवति । अत एव स्वदेशं प्रति मानवाना प्रीतिः सहजा स्वाभाविकी च ।

अस्याश्च स्वदेशप्रीतेः समये समये सर्वेषामेव अनुभवो जायते । जीवने बहवः किल एवम्विधा अवसरा आयान्ति यदा हृदयं स्वदेशप्रेम्णा विह्वलता प्रयाति । केनापि हेतुना परदेशे गच्छतः पुरुषस्य स्वदेशत्याग-समये कश्चित् अवर्णनीयः स्नेहातिशयो हृदयं व्याकुलीकुरुते । चिर-प्रवासानन्तरं च पुनः सम्मिलितेषु स्वबन्धुषु अवलोकितेषु च स्वदेशीय-गिरिनदी पुरग्रामेषु अपूर्वेण आनन्देन महता च समुल्लासेन हृदयं गद्गदं भवति आत्मानं च जना विस्मरन्ति । लङ्कायाः परावर्तनकाले स्वदेशस्य चिरवियुक्तानि वस्तूनि सतृष्णं समवलोक्यमानायाः सीतायाः हृदयं कियत् आनन्दितम् आह्लादितं च भवति इम इति कविकुलशिरो-मणिना वाल्मीकिना स्वकीये रामकाव्ये रघुवंशे अतीव समीचीनरूपेण वर्णितं वर्तते । भगवान् रामचन्द्रः स्वयमपि चतुर्दशवर्षानन्तरं प्रवासाद् विनिवृत्य स्वकीया जन्मभूमिम् अयोध्या, कलकलनिनादेन प्रवहन्तां मातरं सरयूञ्च विलोक्य क्षणं यत् विस्मृतमानसो बभूव तत्रापि स्वदेशानुराग-स्यैव भावनाम् अवलोकयाम ।

परन्तु एतदपेक्षया अपि स्वदेशप्रीते स्पष्टतरं स्वरूपं तदा पुरतः समायाति यदा स्वदेशस्य स्वाधीनतायाः सम्मानस्य रक्षायाश्च अवसरः समुपस्थितो भवति । तस्मिन् भयङ्करे प्राणान्तिके प्रियतम किमपि वस्तु नास्ति । परम् एतादृशे अवसरे प्राणान् अपि जनाः सहर्षं परित्यजन्ति । सैनिकाः समराङ्गणेषु आहार-विहारादिकं विस्मृत्य, क्षुधा शस्त्रप्रहारान् अविगणय्य यत् अविरतं युद्धयन्ति महता च उत्साहेन आत्मान मृत्युमुखे समर्पयन्ति तत्रापि स्वदेशप्रीतेः एव प्रेरणया । इतिहासेषु स्वदेशप्रीतेः बहूनि एतादृशानि उदाहरणानि मिलन्ति यानि पठित्वा

१—युद्ध न समझ कर ।

श्रुत्वा च मनसि महान् आनन्दः समुत्साहश्च जायते। स्वदेशप्रीतेरेव प्रभावेण पुरुराजो महाबलवतः अलक्षेन्द्रस्य विजययात्रायां विघ्नं समुपस्थापितवान्। महाराणाप्रतापस्य चित्तौररक्षायै आत्मविसर्जनम्, छत्रपतेः श्री शिवाजीवस्य गिरिगह्वरेषु भ्रमणम्, पृथ्वीराजस्य च मुहम्मद-गोरी नामकेन यवनराजेन सह युद्धं कृत्वा प्राणपरित्यागः स्वदेशप्रीतेरेव उत्कृष्टतमम् उदाहरणम् अस्ति। राजपुत्राणां मातःस्मरणीया वीराङ्गनाः स्वहस्ताभ्यां पतिपुत्रौ अस्त्रशस्त्रादि-सुसज्जितौ कृत्वा समरक्षेत्रे स्वयमेव प्रेषयामासुः। यच्च लक्ष्मीबाईं प्रभृतयो वीरयुवतयः अन्ततः स्वयमपि युद्धक्षेत्रे अवतीर्य भयानकं युद्धं चक्रुः तत् स्वदेशस्यैव प्रेम्णा। स्वदेशस्यैव प्रेम्णा विगते रूस-जापान युद्धे अनेका जापानदेशीया महिला आत्महत्यां कृत्वा स्वकीयपुत्राणां युद्धयात्रा निष्फलां कृतवत्यः। सम्प्रति भारते अपि स्वतन्त्रताप्राप्तये सहस्राधिका नवयुवानो जीवनं ददुः, अनेके राजनीतिका नेतारो जीवनपर्य्यन्तं कारावासदण्डं प्राप्ताः, शताधिकाः क्रान्तिकारिणो जीवनमोहं परित्यज्य सहर्षं मृत्युम् आलिङ्गितवन्तः, लक्षलक्षाः स्वयंसेवकाः पशुमार्गं मारिताः, सचीव नाशिता अनेके परिवाराः, बद्धश्च निर्वासिताः[२]। अस्माकं हृदयसम्राट् नेताजी सुभाषचन्द्र बोसः सर्वस्यापि सांसारिक सुखस्य उपरि पादप्रहारं कृत्वा, आजीवनं च ब्रह्मचर्यव्रतं धृत्वा लोकोत्तरं कार्यं कृतवान् अन्ते च विदेशेषु स्वकीयान् प्राणान् उत्सृष्टवान्। तत्र किं निमित्तमासीत्? अहमेव हृदये प्रज्वलन्ती देशसेवाया भारतमातुश्च स्वतन्त्रतायाः भव्यभावना एव।

एतत्सर्वं विलोक्य विचार्य च स्वदेशप्रीतेः भावना कीदृशी रागात्मिका प्रबला च भवति इति सुगमतया एव अवगन्तुं शक्यते। अयं प्राणिनां जन्मसिद्धः स्वभावः, कर्तव्येषु परमोत्तमं कर्तव्यं, धर्मेषु सर्वश्रेष्ठो धर्मश्च अस्ति। स्वदेशप्रीत्या स्वदेशार्थं प्राणदानेन च न केवलं स्वदेशस्यैव रक्षा गौरवं वा भवति अपि तु आत्मनोऽपि मनसि महान्

२—देश से बाहर निकाल दिये गये।

उल्लासो भवति, स्वाभिमानस्य भावना जागर्ति, जन्मभूमे आशीर्वादो मिलति मरणानन्तरं च अक्षया लोका लोकोत्तरा च कीर्ति इति अनेके लाभा गुणाश्च सन्ति स्वदेशप्रीतेः ।

इयं च स्वदेशप्रीतिः न केवलं युद्धद्वारा राजनीतिकेन आन्दोलनेन एव वा प्रकटयितुं शक्यते । शान्तिसमये अपि साहित्य निर्माणेन, वाणिज्यव्यवसाय विस्तारेण, शिल्पकला समर्द्धनेन, शिक्षाप्रसारेण, नवनवपदार्थानाम् आविष्कारेण च स्वदेशस्य समुन्नतिः क्रियते साऽपि स्वदेश प्रति गाढानुरागस्यैव कारणात् । अतो युद्धकाले युद्धं कृत्वा, क्रान्तिकाले आन्दोलनेन, शान्तिसमये च साहित्य विज्ञानादि विस्तारद्वारा स्वदेशसेवाकरणं सर्वेषामपि मानवानां परमं कर्तव्यमिति विषये नास्ति मतभेदस्य कृते अवसरः । अतएव सम्प्रति सर्वेऽपि भिन्नभिन्न देशवासिनो जनाः स्वदेशभ्रम-परवशीभूता अहोरात्रं स्वदेशसेवायै स्वदेशरक्षणाय स्वदेशगौरव वर्द्धनाय च बद्धपरिकरा दृश्यन्ते ।

परन्तु स्वदेशप्रीतिः एव प्रीतेः अन्तिमा सीमा नास्ति । स्वदेश प्रीत्या सहैव यदि जनः सम्पूर्णेऽपि संसारे प्रीतिविस्तारं कुर्यात् तदा स इतोऽपि समधिकं जगतः कल्याणं कर्तुं पारयति । स्वदेशवासिना कल्याणं साधयन्तो जनाः यदि भौगोलिकं सीमानम् उल्लंघ्य समस्तेनापि विश्वेन सह स्नेहं सम्बन्धं च स्थापयेयुः, सर्वेषामपि मानवानां हितचिन्तनं कुर्युः, समग्रा च मानवजातिः एकस्मिन् स्नेहसूत्रे बध्नीयुः तर्हि न केवलम् एकस्यैव देशस्य प्रत्युत सर्वेषामपि देशानां समस्तायाश्च मानवजातेः महान् उपकारः सम्पादितः स्यात् ।

परं साम्प्रदायिकतायाः स्वार्थभावनायाश्च प्रबलया वायया[३] विश्व बन्धुत्वस्य सर्वसुखप्रदः विशालवृक्षः सम्प्रति समूलम् उन्मूलित इव सञ्जातः वर्तते । सर्व एव सम्प्रति केवलं स्वदेशस्यैव समुन्नति साधने

३—आँधी से ।

सलग्ना सन्ति। स्व स्वदेशहितसाधनार्थम् अन्यदेशानां विनाशकरणे कस्यापि सङ्कोचो नास्ति। दुर्बलस्य उपरि आक्रमणाय सबला देशाः सततमेव अवसर प्रतीक्षमाणाः सन्ति। विश्वशान्ते प्रचारं कुर्वतोऽपि स्वकीयसाम्राज्यस्य विस्तारलोभात् मुक्ता न सन्ति। अत एव जगति सर्वत्रैव महीयसी युद्धज्वाला, भयङ्करो रक्तपात, सुमहान् सर्वनाशः, विपुलश्च विप्लवो दृष्टिगोचरो भवति। अनेकानि सुखसाधन सम्पन्नितानि नगराणि श्मशानभूमिता गतानि सन्ति। अतो देशप्रीत्या सह विश्वप्रीतेरपि प्रचारस्य महती आवश्यकता वर्तते।

आशास्महे स्वतन्त्रता प्राप्त सम्प्रति भारतवर्ष एव पुराकाल इव भूयोऽपि समस्ते जगतीतले विश्वप्रीते विश्वबन्धुत्वस्य च विस्तार करिष्यतीति।

ग्रामोन्नति-योजना

अस्माक देशो ग्रामप्रधानदेश अस्ति। अत्र ग्रामाणां सङ्ख्या प्रायशः सप्तलक्ष परिमिता वर्तते। देशस्य प्रतिशत नवतिर्जना[1] एव ग्रामेषु निवसन्ति। अत एव इद निश्चित वर्तते यत् ग्रामाणा समुन्नत्या एव भारतवर्षस्य वास्तविकी समुन्नतिः भवितुम् अर्हति।

परन्तु दौर्भाग्यवशात् अस्माक ग्रामाणा दशा सम्प्रति नितान्तमेव दयनीया वर्तते। सुख शान्ति-पूर्वक जीवनयापनाय येषा साधनाना-मावश्यकता भवति तेषा ग्रामेषु सर्वथा अभाव एव दृश्यते। ग्रामीण जीवन सम्प्रति सर्वप्रकारेण नीरस निरानन्द कष्टबहुलञ्च सञ्जात वर्तते। सर्वेरपि जीवनोपयोगिभि साधनोपादानै वञ्चिता ग्रामीण जनता

१—दुबल पतल। २—नब्बे आदमी।

कियता कष्टेन कालं नयति इति ते एव ज्ञातुं शक्नुवन्ति येषां द्वित्राणि अपि दिनानि ग्रामवासस्य अवसरो मिलित स्यात् ।

मानवजीवनस्य कृते शिक्षायाः सर्वाधिकं महत्त्वं वर्तते । अत एव सर्वेऽपि विभिन्नदेशवासिन पुरुषा निज निज देशेषु शिक्षाया प्रसारस्य उपरि सर्वाधिकं ध्यानं दत्तवन्त सन्ति । तस्यैव इदं फलं वर्तते यत् तेषु देशेषु क्वचित् प्रतिशतं नवतिं, क्वचित् पञ्चनवतिं ° क्वचित् च अष्टा-नवतिं ° जना शिक्षिता जाता सन्ति । परन्तु अस्माकं देशस्य ततः सर्वथा विपरीता दशा वर्तते । तत्रापि ग्रामेषु विशेषत । अत्र अभिरुचेः उत्साहस्य साधनानां च अभाववशात् प्रतिशतं दश द्वादश पञ्चदश अपि जना कठिनतया साक्षरा सञ्जाता सन्ति । न तु एतावतोऽपि सम्यक् रूपेण शिक्षिता । दूरे दूरे पाठशाला सन्ति । जनता शिक्षायाः महत्त्वं न जानाति । दरिद्रता पृथगेव दण्डम् आदाय मार्गे विघ्नबाधा उपस्थापयन्ती तिष्ठति । काष्ठपट्टिका[४] अपि न मिलन्ति बालकेभ्यः का पुनः कथा शुल्कदानस्य ? परिणामं तस्य अयं वर्तते यत् बालका बाल्य कालादेव प्रातः क्षुरम्[५] खुदालं[६] च गृहीत्वा कृषिकर्मणि प्रवृत्ता भवन्ति, अपराह्णसमये गोमहिषीं[७] चारयन्ति, अवशिष्टं च समयं कलहे कोला हले वृथालापे शयने आखिदने "सुर्तातमाकू"-भक्षणे च यापयन्ति । य समयो विद्यार्जनस्य ज्ञानसञ्चयस्य च भवति स समयो गच्छति तेषां घासकर्तने[८] बकरीचारणे[९] इतस्ततो भ्रमणे च । अत प्रायेण बहव ग्रामीणजना आजीवनं अक्षरज्ञान रहिता एव तिष्ठन्ति । अत एव च न तेषां स्वकर्तव्यज्ञानं वर्तते नापि अधिकाराणाम् । अत एव च ते पदे पदे शासकैः पीड्यन्ते, अधिकारिभिः अपमन्यते धूर्तजनैश्च वञ्च्यन्ते । इयमेव दशा वर्तते ग्रामेषु शिक्षायाः ।

२—पचानवे । ३—अठानवे । ४—काठ की पटरी । ५-खुरपा । ६-कुदारी । ७—गाय भैंस । ८-घास काटने में । ९-बकरी चराने म ।

द्वितीय मानवजीवनस्य कृते आवश्यक वस्तु वर्तते स्वास्थ्यम्। अस्यापि महती न्यूनता वर्तते। तत्र अनेकानि कारणानि सन्ति। प्रथमन्तु स्वास्थ्य-सम्पादने ज्ञानमेव नास्ति सर्वेषाम्। द्वितीयतो दारिद्र्यवशात् स्वास्थ्यकर भोजन न मिलति। तृतीयत तेषा गृह, द्वार, पार्श्वत तिस्रो भूमि', पशुबन्धनस्थानम्, वृथतडागादीना जलम्, ग्राममार्गा, जलनिस्सरण'' चेति सर्वमपि अस्वच्छ, स्वास्थ्यहानिकर च भवति। न केवलम् एतावदेव। शरीर वस्त्र चापि बहवो मलिनं धूलि धूसरित दुर्गन्धपूर्ण च सन्ति। शौच स्नानादीना कृते निर्मला न भवति। स्थले स्थले च अवकरा'' निक्षिप्ता दृश्यन्ते। बालका यत्रैव इच्छन्ति तत्रैव विष्ठा कुर्वन्ति। एभिरेव कारणै ग्राम्यजना' स्वास्थ्यसम्पत्ते: अपि वञ्चिता एव सन्ति।

तृतीय जीवनस्य साधन वर्तते अन्न वस्त्र च। यदि उदरे अन्न शरीरोपरि वस्त्र च न भवेत् तदा कथ कथित् जीवितु शक्नोति कथ च किञ्चित् कार्य कर्तुम्? परं ग्रामेषु अनयोरपि यादृशी न्यूनता वर्तते सा सर्वथा वर्णनातीता अस्ति। अन्नवस्त्रयोः यथा कष्ट अस्माक ग्रामीणा जना अनुभवन्ति तद् दृष्ट्वा कस्य सचेतसो हृदय द्रवभूत लोचने च अश्रुपरिप्लुते न भविष्यत:? अनेके ईदृशा ग्रामवासिन सन्ति ये कदाचित् एकवारमेव भुक्त्वा, कदाचित् अर्धोदर'' भुक्त्वा, कदाचित् सक्तू पीत्वा, कदाचित् इक्षुदण्डम्, चूषित्वा, कदाचित् कन्दान् भक्षयित्वा सर्वभावे च कदाचित् निराहारमव स्थित्वा दिनं यापयन्ति। इतोऽपि दयनीया दशा तु वर्तते तेषा धनानां यै गोमयेभ्यो'' गोधूमान् एकैकशो निःसार्य'' कदाचित् रोटिकाभक्षणस्य अवसर लभन्ते। दिने भोजन मिलति चेत् रात्रौ नहि, रात्रौ मिलति चेत् दिने नहि। कदाचित् च उभयोः अन्नयो उपवास।

११—पानी का निकास। ११—कूड़ा, कबाड़। १२—आधा पेट। १३—गोबर से। १४—निकालकर।

ये ग्रामेषु समीचीना गृहस्था मन्यन्ते तेषामपि गृहे द्विदल[15] वर्तते चेत् शाकस्य अभावः। का पुनः वार्ता दध्नो दुग्धस्य अथवा घृतस्य? एतमेव वस्त्रस्यापि महत्कष्टं भवति। ग्रामधनाना कृषकाणा कस्यापि गृहे पर्याप्तं वस्त्रं नास्ति। एकेनैव वस्त्रेण बहव कार्यं चालयन्ति। अनेके स्त्रीपुरुषा माघमासस्य भयानके शीते[16] एकमेव वस्त्रं नीचैः उपरि च कृत्वा कालरात्रिं यापयन्ति। अहहा! का नाम दशा वर्ण्यते तासा ग्रामयुवतीना यासाम् एका एव शाटी[17] वर्तते। साऽपि सहस्रच्छिद्रा। सीवनाय[18] सूची[19] मिलिता चेत् दोरकस्य[20] अभाव! अनेकधा यतमाना[21] अपि अङ्गानि गोपायितु अशक्नुवन्त्या दरिद्रतायै लज्जाम् उपायनीकृत्य[22] यथाकथञ्चित् कार्यं सञ्चालयन्ति। अभागा देव कृषकजना वस्त्राणा रक्षणे[23] सम्पादनेऽपि असमर्था भवन्ति। एकमेव वस्त्रं ते धारयन्ति[24] रजकगृहे ददन्तु अथवा धारयन्तु। अत एव तेषा वस्त्राणि मलिनतायाः स्वेदस्य[25] यूकादीनाञ्च[26] निवास-स्थानानि भवन्ति। कियती वर्णना क्रियताम्? अन्न वस्त्रयो कष्टस्य इयत्ता नास्ति।

अन्न वस्त्राणीनाम् उत्पादनस्य साधन वर्तते कृषि। कृषा न केवल ग्रामीणा एव जना जीवन्ति प्रत्युत सम्पूर्णस्यापि देशस्य जीवन कृष्या उपरि एव निर्भरं वर्तते। नगरेषु महामहान्तो धनसम्पन्ना जना[27] सन्ति। ते सौधेषु[28] निवसन्ति, गद्दिकासु[29] शयनं कुर्वन्ति, यानेषु चलन्ति, बहुमूल्यानि वस्त्राणि धारयन्ति, महतो महान्ति च कार्यभा-रानि[30] चालयन्ति परं जीवनाय तेषामपि कृते अन्नस्यैव आवश्य-कता वर्तते।

१५—दाल। १६—जाड़े में। १७—साड़ी। १८—सीने के लिये। १९—सुई। २०—डोरे का। २१—प्रयत्न करती हुई भी। २२—भेंट कर। २३—धोने के लिए। २४—पहनने का। २५—ऊँ आदि का। २६—महलों पर। २७—गद्दियों पर। २८—कारखाने।

परं कृषिकार्यमपि ग्रामेषु सम्प्रति साधनाऽभावात् अनेकविधकाटिन्याच्च सम्यक् प्रकारेण न भवति। बलीवर्दानाम् अभावात् सम्यक् कर्षणं न भवति क्षेत्राणाम्। समीचीनानि बीजानि न मिलन्ति। क्षेत्राणाम् उत्पादनशक्ति-वर्द्धनाय तेषु पर्याप्तं "खाद्यम्" अपेक्ष्यते परन्तथापि अभाव एव वर्तते। गोमयैः बहुधा इन्धनकार्यं चलति। यानि वैज्ञानिकानि साधनानि विदेशेषु प्रचलन्ति तेषामपि अत्र प्रचारो नास्ति न च वैज्ञानिकी प्रक्रिया एव अवगता वर्तते अधिकानाम्। एवं न सम्यक् प्रकारेण सम्प्रति कृषिर्भवति न च पर्याप्तमन्नं समुत्पद्यते। तेन सम्प्रति यादृशी दशा गताः हन्त सा सर्वेषामपि प्रत्यक्षा एवास्ति।

इमानि एव ग्रामाणां वर्तमानायां दुर्दशायाः मुख्यानि कारणानि सन्ति। एतद्व्यतिरिक्तम्—गोवंशस्य दिने दिने वर्द्धमानो ह्रासः, अभियोगप्रियता[१], ऋणभारः, पारस्परिकं मनोमालिन्यम्, पक्षपातः, सहानुभूतेः सहकारितायाः राष्ट्रियभावनायाश्च अभावः, शिक्षितानां ग्रामनिर्माणे उदासीनता च अस्या दयनीय-परिस्थितौ हेतवः सन्ति।

एभिः कारणैः ग्रामा ग्रामीणजनाश्च कीदृशीं दयनीयां दशां प्रापिताः सन्ति इति ग्राम-परिचितानां विरोहितः[२] नास्ति। जीर्णशीर्णानि गृहाणि, स्खलत्पदानि क्षेत्राणि, कृशकलेवरा वस्त्रावृताः, अर्धनग्नाः स्त्रियः, अनशनविलष्टा बालकाः, दुर्गमाः सङ्कीर्णाश्च मार्गाः, क्वचित् क्षुधा-पीडितानां रोदनम्, क्वचित् रोगार्तानां क्रन्दनम्, क्वचित् कलह्यमानानां कलकलः, क्वचित् पुरुषाणां दण्डादण्डि, क्वचित् स्त्रीणां केशाकेशि, इदमेव साधारणतया ग्रामाणां ग्रामवासिनाञ्च चित्रमस्ति येषाम् उपरि सम्पूर्णस्यापि राष्ट्रस्य सौभाग्य समुन्नतिश्च अवलम्बिता वर्तते। अतः सम्प्रति देशस्य समुन्नतये ग्राम-दशायाः क्रान्तिकारिणः परिवर्तनस्य आवश्यकता वर्तते। जगतो जीवनभूताना

कृषकदेवाना यावत् यथोचिता पूजा सम्मानश्च न भविष्यति तावत् श्रयेषामपि जीवन कष्टमयमेव स्थास्यति इत्यत्र सन्देहलेशस्यापि कृते श्रवसरो नास्ति। दौर्भाग्यस्य श्रय विषयो वर्तते यत् वय स्वराज्य लब्धापि शासकाना प्रबन्धदोषात् दु खमेव सदा सहामहे। श्रत शासकसमुदायेन, नेतृवृदै, साधारणै जनैश्च श्रस्मिन् विषये शीघ्रमेव ध्यान दातव्य निम्नलिखितै उपायैश्च ग्रामाणाम् समुन्नते चेष्टा कर्तव्या—

ग्रामे ग्रामे पाठशाला व्यायामशाला, श्रौषधालया, पुस्तकालयाश्च स्थापनीया। चलचित्र प्रदर्शनद्वारा व्यवहारोपयोगिनो विषयाः शिक्षणीया। उद्योगस्य व्यापारस्य गृहशिल्पानाञ्च प्रवर्तन विधेयम्। समये समये सभा कृत्वा विभिन्नविषयेषु व्याख्यानदानस्य याजना विधेया। 'पञ्चायत' द्वारा न्यायपूर्वक विवादाना निर्णय कर्तव्य। प्रतिग्रामञ्च एक सार्वजनिक मन्दिर स्यात्। तत्र समये समये धार्मिक-व्याख्यानस्य कीर्तनभजनादीना कथावाचनस्य च व्यवस्था कर्तव्या। स्वच्छताया स्वास्थ्यस्य च कृते समीचीन प्रबन्ध स्यात्। पर्वोत्सवादीन सामूहिकरूपेण मानितानि स्यु। कुमार्गगामिनो जना दण्डिता भवेयु। कुसस्काराणा कुरीतीना च निवारणाय उपदेशा दायेरन्। कृषिकर्मणः समुन्नतये वैज्ञानिकानि साधनानि वैज्ञानिकी प्रक्रिया च प्रवर्तिता भवेत्। यदा एतादृशै उपायै ग्रामाणा वर्तमानदशाया पर्याप्त परिवर्तन करिष्यते[1] तदैव दशा नति भविता।

श्रत एव श्रथर्ववेद ग्रामाणा कल्याणाय एषा प्रार्थना विहिता वर्तते यत्—

श्रस्मै ग्रामाय प्रदिशश्चतस्र
ऊर्जं सुभूत स्वस्ति सविता न कृणोतु॥
[श्रथर्व, ६-४०-२]

१—किया जायगा।

समाज-संस्कारः ।

गुणा अथवा दोषा यथा कस्यचिद् व्यक्तेः अभ्युदयस्य अधःपतनस्य वा कारणानि भवन्ति तथैव समाजस्यापि । यथा व्यक्तिः जनो गुणैः वर्द्धते, प्रतिष्ठां प्राप्नोति, अभ्युदयं च गच्छति न एव कालान्तरे दोषैः क्षीयते अवमन्यते अधःपतनं च प्राप्नोति तथैव समाजेऽपि यदा गुणा भवन्ति तदा तस्य वृद्धिः समुन्नतिः समुन्नतिश्च जायते यदा च समाजे दोषा आयान्ति तदा तस्य शनैःशनैः क्षयः तिरस्कारः अधःपतनं च जायते । अतो यथा व्यक्तेः अभ्युदयाय गुणानां ग्रहणं दोषाणां च परिवर्जनम् आवश्यकं भवति तथैव समाजस्यापि समुन्नतये गुणानाम् आनयनस्य दोषाणां दूरीकरणस्य च आवश्यकता भवति । इदमेव गुणानां ग्रहणं दोषाणां परिमार्जनं च संस्कार शब्देन व्यवह्रियते । अयं च संस्कारो यथा व्यक्तीनां कृते परमावश्यको भवति तथैव समाजस्यापि कृते इति तु पूर्वं प्रकटीकृतमेव । अत्र तु समाजसंस्कारसम्बन्धे एव किञ्चित् समुल्लिख्यते ।

इतिहास ग्रन्थानाम् अध्ययनेन ज्ञायते यत् अस्माकं समाजः पूर्वं सर्वथा आदर्शसमाज आसीत् । सर्वेऽपि जना नात्मनः स्वार्थं समुचितरूपेण पालयन्ति स्म । दुर्गुणेभ्यो दोषेभ्यश्च ते शतं योजनानि[1] दूरे तिष्ठन्ति स्म । न ते कदाचित् मिथ्या वदन्ति स्म नापि मिथ्या शपन्ति स्म । गृहे तापकम्[2] अदत्त्वैव वनं बहिर्गच्छन्ति स्म पर चौर्यं नामापि न श्रूयते स्म । अन्यस्य धनं जनं लाष्टवत्[3] अवगच्छन्ति स्म[4], परस्त्रीषु मातृवत् व्यवहरन्ति स्म । स्मरणमस्य महाभारतं सम्यगे स्म ।

१—कोश । २—ताला । ३—ढेले के समान । ४—समझते थे ।

स्त्रिय: पुरुषा:, सेवका स्वामिन:, पुरोधसो[५] यजमाना:, गुरव: शिष्या:, उत्तमर्णा[६] अधमर्णाश्च[७] परस्पर सर्वदैव यथोचित व्यवहार कुर्वन्ति स्म। अत एव समाजे अव्यवस्थाया:, अशान्ते:, उपप्लवस्य, पारस्परिक-विरोधस्य, अधिकारार्थं कलहस्य, सघर्षस्य च सर्वथा अभाव आसीत्। सर्वप्रकारेण समाजो निरुपद्रव: सुखी शान्तो धनधान्यसम्पन्न: स्वस्थ:, सुव्यवस्थित:, शिक्षित: समादरणीयश्च आसीत्। यद्यपि त्रिगुणात्मिकाया सृष्टौ न कश्चित् समाज: सर्वांशेन निर्दोषो विशुद्धश्च भवितुमर्हति तथापि अस्माक समाजस्य प्राचीन स्वरूप बहुधा निर्दोष निष्कलङ्कम् अनुकरणीयञ्च आसीदिति तु साभिमान वक्तु शक्यते। न च इद केवल वयमेव कथयामो नापि आत्मनो मिथ्याप्रशसा कुर्म: प्रत्युत वैदेशिका अपि ये ये पक्षपातरहिता विद्वास: पर्यटका अस्मिन् देशे पर्यटनार्थं[८] समागता: तेऽपि अस्मत्प्राचीनस्य आदर्श-समाजस्य मुक्तकण्ठेन प्रशसा कृतवन्त: सन्ति इति तेषा पुस्तकानाम् अवलोकनात् सम्यक् अवगन्तु शक्यते।

पर साम्प्रतिक स्वरूप तु अस्मत्समाजस्य सर्वथा सदोष घृणास्पद च जात वर्तते। यथैव पूर्व समुन्नते: उत्तुङ्गशिखरे[९] समारूढमासीत् थैव सम्प्रति अधोगते: भयानके गर्ते[१०] पतित वर्तते। दृष्टौ प्रसारिया सर्वत्र दोषा एव दृष्टिपथम् आयान्ति। समाजस्य सर्वविध कल्याणाय अस्माक प्राचीनै समाजव्यवस्थापकै: ऋषि महर्षिभि: आचार्यैश्च वेदशास्त्रादिषु ये ये नियमा या याश्च व्यवस्था निर्मिता आसन् तासु विलोप गता: तत्स्थाने च स्वास्थ्यस्य सदाचारस्य आर्यसभ्यतायाश्च विनाशका व्यवहारा: प्रचलिता दृश्यन्ते। प्रतिदिन बालविवाहस्य वृद्धविवाहस्य कन्याविक्रयस्य च अनेका घटना जायन्ते। मादकद्रव्याणा सेवन

५—पुरोहित। ६—साहु महाजन। ७—कर्जदार। ८—घूमने के लिये। ९—ऊँचे शिखर पर। १०—गड्ढे में।

समाजे प्रचलितमेव वर्तते । "सुर्वी तमाः" भक्षणं तु पण्डितसमाजेऽपि निष्कण्टकं प्रचलति । धार्मिकस्थानेषु अधार्मिका अधिपतयो विराजन्ते । विद्यार्थिनां ब्रह्मचर्यं तु सहशिक्षया "शिनेमा" गृहेण च सुदूरम् अपसारितम् । निरक्षरभट्टाचार्याः गुरवः सन्ति । साधवः स्वार्थपरायणा जाताः । ते गृहस्थेभ्योऽपि अधिकं कामिनी-काञ्चनादिकं सेवन्ते । धर्मस्थाने धर्मनाम्ना अधर्मस्य दम्भपाखण्डादीनाञ्च प्रचारो वर्तते । सन्तोषस्य तु नामापि न श्रूयते । सर्वे एव अन्यायेन धनोपार्जने हस्तौ पादौ क्षोटयित्वा संगताः सन्ति । इन्द्रियनिग्रहस्तु प्राचीनपुस्तकेष्वेव अवस्थितो वर्तते । सर्वत्रैव संयमस्य अभावो विलासितायाश्च वृद्धिः दृष्टिगोचरी भवति । मातापितृभक्तेः गुरुभक्तेश्च साम्प्रति माहात्म्यं नास्ति । असत्यवादिनां यञ्चकानां च परितः प्रभुत्वं वर्तते । छल-कपटादीनां सर्वत्र प्रचुरता वर्तते । आहार-विहारादीनां दूषितत्वेन अस्वास्थ्यस्य दुर्बलतायाश्च साम्राज्यं वर्तते । अशिक्षा कुशिक्षा कुसंस्काराः कुपितयमस्य गृहे प्रतापिकाराः सन्ति । किमतो दुर्गुणान् गणयामः ? यस्मिन्, कस्मिन्नपीह अन्यस्मिन्नपि अनेकैः दोषैः अस्माकं समाजः चिरकालात् सर्वतोभावेन ग्रस्तो वर्तते । न च दोषाः केवलम् अशिक्षितसमाजे एव सन्ति प्रत्युत शिक्षित-समाजेऽपि अनेके महान्तो दोषा विद्यन्ते । मदीयसी शिक्षा, महतो महत् च प्रतिष्ठितं पदं लब्धा अपि अनेके महाजनाः कामक्रोधलोभादिना वशीकृतचेतसो विस्मयकरान् अनर्थान् कुर्वाणा दिलोक्यन्ते । अहरहः पूजापाठादिकं कुर्वन्तः, सभासंक्षे चन्दनमाला धारयन्तः, सभासम्मेलनादिषु तारस्वरेण मनोज्ञान् धर्मान् उपदिशन्तोऽपि बना ग्रामयञ्चना मिथ्याभाषण-लोभ-दम्भादिदोषैः कलुषीकृतान्तःकरणा दृश्यन्ते । उपरि इमान् शुभ्रवेषधारिणः सभामञ्चे उत्तम उत्तम" सभ्यतायाः शिष्टिमर्यं धुर्वाणा अनेके नेतारः सामाजिकाश्च पुनः अन्तरतो नितान्तमेव मलिनाशया दुर्बन्धपाश्च विलोक्यन्ते । एवं शिक्षि-

---

१६—उत्तम उत्तम पद ।

तेषु अशिक्षितेषु, पुराणेषु नवीनेषु, सभ्येषु असभ्येषु च सर्वत्रैव दोषा दृष्टिपथम् आयान्ति। इमानि एव कारणानि सन्ति येन अस्माक समाजस्य सम्प्रति एतादृशी शोचनीया दशा सञ्जाता वर्तते।

ऋते[11] एभ्यो दोषेभ्य समाजे यत् आर्थक वैषम्य वर्तते तदपि समाजस्य कृते साधारण हानिकर नाशकर च नास्ति। अवलोकयन्तु नाम विषमताया विस्मयकर चित्रम्? एकतस्तु कतिपये अगुलिगणनीया धनकुबेरा महामहत्सु सुधाधवलितेषु प्रासादेषु[12] निवसन्ति अपरेच असख्या निर्धना नरा नार्य अस्वास्थ्यजरेषु जीर्णशीर्णेषु तृणकाष्ठादि-निर्मितेषु कुटीरेषु कथमपि कालयापन कुर्वन्ति। एकत्र धनवन्तो जना नानाविधानि सुस्वादुभोजनानि दुग्ध दधि घृतादीनि च भुञ्जते अन्यत्र असख्या जना एकवार शुष्करोटिकाभ्योऽपि स्पृहयन्ते पर तेषा कृते तदपि सुलभ नास्ति। केचन सुमनोहराणि विविधानि वस्त्राणि धारयन्ति, विविधानि सुगन्धि-तैलानि लगयन्ति, बहुमूल्ये पादुके धारयन्ति, अनेकानेकानि च विलासवस्तूनि उपयुञ्जते अन्यत्र च अगणिता जना एकमेव वस्त्र वर्षपर्यन्त धारयन्ति, विपादिका[14] पीडिता अपि नग्न चरणा[15] एव परिभ्रमन्ति, शिरसि शरीरे च लगयितु सर्षपस्यापि तैल तेषा कृते दुर्लभ वर्तते। केषाञ्चित् मनोविनोदाय नानाविधानि नृत्य गीत-नाटक प्रहसनादीनि साधनानि सन्ति अपरत्र असख्याना ग्राम वासिना कृषकाणा मनोविनोदस्य कृते न तु किमपि साधन वर्तते न च समय नापि तदर्थ वित्तम्। वस्तुतस्तु अन्नचिन्ताऽतुराणा तेषा मनो विनोदस्य कृते जीवने अवसरोऽपि कदाचिदेव आयाति। केषाञ्चित् गृहे अधिकतया मोदकाना दुरुपयोगो भवति वचन च एकैकस्य कणस्य कृते लालायिता सन्ति। एव केचन जना धनाधिक्यात् आवश्यकताया अपि अधिक भोगविलासादिक कुर्वते। अन्ये च असख्येया जना दरिद्रतया

१२—अलावे। १३—महलों पर। १४—बेवाय। १५—नगे पैर।

अन्न वस्त्रयोरपि मुखेन वञ्चिता महाक्लेशमयं जीवनं यापयन्ति। इयं स्थितिरपि कस्याऽपि सभ्यसमाजस्य कृते श्लाघनीया नास्ति। एव सामाजिकी धार्मिकी राजनीतिकी आर्थिकी च व्यवस्था विकृतिता जडा वर्तते। अत एव एतां दोषाणां निराकरणेन पुनरपि आदर्श-समाज-निर्माणस्य महती आवश्यकता वर्तते। यावद् इदं कार्यं न भवति एकैकशश्च सर्वे दोषा न विनाश्यन्ते तावत् देशस्य दुःख दैन्यादिभ्यो मुक्तिः कदापि न भवितुमर्हति। अत एव आचार्यचाणक्यवैदुष्यम्—

व्यवस्थिताऽऽर्यमर्यादः कृत-वर्णाश्रम-स्थितिः।
रक्षितो देवताः प्रसीदति न सीदति॥

पुस्तकालयः।

सर्वेषां पठनाय यत्र पुस्तकानां संग्रहः क्रियते स पुस्तकालयः कथ्यते। शिक्षा-प्रसारस्य साधनेषु इदं श्रेष्ठतमं साधनमस्ति। जनतायां यदा पुस्तकालयानां द्वारा शिक्षायाः अधिकाधिकः प्रचारो भवितुं शक्यते न तथा अन्येन केनापि उपायेन। अत एव सम्प्रति जनतायां शासने च पुस्तकालयानां स्थापने विशेषरूपेण ध्यानं दातव्यं वर्तते।

अस्माकं देशे तु शिक्षिता एव न्यूनाः सन्ति पर ये शिक्षिताः सन्ति तेषामपि पठनाय पर्याप्तानि पुस्तकानि न मिलन्ति। शास्त्रवित्तया अनेके सन्ति। धर्मः साहित्यम् दर्शनम् इतिहासः भूगोलः राजनीतिः कला पूर्तिः व्यवसायो विज्ञानञ्चेति एतादृशा विषाः सन्ति येषां ज्ञानाय पदे पदे आवश्यकता भवति। अस्तु एषु प्रत्येकस्मिन् विषये उत्तमानि पुस्तकानि लिखितानि सन्ति। दिने दिने च पुस्तकानां कलेवरा वर्द्धते एव। प्रतिवर्षं सहस्रशोऽपि अभिनवानि पुस्तकानि

LIBRARY

कारयन्ते। परन्तु नहि सर्वे स्वमूल्येन सर्वाणि पुस्तकानि क्रेतु शक्नुवन्ति। विशेषतः साधारणा लोकाः। अनेके निर्धना छात्रास्तु पाठ्य-पुस्तकानामपि स्वद्रव्येण क्रयणे[1] असमर्था भवन्ति का पुनः वार्ता वाह्य पुस्तकाना क्रयणस्य ?

शिक्षाप्रसारे इय महती महीयसी बाधा अस्ति। पर पुस्तकालयानां प्रचारेण अस्या. सुगमतया एव निराकरण कर्तुं शक्यते। सर्वेषा सहयोगेन सर्वेषा द्रव्यसाहाय्येन च पुस्तकालयस्य स्थापना भवति। तत्र भिन्न-भि न विषयाणां परःसहस्राणि पुस्तकानि सगृहीतानि भवन्ति। सर्वेषा पठने समानः अधिकारो भवति। किञ्चित् किञ्चित् मासिक वार्षिक वा शुल्क दत्वा सर्वेऽपि पुस्तकालयात् पुस्तकानि स्वगृहे आनीय[2] पठितु भ्रमन्ति। पुस्तकालये उपविश्य तु शुल्क विनापि पुस्तकानि पत्राणि वा पठितु शक्यन्ते। एवम् अतिस्वल्पेन व्ययेन धनिका दरिद्रा वा विद्यार्थिनः साधारणा वा जना विभिन्न विषयाणा ज्ञान लब्धु शक्नुवन्ति। यत्र पुस्तकालयो भवति तत्र अनिच्छया अपि ये जना गच्छन्ति तेऽपि निश्चित् पठन्त्येव। यदि न पठन्ति तथापि पठने अभिरुचिस्तु उत्पद्यते एव। अनेन प्रकारेण सुगमतया समाजे शिक्षाया प्रचारो भवति।

अत एव पुस्तकालयाना महती उपयोगिता वर्तते।

अद्यावधि प्रायेण नगरेष्वेव पुस्तकालया स्थाप्यन्ते स्म[3] तेन च नागरिकाणामेव लाभो भवति स्म। पर प्रसन्नताया अय विषयो वर्तते यत् सम्प्रति ग्रामेषु अपि शनै शन. पुस्तकालयाना प्रचारो वर्द्धमानो दृश्यते। इद परमावश्यकमपि वर्तते। यतो हि भारतवर्षं ग्रामप्रधान-देश. अस्ति। अत्र ग्रामा एव अधिकाः सन्ति नगराणि च अतिन्यूनानि। अत्रत्ना नगराऽपेक्षया ग्रामेष्वेव अधिका जना निवसन्ति। एव च यदि ग्रामीणजनताया शिक्षाया. प्रसाराय ग्रामे ग्रामे पुस्तकालया न स्थाप्यन्ते तदा भारतवर्षस्य वास्तविकी उन्नति कदापि भवितु नार्हति। तस्मात्

१—खरीदने मे। २—लाकर। ३—स्थापित किये जाते थे।

ग्रामेषु ग्रपि पुस्तकालयाना महती ग्रावश्यकता वर्तते । एव करणेन ये ग्रामीणा धनाभावात्, सत्यपि धने ग्रालस्याद् वा स्वय पुस्तकानि क्रीत्वा[४] पठितु न पारयन्ति, इतस्ततो ग्राम ग्राम जल्प जल्पं वा वृथैव कालयापन कुर्वन्ति, ग्राजीवन च साधारणेनापि उपयोगिना ज्ञानेन रहिता[५] तिष्ठन्ति तेषामपि महान् लाभो भविष्यति, सर्वे एव च ग्रामवासिनो यत्किञ्चित् ग्रवश्यमेव ज्ञान प्राप्स्यन्ति । ग्रतो यदि वय सर्वत्र शिक्षाया पूर्णरूपेण प्रसार कर्तुं कामयामहे ग्रशिक्षायाश्च सर्वतो नाश तदा ग्रवश्यमेव ग्रामे ग्रामे पुस्तकालयाया स्थापनाय प्रयत्न कर्तव्य ।

परन्तु पुस्तकालयाना स्थापनेन सहैव तेषा सुव्यवस्थाया उपरि ग्रपि पूर्णरूपेण ध्यान दातव्य भवति । यावत् सुव्यवस्था न भवति तावत् तेषा स्थापनात् कश्चित् विशेषलाभो न भवति । ग्रामेषु ग्रनेके ईदृशा पुस्तकालया सन्ति य एकवार तु सर्वेषा क्षणिकेन उत्साहेन सस्थापिता परन्तु ग्रग्रे तेषा दशा शोभना न तिष्ठति । न कश्चित् प्रबन्धको भवति नापि निरीक्षक, न उद्घाटनस्य[५] कश्चित् निर्धारित समयो भवति न च पिधानस्य[६] । केचन ग्रनकानि पुस्तकानि नयन्ति कचन एकमपि न प्राप्नुवन्ति । न पुस्तकाना सूचीपुस्तक समीचीन भवति नापि ग्रादान प्रदानस्यैव । केचन पुस्तकानि स्वगृह नयन्ति परं पुन परावर्तयन्ति[७] नहि । गृहे एव रक्षन्ति गुप्त वा स्थापयन्ति । यस्तु पुस्तकालयस्य ग्रधिकारी नियुज्यते[८] स स्वकीयमेव धन मत्वा यथा इच्छति तथा व्यवहरति । मया एकस्मिन् ग्रापणे[९] एक पुस्तकालय स्थापित । पुस्तकानि सगृहीतानि । एक कायस्थकुलोत्पन्नो नवयुवक रक्षालकपदे नियुक्त । एकस्या रात्रौ प्रमादात् तालकम् ग्रलगयित्वा एव स गृह

४—खरीद कर । ५—खोलने का । ६—बद करने का ।
७—लौटाते हैं । ८—नियुक्त किया जाता है । ९—बाजार म ।

गत । तत अवसर दृष्ट्वा एक तत्रस्य एव हिन्दी पाठशालाया शिक्षक सर्वाणि पुस्तकानि गृहीत्वा अन्यत्र प्रेषितवान् । प्रातः सञ्चालकेन गृह शून्य दृष्टम् । तत स इतस्ततो मार्गणाम्[10] आरब्ध-वान् पर यदा कुत्रापि पुस्तकाना प्राप्तिर्न अभूत् तदास्थाने[11] गत्वा स्थानाऽधिपतिं निवेदितवान् । स्थानाधिपस्य आगमन श्रुत्वा तस्मिन् आपणे यस्य यस्य समीपे पुस्तकालयस्य पुस्तकानि आसन् ते तानि सर्वाणि अपि पुस्तकानि कूपे पातितानि अथवा अग्नौ ज्वालितानि । केनचित् च अतीव दूरे प्रेषितानि । एव सर्वोऽपि परिश्रमो निष्फलताम् अगमत् । एतादृशी एव दशा दुर्व्यवस्था च प्रायेण बहूना पुस्तकाल-याना दृष्टिगोचरी भवति ।

अत पुस्तकालय स्थापनेन सहैव तेषा सुव्यवस्थाया उपरि ध्यान-दानस्य महती आवश्यकता अस्ति । शोभने स्वच्छ सुविस्तृते च भवने पुस्तकालय स्थाप्येत । सज्जनो विनीतो मधुरभाषी जनप्रियश्च सञ्चालको नियुक्त स्यात् । निधारिते समये उद्घाटन भवेत् निर्धारिते च समये विधानम् । पुस्तकाना प्रदाने सर्वं सह समानरूपेण व्यवहारो विधीयत, पुस्तकालयस्य कागद पत्रादिकं सवमपि सुव्यवस्थित रक्ष्येत, ग्रामीणजनाना हृदये हठात् पुस्तक पत्रादि-पठनाय अभिरुचि उत्पादनीया । किमपि पुस्तक केनापि यथा छिन्नं भिन्न मलिन गोपितम् अपहृत च न भवेत् तथा प्रयत्न कर्तव्य । उपयोगिना पुस्तकाना सग्रहो विधीयेत न तु गणनायै[12] निरर्थकानाम् । एव यदि सुव्यवस्था स्यात् समये समये च निरीक्षण सम्पन्येत वार्षिकोत्सवश्च जायेत तदा एव पुस्तकालयेभ्यो जनताया वास्तविको लाभो भविष्यति ।

आशासे इमान् सर्वान् लाभान् विचार्य सज्जना स्व स्व ग्रामे पुस्तकालयाना स्थापनाय तेषा सम्यक् सञ्चालनाय च अवश्यमेव उद्योग

१०—खोज, तलाश । ११—थाने पर । १२—गिनती के लिये ।

करिष्यन्ति । वस्तुतस्तु सर्वेषां गृहे एकैको लघीयानपि पुस्तकालय आवश्यको वर्तते । शिक्षितानां ग्रामे तु एवेन पुस्तकालयेन भवितव्यमेव ।

समाचार-पत्राणि ।

वैज्ञानिके अस्मिन् युगे ज्ञानप्रसाराय यानि यानि साधनानि आविष्कृतानि सन्ति तेषु समाचारपत्राणामपि प्रधान स्थानं वर्तते । यस्याऽपि ज्ञातव्यविषयस्य अल्पीयसा कालेन व्यापक प्रचारो यथा समाचारपत्रद्वारा कर्तुं शक्यते न तथा अन्येन केनापि उपायेन । अत एव ज्ञानविस्तारक्षेत्रे समाचारपत्राणां महती उपयोगिता वर्तते ।

समाचारपत्राणां जन्मकथा अतिपुरातनी नास्ति । अस्मिन् विषये प्रकाशितानां कतिपयलेखानाम् अवलोकनेन ज्ञायते यत् सर्वप्रथम गृष्टस्य एकादशे शतके चीनदेशे एतादृश पत्र प्रकाशित बभूव । मुगलशासन-समये भारतवर्षेऽपि हस्तलिखित संवादपत्रं प्रचलति स्म परं तत् केवल शासनविभागे एव सीमितम् आसीत् । यूरोपे तु सर्वप्रथमं समाचारपत्रस्य प्रादुर्भाव इटलीराज्यस्य "वेनिस" नगरे अभूत् । ततः परं जर्मनीदेशे तदनन्तरं च इंग्लेण्डे समाचारपत्रस्य प्रकाशनं प्रारब्धम् । अनन्तर गौराङ्गेषु समागतेषु भारतवर्षेऽपि समाचारपत्राणां प्रचलनम् अभवत् । श्रूयते "समाचार दर्पण" नामक पत्र सर्वप्रथम प्रचलितम् तदनु शनैः शनैः अन्यानि पत्राणि प्रचलितानि । इदानीं तु भारतवर्षे एव प्रतिदिनं एतावन्ति पत्राणि प्रकाशितानि भवन्ति येषां संख्यां कठिन्येन कर्तुं शक्यते । इदानीं निखिलमपि भूमण्डलं समाचारपत्रैः परिव्याप्तं वर्तते ।

पत्राणि अपि दैनिक-साप्ताहिक-पाक्षिक-मासिक-षाण्मासिक वार्षिकादिभेदेन विषयभेदेन च अनेकप्रकाराणि सन्ति । एषा मध्ये दैनिकेषु साप्ताहिकेषु च पत्रेषु विशेषरूपेण समाचारा एव प्रकाशिता भवन्ति पर मासिकादिषु पत्रेषु तु बाहुल्येन विभिन्नविषयेषु निबन्ध प्रबन्धा एव प्रकाश्यन्ते ।

वर्तमानयुगे इमानि पत्राणि मानवसमाजस्य यावतः उपकारान् कुर्वन्ति तेषाम् इयत्ता नास्ति । बाल्यकाले ये जनाः पूर्णशिक्षा न लब्धवन्त तेऽपि समाचारपत्राणां प्रतिदिन पठनेन अनेकविषयाणां ज्ञान लब्धुं शक्नुवन्ति । तथैव पूर्णशिक्षितानामपि कृते पत्राणां महान् उपयोगो वर्तते । दैनिकसमाचाराणां परिज्ञानम्, विविधविषयेषु लिखितानां निबन्धानां पठनम्, नानाविधानां चित्राणां निरीक्षणम्, सामयिकपरिस्थिति-परिज्ञानम्, प्रकाशितानां प्रकाश्यमानानाञ्च नूतन नूतनानां ग्रन्थानां पत्रपत्रिकादीनाञ्च परिचयः, विविध सिद्धान्तानामध्ययनम्, मनोरञ्जनैर्लेखैः मनोविनोदनम्, स्वाभिप्रायप्रकाशने सौविध्यम् परस्पर विचाराणां विनिमयश्चेत्यादयः अनेके लाभाः सन्ति । समाचारज्ञानातिरिक्तं पत्र पत्रिकादीना पठनेन असङ्ख्याना नित्यप्रयोजनीय विषयाणां सम्बन्धे ज्ञान जायते । यथा—राजनीतिः, समाजनीतिः ; धर्मः, दर्शनम्, स्वास्थ्यम्, साहित्यम्, इतिहासः, भूगोलः, आयुर्वेदः, क्रीडाकौतुकादिकम्, वाणिज्यम्, विज्ञानञ्च । एषु विषयेषु याहशा महत्त्वपूर्णा सारगर्भिता लेखा आलोचना वा पत्रपत्रिकादिषु निःसरन्ति तेषाञ्च पठनेन याहशं ज्ञान जायते तत् अन्यसाधने सर्वथा असाध्य वर्तते । अतो विद्यायाः उन्नतौ ज्ञानस्य प्रचारे च अवर्णनीया उपकारिता पत्राणाम् ।

शासनविषयेऽपि पत्राणि इमानि महत् साहाय्य कुर्वते । शासनविभागतो या काचन नवीना व्यवस्था धारा वा जनतायाः कृते निर्मिता भवति तस्याः पत्रादिद्वारा एव जनतायां प्रचारः क्रियते । अनेन उपायेन जनताऽपि शीघ्रमेव राजकीया व्यवस्थाम् आदेशा वा ज्ञात्वा उन्नतौ शासनस्य प्रचारे च अवर्णनीया उपकारिता पत्राणाम् ।

तदनुकूलम् आचरति । अथ च यदा कस्मिंश्चित् विवादास्पदे विषये जनताया मतामत-परिज्ञानस्य आवश्यकता भवति तदानीमपि समाचार-पत्राणि महत् साहाय्यं कुर्वन्ति । एतदतिरिक्तम्-यदा केचन शासनाधिकारिणो यथेच्छमाचरन्ति, अनुचितं कुर्वन्ति, अन्यायम् अत्याचारं वा विदधति तदा पत्राण्येव समालोचना द्वारा जनमत प्रकाशनद्वारा च तेषां नियन्त्रणे दोषदूरीकरणे च समर्थानि भवन्ति । एवमेव व्यापारक्षेत्रेऽपि अनेकविधा उपयोगिता वर्तते पत्राणाम् ।

परन्तु यथा संसारस्य किमपि वस्तु सर्वथा निर्दोषं नास्ति तथैव पत्राणि अपि सर्वथा दोषरहितानि न सन्ति । अतः उपकारस्थाने यदा-कदाचित् अपकारमपि जनयन्ति । मिथ्यासमाचाराणां प्रकाशनेन भ्रान्ति-जननम्, पक्षपातपूर्णलेखानां प्रचारेण पारस्परिक विद्वेष-वर्द्धनम्, ईर्ष्या-द्वेषमयीभिः समालोचनाभिः साहित्यिकक्षेत्रे कटुतायाः उत्पादनम्, अश्लीलविज्ञापनानां प्रकाशनेन समाजे नैतिकतायाः अधःपतनञ्चेत्यादयः पत्रपत्रिकादीनां कतिपये दोषाः सन्ति । यदि इमे दोषा न स्युः यदि च सम्पादकमहाभागा निर्दोषं सम्पादने समधिकं ध्यानं दद्युस्तदा पत्रादिभिर्यथा जगतो महीयान् उपकारः कर्तुं शक्यते न तथा अन्येन उपायेन इत्यत्र नास्ति सन्देहलेशोऽपि ।

एवं निर्विवादं सिद्धेऽपि पत्राणामुपयोगित्वे यथा एतेषां सुदृढं प्रकाशनं यथा व्यापकः प्रचारो यथा च सम्पादकानां लेखकानां च आर्थिकी अवस्था अपेक्ष्यते तथा नास्ति । परन्तु अवसादगता सम्प्रति अस्माकं परतन्त्रतायाः करालः कालराशिः । समागता च रमणीय-सूर्योदयवेला । तद् आशास्महे यत् स्वतन्त्रे भारते यथा अन्यक्षेत्रेषु समुन्नतिं विभास्यते तथैव पत्रपत्रिकादीनामपि दशा दिने दिने समीचीनता यास्यति इति ।

विज्ञानस्य उपयोगिता ।

मानवसमाजस्य सर्वविध सुखाय यानि यानि शास्त्राणि प्रणीतानि सन्ति तेषु विज्ञानशास्त्रस्यापि महत्त्वपूर्णं स्थान वर्तते । विज्ञान हि जगत सर्वेषामपि भौतिकपदार्थाना सुपरीक्षण कृत्वा, अर्थात् कस्य पदार्थस्य किं स्वरूपम्, तस्मिन् क गुणा, का शक्ति, कुत्र वा तस्य उपयोग कर्तव्य इत्यादि विषयाणा सूक्ष्मरूपेण निरीक्षण कृत्वा तत्तद्वस्तूना यथोचित रूपेण समाजस्य उपकारे विनियोग करोति । यदि विज्ञानशास्त्र न स्यात् तर्हि समाजो ज्ञानदृष्ट्या च सर्वेषा पदार्थाना तात्त्विक ज्ञान न स्यात् भौतिकपदार्थानामुपयोगेन रहित एव तिष्ठेत् जीवने च पदे पदे महतीं कठिनताम् अनुभवत् ।

विज्ञानशास्त्रस्य अनेके भेदा सन्ति । यथा—ज्योतिर्विज्ञानम् आयु विज्ञानम् वनस्पतिविज्ञानम्, शरीरविज्ञानम्, भौतिकविज्ञानञ्चेति । अस्माक पूर्वजै आचार्यै ऋषिमहर्षिभश्च विज्ञानशास्त्रस्य निर्माणे महती समुन्नति विहिता आसीत् । जीवानाम् आध्यात्मिकसुखाय यथा उपनिषदादीना दर्शनशास्त्राणा च तै रचना कृता यथा वा रसानुभूतये साहित्यस्य विभिन्नानाम् अङ्ग प्रत्यङ्गाना निर्माण कृत तथैव भौतिकसुखाय विविधविज्ञान शास्त्राणामपि महता परिश्रमेण सम्पादन कृत्वा जगतो महान् उपकार साधित । एतदर्थमेव आयुर्वेद, धनुर्वेद, स्थापत्य सङ्गीतशास्त्र ज्यौतिषशास्त्र च, इत्यादीनि नानाविधानि शास्त्राणि विरचितानि । एतदतिरिक्तम् विविधयन्त्राणा साहाय्येन जलयाननिर्माणे विमाननिर्माणे नानाविध शस्त्रास्त्रादिनिर्माणेऽपि तै महत् कौशल दर्शितम् । यद्यपि अनेकानि वैज्ञानिकपुस्तकानि विलोप गतानि तथापि यावन्ति इदानीं मिलन्ति तेषामेव अवलोकनेन ज्ञायते यत् अत्रशास्त्रै

अहं विज्ञानशास्त्रस्य बहूना वैज्ञानिकाना सिद्धान्ताना चापि अस्मत्पूर्वजैः बहोः कालात् पूर्वमेव आविष्कारो विहित आसीदिति ।

परन्तु अस्मिन् समये विज्ञानशास्त्रस्य महती समुन्नतिः सर्वतोऽधिका च समृद्धि सञ्जाता वर्तते । अस्माकं पूज्यपादैः महर्षिवर्यैः रोपितो विज्ञानवृक्षः सम्प्रति वैदेशिकाना विदुषा प्रयत्नेन पूर्णतया अङ्कुरित-पुष्पित पल्लवितो फलितश्च अनेकाऽनेक शाखा प्रशाखादि-समन्वितः महाविशालकायो महान् आनन्दप्रदश्च सञ्जातो वर्तते । विज्ञानशास्त्रस्यैव समुन्नतेरय परिणामो वर्तते यत् इदानीं विश्व-विस्मयकराणि नानाविधानि यन्त्राणि विविधाश्च नवनवा आविष्कारा दृष्टि-गोचरी भवन्ति । यदिदानीं स्थूलकायः स्थूलबलश्च मानवो जले स्थले आकाशे च अप्रतिहत राज्य कुरुते तत् विज्ञानस्यैव प्रभावेण । विज्ञान-बलेनैव अगम्यमपि सुगम, असाध्यपि सुसाध्यम्, अलभ्यमपि सुलभम्, अदृश्यमपि प्रत्यक्ष कर्तुं शक्नुवन्ति जना । अद्य गमने आगमने, भोजने पाने, क्रीडाया कौतुके, खेलने कूर्दने, पठने लेखने, व्यवसाये वाणिज्ये, किमधिकं जीवनस्य सर्वेष्वपि क्षेत्रेषु यदस्माभि महत् सौविध्य सुखञ्च अनुभूयते तत्र विज्ञानमेव हेतु' ।

अथ च न केवल विज्ञान जनतायाः शारीरिक-सुख शान्तिमात्रमेव सम्पादयति अपरन्तु अज्ञानान्धकार दूरे कृत्वा ज्ञानालोकविस्तारेऽपि अस्य महानुपयोगो वर्तते । पूर्व जनाः गुरुमुखात् श्रव श्रव ताडपत्रेषु वा लिखितानि पुस्तकानि पठित्वा ज्ञानलाभ कुर्वन्ति स्म । अतः सर्वसाधारणे शिक्षाया व्यापकरूपेण प्रचारः सर्वथा दुष्कर आसीत् । परं सम्प्रति तु मुद्रायन्त्रसाहाय्येन संसारस्य सर्वेऽपि नरा नार्यश्च नानाविधानि पुस्तकानि पठित्वा सुलभतया एव यथेच्छ ज्ञानलाभ कर्तुं शक्नुवन्ति । ससारस्य सर्वेषु मुद्रायन्त्रेषु प्रतिदिन यावन्ति पुस्तकानि प्रकाशितानि भवन्ति तेभ्यश्च ज्ञान विज्ञानविस्तारे शिक्षाप्रचारे च यावान् लाभो भवति तस्य इयत्ता नास्ति । एतदतिरिक्त समाचारपत्रद्वारा यद् वयं

अतिदूरस्थमपि नूतनात् नूतन समाचारं स्वल्पकालेन एव लभामहे यच्च गृहस्थितैरेव अस्माभिः देशविदेशाना वार्ता व्याख्यानानि गीतानि च श्रूयन्ते तद् विज्ञानशास्त्रस्यैव वरदानमस्ति ।

एवञ्च अद्यावधि विज्ञानबलेन आविष्कृतानां नवनवाऽविष्काराणां दैनिककार्योपयोगिना विविधवस्तूनाञ्च उपरि यदा दृष्टिपातः क्रियते तदा विस्मय मुग्ध मानसा भवामः । पर विज्ञानस्य एतावतैव कार्यं समाप्त नास्ति । विभिन्नदेशेषु अद्यापि परःशता वैज्ञानिकाः प्रयोगशालासु नवनवतत्त्वान्वेषणे नवनवयन्त्रनिर्माणे च अहोरात्र व्यापृताः सन्ति । वैज्ञानिकी उन्नतिरेव सम्प्रति सर्वोच्चसभ्यताया निदर्शनमस्ति । येन देशेन विज्ञाने यादृशी समुन्नतिर्विहिता स देशः तेनैव अनुपातेन सभ्यो मन्यते । अत एव सम्प्रति सर्वेऽपि वैज्ञानिके एव कार्ये प्राधान्येन सलग्नाः सन्ति । अतोऽनुमीयते यत् इतोऽपि अधिकाधिकं चमत्कार दर्शयिष्यति विज्ञानशास्त्रमिति ।

परन्तु विज्ञानशास्त्रद्वारा अनेकानेकेषु उपकारेषु जायमानेष्वपि ये केचन महान्तः अपकारा अपि दृष्टिपथमायान्ति तेषामपि चर्चा अवश्यकरणीया अस्ति । सुखेन सहैव यदिदानीं नानाविधैः नवनवैः रोगैर्जना अनुदिन असमये एव मृत्युमुखे गच्छन्ति, विषयाभिलाषबद्धैः विविधैर्विनाशमयैः वस्तुभिः समाकृष्टचेतसो नरा नार्यश्च यदिदानीं विलासमग्नो स्वकीय स्वास्थ्यम् आरोग्य सच्चरित्रता च जुहुन्त[1] दृश्यन्ते, यच्च नवाविष्कृतैः महाभयङ्करैः मारणास्त्रैः क्षणमात्रे लक्षलक्षाधिकाः प्राणिनो निर्मम मार्यन्ते गगनचुम्बिनश्च विशाल विशाला. सौधा धराशायिनो विधीयन्ते तदपि विज्ञानस्यैव साहाय्येन । एव लाभेन सहैव अनेका हानयोऽपि विहिता विज्ञानेन । पर तत्र विज्ञानस्य दोषो नास्ति अपि तु व्यवहारकर्तृणा दोषो वर्तते । लाभकरस्यापि वस्तुनो दुरुपयोगेन हानय. सम्भाव्यन्ते । मार्गं कुक्कुरादिभ्यः आत्मरक्षार्थं दण्डधारणस्य उपयोगिता न केनापि अस्वीकर्तुं शक्यते । आवश्यक तत् । परन्तु यदि

१—हवन करते हुए ।

यस्मिन् दण्डधारी पथिकः तेनैव दण्डेन अपरान् सर्वैः सह युद्धं वा प्रतिघातं च कर्तुमारभेत तर्हि स एव रक्षणार्थं रक्षितो दण्डः तस्य मारकारणं भवितुमर्हति। एवं एव दशा इदानीं विज्ञानस्य अस्ति। अर्थकामयोः दासभूता सर्वे एव जनाः स्वस्मिन् स्वार्थसिद्धये विज्ञानस्य दुरुपयोगं कुर्वाणा दृश्यन्ते। यदि जनानां सात्त्विकी बुद्धिः स्यात् यदि च विज्ञानस्य सदुपयोगो विधीयेत तर्हि विज्ञाने न कोपि दोषो द्रष्टुं शक्यते।

अत एव अस्माकं शास्त्रेषु भौतिकविज्ञानेन सह आध्यात्मिकज्ञानस्यापि आवश्यकता प्रतिपादिता वर्तते। अत एव च पुरुषार्थेषु अर्थकामाभ्यां सह धर्ममोक्षयोरपि अवश्यकर्तव्यतां प्रतिपादयन्ति शास्त्राणि। यदि आध्यात्मिकज्ञानरहितं भौतिकविज्ञानं भविष्यति यदि च धर्ममोक्षबुद्धिं परिहाय केवलम् अर्थकामयोः पुरुषार्थं जनाः प्रतिष्ठन्ते तर्हि जनयं परत्रापि अवश्यम्भाविनी। यदि चैतत् आध्यात्मिकं ज्ञानं स्यात् सर्वेऽपि वयं मानवा भ्रातरः, सर्वेऽपि मनानाः, एकस्यैव परमात्मनः प्रजाः, अतः सर्वेषु अस्माभिः भ्रातृवद् वर्तितव्यम्, न परस्परं वैरं कर्तव्यं नापि विरोधः—यदि ईदृशी सद्बुद्धिः उदियात् तर्हि विज्ञानं विनाशकं भवितुमर्हति। न केवलं अध्यात्मज्ञानेनैव न वा केवलं भौतिकविज्ञानेनैव संसारस्य पूर्णतया कल्याणं भवितुमर्हति। यदा ज्ञानं विज्ञानञ्च उभयमपि समन्वितं सुसम्पन्नं सहकारि च भवति तदैव संसारस्य पूर्णरूपेण अभ्युदयो भविष्यति सर्वेषां च सुख-शान्तिमयानि दिनानि यास्यन्ति। अतो विज्ञानेन सहैव देशे आध्यात्मज्ञानविस्तारे अपि समुन्नतिः कर्तव्या अथ च अर्थकामाभ्यां सह धर्ममोक्षयोरपि आवश्यकता अवश्यमङ्गीकर्तव्या येन विज्ञानं विशुद्धरूपेण जगतः उपकारे सफलं स्यात्।

आर्याणां स्वतन्त्रता प्रातो भारतवर्षः पुराकाल इव इदानीमपि दर्शनेन सहैव विज्ञानेऽपि चरमोन्नतिं कृत्वा उभयोरपि सामञ्जस्यस्य सन्देशं जगतेऽपि प्रचारयितुं शक्तः स्यात् इति शं ते सन्तु दिवे।

व्रतोत्सवानाम् उपयोगः ।

अस्माकं वैयक्तिकजीवनस्य सामाजिकजीवनस्य वा हिताय अभ्युदयाय च धर्मग्रन्थेषु ये ये विषया निर्धारिताः सन्ति तेषु व्रतानाम् उत्सवानाञ्च अतीव महत्त्वपूर्णं स्थानं वर्तते । एतेषां विविध-व्रतोत्सवानाम् यदि विधिपूर्वकम् अनुष्ठान पालनं च क्रियेत तदा तेभ्यो नानाविधा लाभा भवितुमर्हन्ति । मनसि पवित्रता आयाति । पुरातनकथाना स्मरणं जायते । संयमशक्तिः वर्द्धते । संघटनात्मको भावो जागर्ति । महान् समुल्लासो भवति । अन्ये च अनेके लाभा भवन्ति । अत एव अस्माकं पूर्वजै: ईदृशानि अनेकानि व्रतानि उत्सवदिनानि च निर्धारितानि । एवमेव अन्यान्यधर्मेषु अपि व्रतोत्सवाना विधानम् अवलोक्यते ।

व्रतानि अनेकविधानि सन्ति । कानिचित् नित्यानि, कानिचित् नैमित्तिकानि कानिचित् च काम्यानि । नित्यानि व्रतानि सर्वदैव विधीयन्ते यथा एकादशीव्रतम् । यानि व्रतानि केनापि निमित्तेन क्रियन्ते तानि नैमित्तिकानि कथ्यन्ते यथा चान्द्रायणादिकम् । यानि च कस्यापि कामनाया: पूर्तये क्रियन्ते तानि काम्यव्रतानि भवन्ति । यथा पुत्रकामनया । एषु नैमित्तिकानि काम्यानि च व्रतानि तु आवश्यकतानुसार यदा कदाचित् विधीयन्ते । पर नित्यव्रतानि तु सर्वदैव सर्वैरपि नियमानुसार वर्तव्यानि इति शास्त्रकाराणामादेशो वर्तते । अत एव अधामिकेऽपि अस्मिन् युगे परम्परया अद्यापि अनेकानि व्रतानि नर-नारीसमाजे प्रचलितानि सन्ति । स्त्रियस्तु तत्रापि विशेषरूपेण व्रतानुष्ठानादिकं कुर्वन्ति ।

व्रतदिवसेषु पालनार्थं ये ये नियमा निर्मिता सन्ति तेषां सम्यक् यदि पालनं क्रियेत तदा सत्यमेव अनेके लाभा भवितुमर्हन्ति इति आधुनिका अपि मन्यन्ते । व्रतेषु किल आहारविहारादिविषये संयमस्य उपरि

विशेषरूपेण ध्यान दातव्यं भवति । आहारे, शयने, भाषणे, हासे, सर्व-त्रैव संयम रक्षणीयो भवति । एतेन संयमशक्तिः वर्द्धते । आहारनिरोधेन स्वास्थ्य समीचीन तिष्ठति । उदरविकाराश्च नश्यन्ति । इन्द्रियसंयमेन च मनोविकारा नश्यन्ति । धार्मिकग्रन्थाना पाठेन कीर्तनभजनादिना च मनसि धार्मिको भाव: समुदेति । चेतसः चञ्चलता नश्यति, अपूर्वा शान्तिः समायाति । प्रतिपक्षम् एकस्मिन् अपि दिने यदि ईदृशी साधना विधीयेत तदापि आत्मनो बहुकल्याण कर्तुं शक्यते ।

एवमेव उत्सवा अपि बहुविधाः सन्ति । यथा श्रीकृष्ण जन्माष्टमी, रामनवमी, नवरात्रम्, रथयात्रा, विजयादशमी, दीपावली, सरस्वतीपूजा, दुर्गापूजा इत्यादय: । एतेभ्य: उत्सवेभ्यो व्यक्तिगतलाभापेक्षया सामाजिको लाभ: प्रचुरो भवति । उत्सवेषु सर्वे सम्मिलन्ति, सर्वे सङ्गच्छन्ते सर्वं च सहयोगेन परस्पर सर्वाणि कार्याणि अनुतिष्ठन्ति । एतेन पारस्परिक वैरविद्वेषादिक नश्यति, स्नेहः सौहार्दं सामनस्य सहकारिता च वर्द्धते । सङ्घटनात्मकश्च भावो जागर्ति । अथ च उत्सवैः समाजे सर्वत्रैव सुमहान् आनन्दसन्दोहः समुल्लसति । नीरसे निरानन्दे च जीवने काचित् अपूर्वा सुप्रसन्नता समायाति । नृत्य-गीत वाद्यादिना, सुहृत्-समागमेन, परस्परालापेन, क्रीडाकौतुकादिना, प्रियजनाना स्वागत-सम्मापणाभ्या च सर्वे एव नरा, नार्यं, बालका, वृद्धाश्च परमानन्द-मग्ना: प्रमुदितमानसाश्च इतस्ततो हसन्त:, खेलन्त:, क्रीडन्त, गायन्त:, वादयन्त, नृत्यन्त:, प्रमोदमानाश्च दृश्यन्ते । उत्सवदिनेषु बालकानाम् उल्लासस्तु दर्शनीय एव भवति । ते हि चित्रविचित्राणि नानाराग-रञ्जितानि वस्त्राणि परिधाय[1] मोदकाना क्रयणाय[2] इतस्तत पणानि[3] एकत्रयुर्षाणा उत्सवे सम्मिलनार्थं क्षुधापिपासादिक विस्मरन्ति । पदातयश्च महता उत्साहेन वेगेन च उत्सवस्थले गच्छन्ति । एवञ्च

१—पहनकर । २—खरीदने के लिये । ३—पैसे ।

उत्सवादिनानि नानाविधेषु एतैरन्यादि कारणेषु सत्स्वपि किञ्चित्कालार्थं महान्तमानन्दं जनयित्वा महान्तमुत्साह समुत्पादयन्ति ।

एतदतिरिक्तम् एकः अन्योऽपि महान् लाभो वर्तते । ये ये उत्सवाः सन्ति ते सर्वेऽपि जातेः समाजस्य राष्ट्रस्य च हितदृष्ट्या प्रचारिताः सन्ति । तेषाम् एकमेकम् उद्देश्य वर्तते । यदि तदनुसार सर्वेऽपि उत्सवा मान्येरन् तदा समाजस्य राष्ट्रस्य च महान् लाभः स्यात् । द्वित्राणि उदाहरणानि गृह्यन्ताम् ।

आरमत्समाजे एको दुर्गापूजोत्सव' प्रचलति । बङ्गेषु अस्य महान् प्रचारो वर्तते । अस्य उत्सवस्य उद्देश्य समाजे शारीरिकशक्ति-वर्द्धन दुष्टदमनञ्च । अस्मिन्नुत्सवे महाचण्डिकाया मूर्तिः निर्मीयते । देवी दशभुजान् धारयति । प्रतिभुज विभिन्नानि शस्त्रास्त्राणि भवन्ति । भयङ्कराकारः सिंहः तस्या वाहन भवति । महिषासुर सम्मर्द्य भगवती अन्येषामपि असुराणा विनाशाय विराजमाना तिष्ठति । इद मूर्ते. स्वरूपं वर्तते । एतदतिरिक्त उत्सवेऽस्मिन् जना अस्त्रशस्त्रादि-चालनस्यापि अभ्यास कुर्वन्ति । एतत्सर्वं किं सूचयति ? एतदेव यत्—यदि आत्मनः समुत्कर्षं शत्रूणा च विनाशः अभीप्सितः स्यात् तर्हि शक्तेरुपासना विधेया । शस्त्रास्त्राणि सर्वे धारणीयानि । तया च बलोपार्जन कर्तव्य येन सिंहसदृशा अपि बलवन्तो वशीभूता भवेयु', महिषासुरसमानाश्च जगत शान्तिविघातका उद्दण्डा दुर्दान्ता दुराचारिणोऽपि पादाभ्या सम्मर्दिता. स्यु' । यदा समाजस्य सर्वेष्वपि पुरुषेषु स्त्रीषु च अय भाव समागमिष्यति तथैव च ते समाचरिष्यन्ति तदैव आत्मनो धर्मस्य जातेः राष्ट्रस्य मर्यादायाश्च सुरक्षा कर्तुं शक्नुयते न अन्यथा ।

द्वितीयमुदाहरण गृह्यताम् । एतदनन्तर कार्तिके दीपावली महोत्सव' समायाति । अस्मिन् उत्सवे सर्वेऽपि जना निजनिजगृहाणा सशोधन-सम्मार्जनादिक कुर्वन्ति । साधारणा गृहस्था गोमयादिना गृह लेपयन्ति धनिकाश्च स्वस्वभवनानि चूर्णैः चमत्कृतानि कुर्वन्ति । सशोधिते

सुसम्मार्जिते सुलिप्ते समलङ्कृते च गृहे लक्ष्म्या पूजनं भवति। सर्वत्र च दीपावल्य प्रज्वलिता भवन्ति। अनन्तर धनिका स्वकीयं पार्षिद आयव्ययादिक गणयन्ति। धृतादिना बहवो निजभाग्यपरीक्षां कुर्वते। तस्या एव रात्रे अन्तिमे प्रहरे शूर्पाणि यादयन्त्यो गृहिण्यो गृहात् दरिद्रतायाः निस्सारण कुर्वन्ति। सर्वामपि निशां पूजाघटादिना आमोदप्रमोदाभ्या च जना अतिवाहयन्ति। अय सर्वोऽपि कार्यकलाप किमुद्देश्य प्रकटीकरोति? इदमेव यत् कन्यादि पुरुषस्य परिवारस्य जाते राष्ट्रस्य वा प्रभूत वित्तलेभ विना जीवन न स्थातुमर्हति। अत एवैरपि यथाशक्ति विविधैरुपायै धनोपार्जनस्य दरिद्रतायाः निस्सारणस्य च उपाया विधेयो येन सर्वेषामपि जीवन सुखमय शान्तिमय सम्माननय च सम्पद्येत।

अथ वसन्तपञ्चमी गृह्यताम्। अस्मिन् उत्सवे किं भवति? बुद्धिदेवताया श्रीसरस्वत्या शान्ति माधुर्यमयी मनोहरा मूर्तिः निर्मापते। शारदा नीरक्षीरविवेक कला कुशलस्य हसस्य उपरि विराजते। एकस्मिन् हस्ते सकलजनमनोविनोदिनी वीणा अपरस्मिन् च अज्ञानान्ध निवारक ज्ञानालोकप्रसारक पुस्तकम्। अस्मिन् दिने च प्रातःकालादेव सरस्वती-पूजनं पुस्तकपत्रादिपूजनं च भवति। ज्ञानोपासका विदुषा विद्यार्थिनाञ्च समुदायो महता सत्कारोद्योग उत्सवमिमं सुसम्पन्नं विदधाति। एतेन किं प्रकटीभवति? विद्योपार्जनस्य आवश्यकता। एव महोत्सव सन्देशमिमं ददाति यत् बले धने च सत्यपि यावत् देशे विद्याया प्रचारो न भविष्यति तावे च नरा नार्यश्च सदैवतया पशव अर्थात् बुद्धिविचारशीलाश्च न भविष्यन्ति तावत् राष्ट्रकल्याणं सर्वथा असम्भवं यति।

एवमेव होलिकोत्सव समाप्त कृत्वा अो पारस्परिक गाढ्वैरादिक प्रत्यक्ष सर्वथा सुगन्धिमिश्रितैः आमोदप्रमोदकारकैश्च रङ्गैः रञ्जयन् इति सूचयति। अनेनैव प्रकारेण सर्वेऽपि उत्सवा प्रतिवर्षं कर्तव्या

सन्देशमिव दातु, किमपि शिक्षयितु, किमपि च स्मारयितुमिव समायान्ति । अत एव यदि यथाविधि महोत्सवा सम्मानिताः स्युः तदा राष्ट्रस्य महान् लाभो भवितुमर्हति । एवमेव केषाञ्चित् महापुरुषाणां ये ये जन्मोत्सवा जायन्ते तैरपि सामाजिकजनेषु कृतज्ञताबुद्धिः, स्फूर्तिः, उत्साहश्चेत्यादयो अनेके लाभा सम्भवन्ति । इमानि एव फलानि उद्दिश्य मतोत्सवाना विधान कृत शास्त्रेषु । अतो यथासम्भव विधिपूर्वक मतोत्सवप्रचाराय प्रयत्नो विधेय । तथा च लिखित बृहद्धर्मपुराणे—

कुर्याद् गृहस्थः सर्वपा देवानामुत्सवक्रियाम् ।

सम्प्रति मतोत्सवाना यत् स्वरूप समाजे प्रचलित वर्तते तत् सर्वथा निरर्थक दूषित विधिहीन च वर्तते । अत एव यथा लाभा अपेक्ष्यते तथा न भवन्ति । न जना विधिपूर्वक श्रद्धया भक्त्या च मतानि कुर्वन्ति न च उत्सवेषु सामूहिकरूपेण परस्पर सम्मिलन्त्येव । नाममात्र सर्वमनुष्ठीयते । अत समाजसुधारकाणा धार्मिकाणा च इद प्रथम कर्तव्य वर्तते यतो पुनरपि मतोत्सवाना समुचितरूपेण प्रचाराय समुद्योग कुर्युः येन यथार्थलाभः सम्भवेत् । आशासे सस्कृतपण्डिताः छात्राश्च अस्मिन् विषये विशेषरूपेण ध्यान दास्यन्ति इति ।

महापुरुषाणां चरितावली-पाठः ।

मनीषिणो हि मानवजीवनं सग्राम इति कथयन्ति । यथा सग्रामे विरोधिनो जना परस्पर सघर्षं युद्ध च कुर्वन्ति तथैव मनुष्याणा जीवने अपि सततमेव बहि आभ्यन्तरे च युद्ध प्रचलति । यथा बहिः द्वयो विरोधिनोर्मध्ये युद्ध भवति तथैव आभ्यन्तरे सुख दुःखयो, हर्ष-विषादयोः, जय पराजयो, लाभालाभयोः, आशा-नैराश्ययो, धर्माऽधर्मयो,

परोपकार-भावना न समुदेष्यति ? नेताजी सुभाषचन्द्रबोसस्य स्वदेशानुराग पश्यत । स्वकीया मातृभूमिं परतन्त्रतायाः अविनतमात् पाशात् उन्मोचयितुं[1] तेन महापुरुषेण किं किं कष्टं न उररीकृतम् ? स हि महानुभाव श्रीमतिशीघ्रं स्वतन्त्रताप्राप्त्यै राष्ट्रियमहासभायाः सम्बन्धं विच्छेदं कृत्वा अग्रगामिदलस्य सङ्गठनं चकार, देशे नवीनमुत्साहं जनयामास, वेषं परिवर्त्य[2] बहिर्गत्वा विदेशे सैन्यनिर्माणं च अकरोत् । पर प्रतिकूलपरिस्थितिवशात् तेनापि सफलतां अलभमानो निजान् प्राणानपि तत्रैव समुत्ससर्ज । एतादृशस्य त्यागमूर्तेः वीरपुरुषस्य परमपवित्र जीवनचरितं पठित्वा को नाम पाषाणहृदयोऽपि जनो देशसेवाया भावनया द्रुतं परिपूर्णहृदयो न भवेत् ? एवमेव लोकमान्यः तिलकः, महात्मा गान्धी, जगदीशचन्द्र बोसः, रवीन्द्रनाथ ठाकुरः, योगिराज श्री अरविन्द श्चेत्यादयोऽसहया आत्मचिन्त नरायणा साधवश्च ईदृशा लोकोत्तराः पुरुषा बभूवुः येषां चरित्राध्ययनेन पदे पदे उत्तमोत्तमा शिक्षा मिलति ।

एवमेव विदेशेषु अपि एकैके ईदृशा महापुरुषा भूताः सन्ति येषां जीवनचरितस्य अपठनम् आत्मनो महती हानिः मन्तु शक्यते । ते अपि अस्माकं कृते तथैव माननीया अनुकरणीयाश्च सन्ति यथा स्वदेशवासिनः ।

महात्मा गान्धी

श्रीमद्भगवद्गीतायाः दशमाध्यायस्य अध्ययनात् ज्ञायते यत् ये केचन अलौकिक शक्ति सम्पन्ना महापुरुषा महीतले अवतरन्ति[3] ते ईश्वरस्यैव अंशभूता भवन्ति । ते देशकालयोः आवश्यकतानुसारं भगवदिच्छया

१—छुड़ाने के लिये । २—वेष बदल कर । ३—अवतार लेते हैं ।

आयान्ति अलौकिकानि च कार्याणि कृत्वा पुनरपि निवर्तन्ते[1]। वस्तुतः ईदृशा एव पुरुषाः यस्यापि देशस्य विभूतयो भवन्ति। नहि कस्यापि देशस्य गौरव विख्यातिर्वा तस्य देशस्य नदनदीभिः गिरिपर्वतैर्वा भवति अपितु तत्रत्यैः विलक्षण-प्रतिभा-सम्पन्नैः अलौकिकशक्तिशालिभिः महा-पुरुषैरेव। अस्माकं भूते महतो गौरवस्य अय विषयो वर्तते यत् अति प्राचीनकालात् भारतवर्षे ईदृशानां महापुरुषाणां पुण्यपरम्परा आगच्छति। वाल्मीकिः व्यास', बुद्धो महावीरः, शङ्करः चैतन्यः, दयानन्दो विवेकानन्दश्च ईदृशा एव भगवदंशभूता महामानवा बभूवुः येषा नामस्मरणमात्रेण अस्माकं मस्तक श्रद्धया नतं किन्तु गौरवेण समुन्नत भवति। ईदृशेषु एव जगद्वन्दनीयेषु कतिपय महापुरुषेषु विश्वविश्रुतस्यमहात्मनः गान्धी-महोदयस्यापि गणना अस्ति यस्य सक्षिप्ततम' परिचय. पाठकाना पुरस्तात् अत्र दीयते।

महात्मनो गान्धिमहोदयस्य जन्मभूमिः गुजरात प्रान्तस्य प्रसिद्धं पोरबन्दरनामकं राज्यमासीत्। तत्रैव १८६९ तमे ईशवीयवत्सरे एक-स्मिन् प्रतिष्ठिते वणिग्वंशे एतेषां जन्म अभूत्। तस्मिन् समये अस्य पिता श्री करवा गान्धी राजकोटराज्यस्य प्रधानमन्त्री आसीत् अतो गान्धिजीवस्यापि शैशवकालः तत्रैव व्यतीतो बभूव। एतस्य कुल वैष्णव-धर्मानुयायि आसीत् माता चास्य परमधर्मिष्ठा। अतः बाल्यकालादेव श्री गान्धिजीवः धर्मस्य सदाचारस्य च प्रभावेण प्रभावित आसीत्। इदमेव च कारणमासीत् येन गान्धिमहोदयस्य आदित आरभ्य अन्तपर्यन्तं समस्त-मपि जीवनं धर्ममय सदाचारमय च आसीत्। अस्तु।

तदानीं समाजे बालविवाहस्य प्रथा पूर्णरूपेण प्रचलिता आसीत्। अत. प्रचलितरीत्यनुसार गान्धिजीवस्यापि विवाहः त्रयोदशे एव वर्षे श्रीमत्या कस्तूरबा नाम्न्या कन्यया सह बभूव। विवाहानन्तर मैट्रिकलेशन

१—लौट जाते हैं।

परीक्षानुत्तीर्णः इने "बैरिस्टरी" शिक्षामदधार्यं इङ्गलैण्ड देशे गतः। तत्र चतुर्वर्षेषु इमा शिक्षा समाप्य ते पुनः स्वदेशं समागताः राजकोट नगरे च न्यायालये वाक्तर्कलक्षार्यं कर्तुं प्रारभन्त। परन्तु वाक्तर्कलक्षार्यं प्रायेण प्रपञ्चपूर्णं छलकपटमयं असत्यमनृतं च भवति अतः सद्गुरुदेन भाविमहात्मना च गान्धिमहोदयेन एतस्मिन् पार्थे समीचीना सरलता न लक्ष्या। कथं च सारलता लभ्यते? यतो हि स गन्धवता भारतभूमौ नहि स्वोदरपूरणाय धनार्जनाय वा प्रेषित आसीत् अपितु भारतभुवो भाग्यनिर्माणाय कोटिकोटिमितानां भारतीयानां समुद्धाराय च।

गान्धिजीवः वाक्तर्कलक्षार्यं कुर्वन् एकदा एव अभियोगमादाय अर्काडादेशे गतवान्। तत्र पूर्वत एव बहवो भारतीया निवसन्ति स्म। परं तेषां दशा तत्र अतीव शोचनीया कष्टप्रदा च आसीत्। इदं दृष्ट्वा गान्धिजीवस्य हृदये अतीव दुःखमभूत्। "डरबन" नगरस्य न्यायालये च यदा ते भारतीयान् उष्णीषम् उत्तार्य[1] मञ्चात् गताः तदा तत्रस्थेन न्यायाधीशेन ते नितान्तं अपमानिताः उष्णीषस्य अवतारणाय[2] च आज्ञप्ताः। भारतीयानामीदृशं अपमानं दृष्ट्वा तेषां हृदये तदोऽपि अधिका चिन्ता दुःखम् उद्वेगश्च समुत्पेदे। ततस्ते तत्र स्थितं न्यायालयकार्यं परित्यज्य तत्र भारतीयानां दशापरिवर्तनाय गुरुतरं आन्दोलनं चालितवन्तः। एतेषां नेतृत्वेन तत्रत्या भारतीया अपि सङ्घटिता बभूवुः। अन्ते च १८९४ तमे वर्षे नेटाल इण्डियन कांग्रेस नामकसंस्थायाः स्थापना अभूत्। गान्धिनो दक्षनेतृत्वे अनया संस्थया तत्रत्य भारतीयानां जीवनस्य सर्वेषु अपि क्षेत्रेषु महती क्रान्तिः कृता। अत्रासीत् गान्धिमहोदयस्य राजनीतेः प्रथमतः प्रारम्भिकः प्रयोगः।

यस्मिन् समये दक्षिणाफ्रिकायां आन्दोलनं कुर्वन् गान्धी तस्मिन् समये भारतेऽपि स्वराज्यसभायाः कांग्रेसस्य कार्यं करोति स्म।

१—खोल कर। २—पगड़ी। ३—उतार देने के लिये।

श्रीकान्त निवृत्य गान्धिमहोदय १९१९ तमे वत्सरे भारतीय काग्रेस-सभाया सम्मिलितो बभूव, १९२० तमवर्षाच्च "असहयोग" आन्दोलनं चालयामास। एतस्यैव नेतृत्वे १९३० तमस्य सरे च काग्रेससभया पूर्ण-स्वतन्त्रताया प्रस्ताव स्वीकृत तदनुसारं च देशे पूर्वतोऽपि अधिकोत्साहेन असहयोगादि आन्दोलन चलितुमारेभे।

१९३२ वत्सरे यदा आङ्गलशासकै हरिजनाना कृते पृथक् निर्वाचन-स्य प्रस्ताव कृत तदा तस्य विरोधे महात्मना आमरणमनशनं प्रार-ब्धवम्। तेन शासक पृथक् निर्वाचनस्य प्रस्ताव परावर्तितवन्त।[1] १९४२ तमे सवत्सरे "भारत छोडो" नाम्ना अन्तिममान्दोलनं चालितं गान्धिमहोदयै यत्कारणात् साद्धवर्षद्वयं कारागारं भुक्त्वाऽपि १९४७ समवत्सरे पूर्णस्वतन्त्रतां लब्धवन्त अनेकशताब्दीभ्यश्च पराधीनं भारतं पराधीनताया उन्मोचितवन्त।[2]

इद जानन्त्येव सर्वे यत् स्वतन्त्रताप्राप्तिसमये देशस्य हिन्दुस्तान पाकि-स्तान रूपेण द्विधा विभाजनं जातम्। अत विभाजनात् पूर्वं विभाजनानन्तरं च कलकत्तानगरे नोआखालीनगरे च हिन्दू मुस्लिम सम्प्रदाये भयानक-रूपेण उपद्रवा आरब्धा। तस्य स्फुलिङ्गाश्च[3] प्रायेण समस्तेऽपि देशे वैर-विद्वेषानल प्रज्वालितवन्त। अस्मिन्नपि प्रशान्तिमयपे उपद्रवपूर्णे च समये महात्मा गान्धिमहोदय शान्तिस्थापनार्थं सुमहान्त प्रयास कृतवान्। अन्ते च अनेन शान्तिप्रयासेन सहैव १९४८ तमे वत्सरे जनवरी मासस्य त्रिशतारिकाया प्रार्थनासभाया गच्छन् एकेन यवनोत्पातपीडितेन गान्धि-महोदयस्य च यवनपक्षपातदुष्टेन "नाथूराम गोडसे" नामकेन युवकेन गुलिकया[4] हत. सन् पाञ्चभौतिक शरीर परित्यज्य चरमा शान्ति लेभे।

इदमेव महात्मन अतिसक्षिप्तमं जीवनचरित वर्तते। अस्मीका-गमनादारभ्य मरणकालपर्यन्तं भारतीयस्वतन्त्रतायै भारतीयाना सर्वविध-

---

१-लौटाया। २-छुडाया। ३-चिनगारियाँ। ४-गोली से।

समुन्नतये च महात्मना गान्धिमहोदयेन यानि यानि च अनुष्ठितानि कार्याणि कृतानि, तत्र तत्र च यादृशी सरलता लक्ष्या तत् सर्वं वर्णनातीतं वर्तते। स्वदेशस्य अहिंसामयस्य प्रदेशस्य च या स्वतन्त्रता तस्या गान्धिमहोदयेन सा मात्रातिशयस्य अभूतपूर्वा घटना वर्तते। एतदतिरिक्तं शिक्षाप्रसाराय, ग्रामोद्योगप्रवर्तनाय, सिद्धान्तानुसारं हरिजनानामुद्धाराय, विधवापुनर्विवाहनिवारणाय, पत्न्या सह समानतायाः विलासितायाः दूरीकरणाय, स्वदेशस्य प्रचाराय, साध्यसमता-प्रतिष्ठापनाय, नैतिकाध्यात्मिक-बलवर्धनाय, समस्तेषु च मानवेषु अन्तिमनिर्विशेषं सौहार्द्यस्थापनाय च गान्धिमहोदयेन यानि यानि कार्याणि कृतानि, ये च श्लाघ्या उपदेशास्तेन दत्ते तिष्ठेत् चिरस्मरणीया भविष्यन्ति। किमधिकम् गान्धिमहोदयो नूनं महात्मा भूत्वापि अमानुषशक्तिसम्पन्नो महामानवः आसीत्। तं युगप्रवर्तकं अकथयन्। एतादृशा महापुरुषा पुनरपि भारतस्य सौभाग्यवर्धनाय अद्वितीयमनुजानेश्च कल्याणसम्पादनाय समये समये जन्म ग्रहीयुरिति भगवान् रामायणो विरचनायो मुद्घोषयन्ति स्म।

संस्कृतभाषायाः प्रचारस्य आवश्यकता।

अस्माकम् अधिवेशनस्य कृते घटनाघटनद्वारा संस्कृतस्य प्रचारस्य किमपि आवश्यकता वर्तते इति विषये विशेषनिर्णयस्य प्रयोजनं नास्ति। इदं तावत् एव मार्तण्ड इव सुस्पष्टं यत् स्वतन्त्रभारतस्य अस्माकं भारतवासिनः अन्तिमलक्ष्यं वर्तते यत् अस्माकं सर्वेषां मानवानां धर्मसंस्कृतिमन्तरेण विना सम्भवं न। यदि स्वतन्त्रता सम्पूर्णा न घटेत् महात्मनां धनं अकोटेः

तर्हि न ते आत्मन. पुरातनम् इतिहास नापि ज्ञानविज्ञानादिकमेव यथार्थरूपेण अवगन्तु शक्नुयन्ति। यद्यपि भूमण्डलस्य विभिन्नभाषासु संस्कृतग्रन्थानाम् अनेके अनुवादाः प्रकाशिता सन्ति तथापि यथा मूल-ग्रन्थानाम् अध्ययनेन कस्यापि विषयस्य यथार्थज्ञान भवति न तथा अनु-वादग्रन्थानाम् अध्ययनेन इति सर्वसम्मतः सिद्धान्तः अस्ति। यथार्थ-ज्ञान तु दूरे तिष्ठतु, अनुवादकाना बुद्धिभेदात्, विचारभेदात् अज्ञानात्, अर्थपरिवर्तनाद्वा पदे पदे भ्रान्तिरेव जायते। अतो य वत् संस्कृताऽध्ययन न क्रियते तावत् कोऽपि भारतीय स्वकीय साहित्यम् इतिहास वा वास्त-विकरूपेण वेदितुं न प्रभवति। तस्मात् अवश्यमेव संस्कृतभाषायाः सर्वैरेव भारतनिवासिभिः प्रवासिभिर्वा आर्यसन्तानैः अध्ययन कर्तव्यम्। बुद्धि-विकाशाय वित्तोपार्जनाय कीर्तिविस्ताराय वा यदेच्छन् अन्यदेशीया अपि भाषा अनुशीलनीया. तत्र नास्ति कस्यापि मतभेदः। यथा यथा अन्य-भाषाणाम् अध्ययन करिष्यते तथा तथा बुद्धिः विकास लप्स्यते, ज्ञाने वृद्धि. भविष्यति, अल्पज्ञता नश्यति, बहुज्ञता च वर्द्धिष्यते। अत. सर्वथा उचित मिन्नमिन्नभाषाणाम् अध्ययनम्। पर भारतीयत्वस्य हिन्दुत्वस्य आर्यत्वस्य वा ज्ञानाय तु सर्वेत पूर्वं संस्कृताऽध्ययन नितान्तमेव आवश्यक वर्तते।

एतदतिरिक्त भारतीयसंस्कृते. रक्षणार्थमपि संस्कृतप्रचारस्य आव श्यकता वर्तते। भाषाया साहित्यस्य वा तत्पाठकानाम् उपरि कीदृशः प्रभाव. पतति इति बुद्धिमताम् अविदित नास्ति। अतो यदि वय संस्कृत पठिष्यामः तर्हि हठात् अस्माकम् आदर्शा विचारा व्यवहाराश्च भारतीया भविष्यन्ति। सततमेव वयम् अवलोकयामः। ये केवल आङ्गलभाषा पठि-तवन्तः ये च केवल संस्कृतं तेषा विचाराऽचारादिषु पूर्व-पश्चिमयोरिव महान् भेदः प्रतिभाति। अतो यथा अस्मासु भारतीयत्व तिष्ठेत् यथा च अस्माक वेषभूषा आचार व्यवहारा रीतयो नीतयश्च भारतीयसंस्कृतेः अनुरूपा. स्यु तथा आचरणीयम्। तस्य च प्रधान साधन वर्तते संस्कृत भाषाया अध्ययनमेव।

अन्यच्च संस्कृतपठनेनैव वयं राष्ट्रभाषाया हिन्द्या स्वकीयासु मातृभाषासु च नैपुण्यं लब्धुं शक्नुमः। यावत् समीचीनं संस्कृतज्ञानं नास्ति तावत् न अस्मासु भाषासु उत्तमोत्तमं निबन्धादिकं लेखितुं शक्यते, न रमणीया कविता कर्तुं शक्यते नापि समालोचनादिकमेव। न च इमा भाषा विना विश्वमान्यानां वेदोपनिषदां गीतादिग्रन्थानां च वयं मौलिकं स्वाध्यायं कर्तुं प्रभवामो येषां सम्प्रत्य सर्वेष्वपि सभ्यदेशेषु सुमहान् प्रचारः समादरश्च वर्तते। अपि च संस्कृतज्ञानहीनैः अस्माभिः स्वकीयानि धार्मिकानुष्ठानानि अपि न विधिपूर्वकं सम्पादयितुं शक्यन्ते नाऽपि संस्कारा एव। यदि वयं संस्कृतं न पठिष्यामः तर्हि स्वपूर्वजानां महान्तम् अपमानं करिष्यामः। तेषान् उपकारेण च वञ्चिता भविष्यामः। अस्माकमेव हिताय पूर्वजैः सर्वमपि भौतिकसुखं परित्यज्य अरण्येषु उषित्वा विविधशास्त्राणां रचना कृता। अस्माकमेव निःश्रेयसाय कपिलादिमहर्षयो दर्शनशास्त्राणि विरचितवन्तः। वेदाङ्गानि अस्माकमेव विविधज्ञानलाभाय विनिर्मितानि। आदिकविना रामायणी कथा, विशालबुद्धिना भगवता व्यासेन महाभारतञ्च अस्माकमेव कल्याणाय विनिर्मितम्। कविकुलशिरोमणिना कालिदासेन स्वकीयानां काव्यनाटकादीनां रचना विधाय अस्माकमेव शिरसि उन्नमितानि। कियत् गणयामः? समस्तमपि वाङ्मयं अस्मत् पूर्वजैः अस्माकमेव समुत्कर्षाय हितसाधनाय च महता परिश्रमेण तपश्चर्यया च विरचितं वर्तते। संस्कृत साहित्यं खलु अस्माकं परम्परागतं सर्वोत्कृष्टं पैतृकं धनमस्ति। अस्यां अवस्थायामपि यदि वयं संस्कृतं न पठिष्यामः, तस्य समादरं न करिष्यामः, पठन-पाठन परम्परया च रक्षणं न करिष्यामः तर्हि कीदृशा वयं बुद्धिहीनाः अकृतज्ञाश्च भविष्यामः? अतः अस्मत्पितॄणां अध्ययनेन सहैव येन केनापि प्रकारेण संस्कृतस्यापि अवश्यमेव अध्ययनं कर्तव्यम्। अत एव इदानीं भारतहितैषिणः सर्वेऽपि मनीषिणो नेतारश्च संस्कृतप्रचारस्य आवश्यकतां समर्थयन्तो दृश्यन्ते।

अनेके जनाः संस्कृतभाषाम् अतीव कठिनां मत्वा तस्या अध्ययनाद्

विरक्ता जायन्ते। परन्तु अय प्रमादोऽपि सर्वथा असत्य एवास्ति। स्वमातृभाषा परित्यज्य अन्यस्या कस्याश्चिदपि भाषायाः संस्कृताध्ययन सर्वथा सुगम सरलञ्च वर्तते। पठन पाठन पद्धतिः अवश्यमेव सम्प्रति ईदृशी दूषिता वर्तते येन पठने विद्यार्थिनो महत् काठिन्यम् अनुभवन्ति। अत एव अय प्रवादः प्रचलितो वर्तते यत् संस्कृतभाषा अतीव कठिन-भाषा वर्तते, परन्तु यदि समुचितरूपेण वैज्ञानिकपद्धत्या च शिक्षण भवेत्तर्हि अल्पीयसा कालेन संस्कृतस्य पठने लेखने च समुचिता योग्यता लब्धु शक्यते। अतो यथा स्वल्पतरेण कालेन विद्यार्थिन पठने लेखने भाषणे च समर्था भवेयु तथा प्रयतनीय शिक्षकप्रवरै।

अथ संस्कृतभाषाया प्रचारस्य केचन उपाया अधस्ताद् निर्दिश्यन्ते येषामुपरि संस्कृताऽध्यापके छात्रै संस्कृतानुरागिभिश्च पूर्णरूपेण ध्यान दातव्यम्।

१—पाठशालासु अतीव सरलया शैल्या अध्यापन स्यात्।

२—अध्ययने अध्यापने, वादे विवादे, खेलने कूर्दने, भोजने पाने तथा च समस्तेषु कार्येषु अध्यापकै. छात्रैश्च परस्पर संस्कृतभाषाया एव व्यवहारः कर्तव्य।

३—पत्रलेखनादिकम् अपि संस्कृतभाषायामेव कर्तव्यम्।

४—प्रतिग्राम, यदि न भवेत्तर्हि प्रतिनगरं तु अवश्यमेव तत्रत्यै संस्कृतप्रचारिणी सभा कर्तव्या यस्या अधिवेशने संस्कृतप्रचारविषये भाषणादिकं भवेत्।

५—नगरेषु संस्कृतकन्यापाठशाला अपि स्थापनीया। गृहस्थ-जनाश्च कन्याना संस्कृतशिक्षणाय प्रेरणीया।

६—संस्कृतस्य अध्यापकै छात्रै तथा संस्कृतज्ञैः ज्योतिर्विद्भि वैद्यैश्च स्वकीया कन्या अभिनवा वध्वश्च अवश्यमेव संस्कृत शिक्षणीयाः।

७—राजकीयः शिक्षाविभागः संस्कृतशिक्षायाः प्रचारविषये पूर्ण-ध्यानदानाय प्रेरणीयः प्रोत्साहनीयश्च ।

८—सर्वेऽपि संस्कृताऽध्यापकाः छात्राश्च संस्कृतभाषाया महत्वादि-षिये व्याख्यानदानाय अभ्यासं कुर्युः । यदा तदा जनसमूहे व्याख्यानं च दद्युः ।

९—संस्कृतज्ञानां जीविकानिर्वाहोचितवृत्ति—स्थिरीकरणाय राज-कीयशिक्षाविभागाः प्रेरणीयाः ।

इमे अत्र कतिपये उपाया अभिनिर्दिष्टाः । अस्मिन् विषये विशेषज्ञा-नाय सार्वभौम संस्कृत प्रचार कार्यालयस्य साहित्यम् अवलोकनीयम् ।

इति कतिपये निबन्धा
लिखिता ज्ञानानुसारमस्माभिः ।
या काचित् त्रुटिरस्मिन्
भवेत्तदर्थं क्षमां याचे ॥

पत्र-लेखन-पद्धतिः

अत्र अभ्यासार्थं कानिचित् पत्राणि लिख्यन्ते। तदनुसारं छात्रैः पत्रलेखनस्य अभ्यासः कर्तव्यः। सदैव च निवेदनपत्रं समाचारपत्रं वा संस्कृतभाषया एव लेख्यम्।

विद्यालये प्रवेशार्थं निवेदनपत्रम्

(१)

श्रीमन्तो माननीयाः अध्यक्षमहोदयाः
संस्कृत महाविद्यालय, वाराणसी,
मान्याः !

सविनयमिदं निवेदनं वर्तते यत् अहमस्मिन् वर्षे देवरियास्थ-श्रीराधाकृष्ण संस्कृत महाविद्यालयतः प्रथमपरीक्षायां सफलतां लब्ध-वान् अस्मि। इदानीञ्च भवता महाविद्यालये मध्यमवर्गे पठितुमिच्छामि। अतः स्वकीये विद्यालये मम नाम उल्लिख्य अहं श्रीमद्भिः शिष्यत्वेन स्वीकरणीय इति मे सविनयप्रार्थना अस्ति।

आशासे, मदीयमिदं निवेदनं स्वीकृत्य श्रीमन्तो अनुग्रहमेव मामनुकम्पयिष्यन्ति इति।

विनीत निवेदकः—
राधामोहन चतुर्वेदी

(२)

श्रीमन्माननीयाः प्रधानाध्यापकमहोदयाः
संस्कृत महाविद्यालय अयोध्या,

मान्यवर्याः !

श्रीमत्सु सविनय प्रणतिपुरस्सरमिद निवेदन वर्तते यदहं चर्वेऽस्मिन् देवरिया मण्डलान्तर्गत भगवीछापर ग्रामस्थ-श्री विद्याधर्म प्रचारिणी संस्कृत पाठशालातः व्याकरणशास्त्रस्य पूर्वमध्यमपरीक्षाया प्रथमश्रेण्या समुत्तीर्णोऽस्मि । अतः परं श्रीमता विद्यालये पठितुकामोऽहं स्वनामोल्लेखनाय निवेदनमिद समर्पये । अन्यच्च महर्घतामये अस्मिन् समये अहं न खलु अत्यत्य सर्वमपि व्ययभार स्वशिरसा एव वोढु समर्थ इति समुचितवृत्तिप्रदानार्थमपि तवभवतो मुहुर्मुहुरभ्यर्थये ।

आशासे श्रीमन्तो निवेदनद्वयमपि इद स्वीकृत्य अकिञ्चनमिमं जनं दयार्द्रदृष्टिपातेन अनुग्रहीष्यन्तीति—

ग्राम कोरया पोस्ट जगतौली
जिला सारन

भवत्को वशवदः—
अच्युतानन्द दीक्षितः

अवकाशार्थं पत्रम्

(क)

माननीया अध्यक्ष महोदयाः
श्री नारंग संस्कृत महाविद्यालयः, धुधुली,

श्रीमत्सु सविनयमिद निवेदन वर्तते यत् आगामिन्या माघ शुक्लाष्टम्या मम कनिष्ठभ्रातु. विवाहोत्सवो भविता । अतोऽहं माघशुक्लपञ्चमीतः आरभ्य माघशुक्लद्वादशीपर्यन्त एकसप्ताहस्य अवकाश प्रार्थये ।

आशासे विवाहोत्सवे मम सम्मिलन परमावश्यक मत्वा श्रीमन्तः अवकाशप्रदानेन मामनुग्रहीष्यन्ति इति ।

विनीत निवेदक—
कृष्णदेव उपाध्यायः
(मध्यमवर्गीयः)

(ख)

लक्ष्मीपुरत
कार्तिक, शुक्ल १० बुधे, २००८

श्रीमत्सु पाठशालाध्यक्ष महोदयेषु

सविनय निवेदनम्,

महोदया ! अहम् अद्य विशेषकारणवशात् विद्यालये उपस्थितो भवितु न शक्नोमि। आगामिनि दिनेऽपि उपस्थिते आशा नास्ति। अतो दिनद्वयस्य अवकाशाय निवेदनमिद श्रीमता सेवाया प्रययामि।

आशा करोमि, श्रीमन्त अवकाशप्रदानेन माम् अनुग्रहीष्यन्ति इति।

विनीत निवेदक —
राजकिशोर सिंह
(प्रवेशिकावर्गीय)

मित्रं प्रति पत्रम्

श्रीनगरत
भाद्र शु० ६, सोमवासरे २००७

माननीयेषु सुहृत्प्रवरेषु श्रीद्विवेदिमहोदयेषु

सस्नेह—नमस्काराः,

बहूनि दिनानि व्यतीतानि पर भवताम् एकमपि पत्र मम हस्तगत नाऽभूत्। भवन्त सम्प्रति कुत्र वर्तन्ते किं च कार्यं कुर्वन्ति इति किमपि मम विदित नास्ति। अत एव सम्प्रति वयं अतीव चिन्ताऽकुला सञ्जाता स्म। आशासे इत पर भवन्त पत्रप्रणयने विलम्ब न करिष्यन्ति, शीघ्रमेव च स्वकीयेन शुभसमाचारेण अस्मान् आनन्दयिष्यन्ति इति।

अस्माक गृहस्य सर्वोऽपि समाचार समीचीन एवाऽस्ति। अहमपि पाठशालाया परिश्रमेण पठन् अस्मि। विशेषसमाचार भवत पत्र समागते पुन लेखिष्यामि। शीघ्रमेव पत्रप्रदानेन अनुग्राह्या वयमिति—

भवता स्नेहभाजनम्—
आसुरेन्द्र

मित्रं प्रति पत्रम्

प्रिय रेवतीरमण शर्म्मन् !

भवता गमनकाले कथितं यत् गत्वा अहं शीघ्रमेव पत्रं प्रेषयिष्यामि, परन्तु अद्य मासाधिकः कालो व्यतीतः परं भवतः पत्रं न समागतम्। धन्याः सन्ति भवन्तः ! किम् ईदृशी एव भवतां प्रतिज्ञा भवति ? अस्तु। इदं मदीयं पत्रं पठित्वा शीघ्रमेव पत्रोत्तरं देयम्। इदानीं भवान् कुत्र निवसति, किं करोति, किं पठति लिखति, कदा च अत्र आगमिष्यति, गृहस्थं च कीदृशं समाचारं वर्तते, स्वास्थ्यं च भवतः कीदृशं सम्प्रति ? इति सर्वमपि शीघ्रतया पत्रद्वारा सूचनीयम्। अत्र सर्वेऽपि भवदीयागमस्य प्रतिदिनं प्रतीक्षां कुर्वन्ति।

निजपितुरादेश्यो मम सादरं प्रणतयः सूचनीयाः। आशासे भवान् अस्मिन् वारे झटित्येव पत्रं प्रदास्यतीति।

सस्नेहम्
भवतः अभ्युदयाकांक्षी
प्रियव्रत शर्मा

गुरुसमीपे पत्रम्

गोरक्षपुरतः
आश्विन, कृ० ५—शुक्रे २००७

श्रीमत्सु श्रद्धेयचरणकमलेषु
सविनयं कोटिशः प्रणामाञ्जलयः !

पूज्यपादानां कृपया वयं सर्वेऽपि कुशलिनः स्मः। आशासे श्रीमत्तोऽपि सपरिवाराः कुशलिनो भविष्यन्ति।

विशेषसमाचारः अयं वर्तते यत् अहम् अस्मिन् वर्षे प्रथमश्रेण्यां समुत्तीर्णः अस्मि। मम विद्यालयस्य अन्ये अपि विद्यार्थिनः समुत्तीर्णाः

न्ति। अस्य वर्षस्य परीक्षाफलं बहु समीचीनं वर्तते। ग्रीष्मावकाशा-
नन्तरं पुनरपि वयं परिश्रमेण पठिष्यामो येन अग्रिमवर्षेऽपि परीक्षायां
सफला भविष्यामः।

श्रीमता वशंवदः—
रामलखन पाण्डेयः

पितुः समीपे पत्रम्

अयोध्या-गुरुकुलतः
भाद्र कृष्णाष्टमी २००८

श्रीमत्सु पूज्यपितृचरणकमलेषु
कोटिशः सविनय-प्रणतितयः।

बहूनि दिनानि व्यतीतानि परं श्रीमता किमपि पत्रं न आगतम्। अहमत्र भवतामादेशानुसारं परिश्रमेण स्वपाठ्यग्रन्थानाम् अध्ययन करोमि। परन्तु मम समीपे सम्प्रति अनेकानि आवश्यकवस्तूनि न सन्ति। पाठ्यपुस्तकानि सर्वाणि न सन्ति, लेखनी-मसीपात्रादिकमपि समीचीन नास्ति। खाद्यपदार्थानामपि अल्पता वर्तते, वस्त्राणि च मम प्रायेण जीर्णता गतानि सन्ति। अतः श्रीमद्भिः शीघ्रातिशीघ्रं (५०) रूप्यकाणि प्रेषणीयानि। अत्र विलम्बो न कर्तव्यः। अहं नवरात्रावकाशे आगमिष्यामि।

भवदीयः आज्ञाकारी
ब्रह्मचारी श्रीकृष्णः

प्रस्ताव-समर्थन-पद्धतिः

अत्र सभापतेः कृते प्रस्तावकरणस्य, व्याख्यानारम्भस्य तदुपसंहारस्य च कानिचित् निदर्शनानि दीयन्ते। छात्रैः एतेषामभ्यासं कृत्वा अस्मिन् पुस्तके लिखितानां निबन्धानां व्याख्यानरूपेणापि कथनस्य अभ्यासः कर्तव्यः।

नार्हति । अतोऽहं सभापतिपदाय समादरणीयाना श्रीयुतं महोदयानां नाम सम्मानं प्रस्तौमि ।

मयैव, भारत समर्थनेन अनुमोदनेन च सहर्षमिमं प्रस्तावं स्वीरिष्यतीति ।

अनुमोदनं समर्थनं च ।

(१) ग्रहमेतस्य प्रस्तावस्य हृदयेन समर्थनं करोमि ।

(२) श्रीमता प० महोदयेन योऽयं प्रस्तावः सभापतिपदाय विहितः स सर्वथा श्लाघनीय सर्वेषां च कृते उत्साहवर्द्धको वर्तते ।

अताऽहं अस्य प्रस्तावस्य हार्दिकं समर्थनं करोमि ।

अथ व्याख्यान पद्धतिः ।

(क)

परमसम्माननीया सभापतिमहोदया ।

श्रादरणीया सभासदश्च ।

अत्र अहं श्रीमतामग्रे विषयेऽस्मिन् किमपि वक्तुमिच्छामि । यद्यपि अस्मिन् विषये मम अधिकं ज्ञानं नास्ति । शुद्धशुद्ध-संस्कृतभाषणस्यापि अभ्यासः नास्ति । तथापि उत्साहवशात् यथाशक्ति किमपि अवश्यमेव वक्तुं समीहा वर्तते ।

आशा करोमि, श्रीमन्तः मम त्रुटीनाम् उपरि ध्यानं न दास्यन्ति प्रत्युत च व्याख्यानं श्रुत्वा मम उत्साहं वर्धयिष्यन्ति । (अत परं स्वविषये व्याख्यानं देयम्)

(ख)

परमद्या सभाध्यक्ष महोदया ! समुपस्थिता माया मनागपि !

सम्भाषणेयं सभासद ! प्रशासरद्धाञ्जलिपूर्वम् !

महतः समुल्लासस्य परमानन्दस्य च अयं विषयो वर्तते यत् वयमद्य सर्वेऽपि सुरभारतीसेवका नानास्थानेभ्यो भारतीयसंस्कृतेः प्राणभूतायाः संस्कृतभाषायाः प्रचारविषये विचारविनिमय कर्तुं समुपस्थिताः स्म । मदादृशानां विद्वद्वरेण्यानां महति समुदायेऽस्मिन् यद्यपि मादृशस्य स्वल्पबुद्धेर्बालकस्य व्याख्यानदान धृष्टतामात्र साहसमात्रमेव वा वर्तते तथापि यथाशक्ति मातुः सेवायां सर्वेऽपि बालकाः समानाधिकारा भवन्ति इति नियमानुसारं अहमपि यथाशक्ति यथाबुद्धि च मातुः सुरभारत्याः समुद्धारविषये किमपि वक्तुमिच्छामि । आशासे महानुभावाः श्रीमन्तो मदीयमिद बालचापल्यं मदीयाः त्रुटीश्च अवश्यमेव क्षमित्वा माम् अनुग्रहिष्यन्ति इति ।

श्रीमन्तो माननीयाः सभापतिमहोदयाः, आदरणीयाः, सभासदः, प्रिया विद्यार्थिबन्धवश्च !

अद्य खलु महतः सौभाग्यस्य अयं विषयो वर्तते यदहं श्रीमतां पुरस्तात् संस्कृतभाषायाः प्रचारविषये किमपि कथयितुं श्रीमता सभापतिमहोदयेन आदिष्टोऽस्मि । यद्यपि विद्यावयोवृद्धानां श्रीमता पुरस्तात् मम भाषणं सर्वथा अनधिकारचेष्टितमेव वर्तते तथापि मन्ये क्षमाशीलाः श्रीमन्तो मम इदं बालचापल्यं क्षमिष्यन्ते, मम भाषणे याः काश्चन त्रुटयो भवेयुः तदर्थमपि च क्षमाप्रदान करिष्यन्ति ।

उपसंहारः ।

१—माननीयाः !

मया पूर्वमेव निवेदितं यत् अस्मिन् विषये मम ज्ञानं स्वल्पं वर्तते । अतः सम्प्रति अहं स्वव्याख्यानं समाप्तं करोमि ।

२—सान्यसभासदः !

अत पर अभ्यासाभावात् मया अधिक वक्तु न शक्यते । अतोऽहम् आत्मनो व्याख्यानम् अत्रैव समाप्य विरमामि ।

३—माननीया पारिषद्याः !

भूयान् खलु मया समयो गृहीत श्रीमताम् । अन्ये च अनेके सुयोग्या वक्तारो वर्तन्ते येषा व्याख्यानश्रवण नितान्तमावश्यक वर्तते । अतोऽहं स्वकीया वक्तृता अत्रैव उपसहरन् श्रीमत क्षमा याचे ।

४ - सभापतिमहोदया सभ्याश्च !

एव मया अस्मिन् विषये यथाशक्ति स्वकीया विचारा भवता पुरस्तात् उपस्थापिता । अत्र यदि काचित् त्रुटि स्यात् अनुचित वा किमपि उक्त स्यात् तर्हि तदर्थमहं क्षमा याचे ।

